3174	1101	Ārya-vasudhārā-stotram		
3175	2624	,,		

6	7	8	9	10	11
P.	D,Sk.	24×11 5 18,10,30	C	Old, 20th c.	
P.	D,Sk	25×8 5 4,7,43	C	Old; 18th c	Smeared
P	D,Sk	25×11 1,17,50	Inc	Old, 16th c.	
P.	D,Sk	20 4×11 5 5,12,25	C	Old, V S 1760	Ends damaged, Scb —Gaṅgārāma s/o Haribhāī
P	D,Sk	25 7×11 4 6,16,40	C	Good, V S, 1783	
P	D,Sk	26×11 6 13,8,30	C	Old, 17th c	
P	D,Sk	27 8×12 3 2,14,34	C	Good, V S 1924	Scb -Gokul p/o Vijayacandra-Svāmi
P.	D,Sk	26.7×11 5 4,17,36	C	Good, V S 1814	Scb —Mahi-vallabha, Pl —Bhuja (Kaccha)
P.	D,Sk	26×11 2 7,12,28	C	Old, 17th c	
P	D,Sk.	23×11 8 6;15,34	C	Good, V S 1869	Scb —Kirtikuśala p/o Jñānakuśala
P	D,Sk Or-	25×11.7 12,12,33	C	Good, 19th c	
P.	D,Sk.	24×13 98,18,40	C	Good; V.S 1827	Index annexed with no. 3143
P.	D,Sk	25.7×11.4 7,11,36	C	Old; 17th c	
P.	D,Sk.	26 5×12.1 4,19,37	C	Good; V S 1881	Scb —Haṃsarāja, Pl —Makasudābāda-Vālocarā

APPENDIX I

(Extracts from important Manuscripts)

1. कौषीतकी - ब्राह्मणम्

OPENING : (on page 54)

× × × × श्रिव हरेत्याह यजमानो प्रच्यावुकोभवत् यथोपवेषेण दक्षिणतोङ्गारानुपसूहति नमो देवेभ्य इति न हि नमस्कारमतिदेवा सुप्रत्यूह्लानङ्गारान् प्रत्यूहेत्याह ग्रस्य नान्नमचारिणो च न नश्यति चतुरुन्नयेच्चतुष्टय वा इद सर्वमस्यैव सर्वस्याप्त्यै पञ्चकृत्व उन्नयेत् पाङ्क्तो वै यज्ञो यज्ञस्यैवाप्त्यै ॥ १ ॥

CLOSING

पवमाने स्तूयमाने होतार मृत्यु. प्रत्यालीयत तमाज्येन न्यकरोत् । अन्यत्र स्तोत्रियादाज्ये सामाज्ये प्रत्यालीयत त प्र उगेण न्यकरोत् अन्यत्र स्तोत्रियात्त माध्यन्दिने पवमाने प्रत्यालीयत त मरुत्वतीयेन न्यकरोत् अन्यत्रैव स्तोत्रियाद् अथ वै निष्केवल्ये स्तोत्रियेणैव प्रतिपद्यते । तद्यथा भयेति मुच्य मृत्यु यथातिमुमुचान एव तदाहुर्निष्केवल्यमेवेद निष्केवल्यमदो महाव्रते शस्यन्ते वा अमुत्र चतुरुत्तराणि कथमिहोपाप्यन्त इति तानि वा इहोपाप्ततराणि भवन्ति स्तोत्रियानुरूपौ सहान्तौ सप्तचतुरुत्तराणि सम्पद्यन्ते चतुरक्षरञ्च पदमुदेति तं पशवस्तान् पशून् यजमाने दधाति विराड्वा अग्निष्टोमो नवत्रिंशत स्तोत्रिया सम्पद्यन्ते प्रत्यक्षमेवैतद् अग्निष्टोमस्य रूप उपैति यद् विराजा यजति पिबा सोममिन्द्रमन्द तुत्वेति पद परिशिष्य विराजोर्द्धर्चेनावानिति श्रीर्विराडन्नाद्य श्रियान्तद्विराज्यन्नाद्ये प्रतितिष्ठत्युत्तरेण विराजोर्द्धर्चेन वषट् करोति स्वर्ग एव तल्लोके यजमान दधात्यनुवषट् करोति आहुतीनामेव शान्त्या आहुतीना प्रतिष्ठित्या आहुतीना प्रतिष्ठित्यै ॥ ५ ॥

COLOPHON

इति कौषीतकि-ब्राह्मणे पञ्चदशोध्याय ॥ छ ॥

Post-Colophonic

संवत् १५१८ वर्षे द्वितीय आषाढ सुदि १४ शनौ द्विवेद गोविन्दसूनुना वत्सराजेन लिखितमिदम् ।

---

2. आत्मषट्कोपनिषत्

OPENING

श्रीपरमगुरवे नम ।

ॐ भद्रं नो अपि वातयमानः । ॐ आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चनमिषत् ईक्षत लोकान्नुसृजा इति । स इमाल्लोकानसृजताम् । भो मरीचीर्मरमापोदोम्भः । परेण दिव द्यौः प्रतिष्ठान्तरिक्ष मरीचय । पृथिवीमरोया अधस्तात् ता आपः स ईक्षतेमे नु लोका लोकपालान्नुसृजा इति । सोऽद्भ्य एव पुरुष । समुद्धृत्यामूर्छयत् तमभ्यतपत् तस्याभितप्तस्य । मुख निरभिद्यत । यथाण्ड मुखाद् वाग् वाचोग्नि । नासिके निरभिद्येता नासिकाभ्या प्राणः प्राणाद् वायुः । अक्षिणी निरभिद्येता अक्षीभ्या चक्षुः चक्षुष आदित्य । कर्णौ निरभिद्येता कर्णाभ्या श्रोत्र श्रोत्राद् दिशः ।

त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतय । हृदय निरभिद्यत हृदयान् मनो मनसश्चन्द्रमा । नाभिनिरभिद्यत नाभ्या अपानोपानान् मृत्यु । शिश्न निरभिद्यत शिश्नाद् रेतो रेतस आप ॥ १ ॥

CLOSING वाङ् मे मनसि प्रतिष्ठित । मनो मे वाचि प्रतिष्ठित । गाविरावीर्म एधि । वेदस्य म आणीस्थ । श्रुत मे मा प्रहासी । अनेनाधीते नाहोरात्रान् सदधाम्यृत वदिष्यामि । सत्य वदिष्यामि । तन्मामवतु । तद्वक्तार भवत्ववतु मामवतु वक्तारमवतु वक्तारम् ॐ शान्ति शान्ति शान्ति ॥ ६ ॥

COLOPHON इति ऋग्वेदस्यात्मषट्कोपनिषत् समाप्त ।

6 अनुवाकाः

OPENING ॐ श्रीगणेशाय नमः ।

ॐ अथानुवाकान् वक्ष्यामि, ब्रह्मणा निर्मितान् पुरा ।
शिष्याणामुपदेशाय, यज्ञसंस्कारणाय च ॥
विप्राणां यज्ञकालेषु, जपहोमार्चनादिषु ॥ १ ॥

CLOSING इति अनुवाका प्रदृष्या समाप्त । श्री

Post Colophonic सम्वत् १८३९ ना आश्विन वदि ३० मन्दवासरे लखितंग उपाध्या[य] कमलजि आत्मपठनार्थम् । श्रीमाधवगोविन्दविराजमाने श्रीतिलकण्ठवालिकेश्वरविराजमाने । श्रीसिस्थलक्षेत्रे लख्यो छे ।

७ अनुवाका:

OPENING. श्रीगणेशाय नम,

अथानुवाका लिख्यते ।

अनुवाकान् प्रवक्ष्यामि ब्रह्मणा निर्मितान् पुरा ।
विप्राणां यज्ञकालेषु जपहोमार्चनादिषु ॥ १ ॥

CLOSING & COLOPHON

दशाध्याये समाख्याता अनुवाका: सर्वसख्यया ।
शत दशानुवाकाश्च नव चैव प्रकीर्तिता ॥ १ ॥

सप्तषष्ठिश्चितौ ज्ञेया सौत्रे द्वाविंशतिस्तथा ।
अश्व एकोनपञ्चाशत् पञ्चविंशत् खिले स्मृता: ॥ १ ॥

शुक्रियेषु तु विज्ञेया एकादश मनीषिभि. ।
एकीकृत्य समाख्याता [सु] त्रिंशत त्र्यधिक मतम् ॥ ३ ॥

इति कात्यायनोक्ता अनुवाका समाप्तमिति भद्रम् ।

गुणाष्टौ(च) द्वितीयाया तृतीयेन्दुमुनिस्तथा ।
चतुर्थे गाभिकाश्चैव अनुवाकाश्च सूरभि. ॥ १ ॥

नवशतानि साहस्रच-पञ्च सप्ततिरेव च।
सखिल परिशिष्टञ्च, ब्राह्मण च चतुर्गुणम् ॥ २ ॥

इति प्रसवोत्थाने अनुवाकसंख्याप्रकारान्तरेण ७०६२४।

Post-Colophonic लखावितं नागरज्ञाती जीर्णगढवास्तव्य त्रिवेदी दीवान श्रीदलपतरामजी ये पत्र अपाव्या। लखित दवे श्रीमालीज्ञाती द्विवेदी दवे श्री ५ गोवर्द्धन केशवजी। श्रीरस्तु।

37. शतपथ-ब्राह्मणम्

(चतुर्दश-काण्डम्) 'प्रवर्गम्'

OPENING श्रीगणाधिपतिम्न।

देवाह् वै सत्र निषेदु। अग्निरिन्द्र सोमो मखो। व्विष्णुर्व्विश्वेदेवा अन्यत्रैवा-श्विभ्याम् ॥ १ ॥अथैतद्वै। आयुरेतज्योतिः प्रविशति य एतमनु वा ब्रूते भक्षयति वा तस्य व्रतचर्याया सृष्टौ ॥ ३१ ॥

COLOPHON: ब्राह्मण ३ द्वितीयप्रपाठक कण्डिका सख्या २५४, अध्याय ३।६४, काण्डानि ६७ प्रवर्गकाण्ड १४ समाप्त। कण्डिका सख्या १२२। [प्र प्र पा क स १३२, द्वि. प्र. पा क. स. १२२, समग्रकण्डिकासख्या २५४]

Post-Colophonic सवत् १७३० वर्षे कार्त्तिक वद ३ रवउ लखीत मारस्वतज्ञातिय पढा भीमजीसुत लखतग गोपालजी। श्रीमालीज्ञाती दवे नाथाने लखी आपी छे। कृष्णार्पणे लखी छे।

38. शतपथ-ब्राह्मणम्

(चतुर्दश-काण्डम्) 'बृहदारण्यकम्'

OPENING श्रीगणेशाय नमः।

ॐ द्वयाह प्राजापत्या। देवाश्चासुराश्च तत कानीयसाऽएव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्द्धत ॥ १ ॥

CLOSING: प्राश्नीपुत्रादासुरिवासिन। प्राश्नीपुत्र आसुरायणादासुरायण आसुरे आसुरिर्याज्ञ-वल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोरुणादरुण, उपवेशे उपवेशि. कुश्रे. कुश्रि व्वाज-श्रवसो व्वाजश्रवा जिह्वावतो बाध्योगाज्जिह्वावान् बाध्योगोऽसितादार्षगणादसितो-व्वार्षगणो हरितात् कश्यपाद्धरित काश्यप, शिल्पात कश्यपात् शिल्प कश्यप. कश्य-पान्नैध्रुवेः कश्यपो नैध्रुविः व्वाचो व्वागम्भिण्या अम्भिण्याऽऽदित्यादादित्यानीमानि शुक्लानि यजूंषि व्वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥ ३३ ॥

COLOPHON ब्राह्मण ॥ ५ ॥ पञ्चम प्रपाठक. समाप्त। कण्डिका १०१॥ इत्यारण्यक नाम चतुर्दशम काण्ड समाप्तम्। एव काण्डे कण्डिकासख्या ५४२। ब्राह्मणानि सख्या ५०। वेदे सर्वत्र कण्डिकासख्या ७६२४। इत्युपनिषत् समाप्तम्।

41. शतपथ-ब्राह्मणम्

(चतुर्दश-काण्डम् 'बृहदारण्यकम्')

OPENING

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।

ॐ उषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणोव्यात्तमग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्यस्य द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवान्तरदिशः । पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा-नक्षत्राण्यस्थीनि नभो मांसान्यूवध्यं सिकताः सिन्धवोगुदायकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन् पूर्वार्धो निम्लोचञ्जघनार्धो यद् विजृम्भते तद् विद्योतते यद् विधूनुते तत् स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् ॥ १ ॥

CLOSING

समानमा साञ्जीवीपुत्रात् साञ्जीविपुत्रो माण्डूकायनेर्माण्डूकायनि माण्डव्यात् माण्डव्य कौत्सात् कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद् वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्याद् वात्स्य कुश्रेः कुश्रिः यज्ञवचसो राजस्तम्बायनाद् यज्ञ-वचा राजस्तम्बायन तुरात्कावषेयात् तुर कावषेय प्रजापते प्रजापतिर्ब्रह्मणो ब्रह्म-स्वयम्भु ब्रह्मणे नम ॥ ७५ ॥

COLOPHON

इति पञ्चम ब्राह्मणम् । इत्यष्टमोध्याय समाप्त ।

Post-Colophonic

संवत् १६१६ । माहे ज्येष्ठ शुद्ध १५ गुरुवासर तद्दिने समाप्त । शके १७८४ श्रीमुखनाम [संव]त्सरे । श्रीगुरुरामदासचरणीतत्पर विष्णुनारायण देवधरेन इद पुस्तक लेखन कृतम् । श्रीगुरुदत्तार्पणमस्तु ।

145. कालनिर्णय-सिद्धान्तः सटीकः

W-OPENING

शिवं कालतनुं नत्वा विपश्चिज्जनतुष्टये ।
कालनिर्णयसिद्धान्तं वक्ष्ये ग्रन्थानुसारतः ॥ १ ॥

W-CLOSING

श्रीमत्सिंहपुरान्तिके द्विजनिगमी वेलावटाख्ये पुरे,
श्रौतस्मार्तविधानसारचतुरो वैकुण्ठनामाऽभवत् ।
तत्सूनुर्जयराम माय उदित. श्रीरामनामापर-
स्तत्पृष्ठे हरिराम इत्यभिधया ब्रह्मेशविष्णूपमा. ॥ ११७ ॥
तत्र श्रीजयरामनन्दन रघुरामेणात्र बुद्धया स्वया,
ज्ञात्वान्यान्निबन्धरान् विनिमित निश्चित्य सद्ग्रन्थ
तदृष्ट्वा गिरिनार-राजमहित श्रीदामजित्सन्मुनो,
पृत्तीन्स्मर्त्तगोत्रिनिवर्धरसयद् ग्रन्थ महादेववित् ॥ ११८ ॥
स्वस्तिश्रीनृपविक्रमाब्दविषयमन्येन्दुसंख्येऽब्दके,
मार्गे मासि सिते दले स्मरनिधौ वारे मृगाङ्कस्तिथेः ।
साध्ये पुण्यपतैतिलाख्यकरणे श्रीमद्गुजाख्ये पुरे,
दृष्ट्वार्थं रघुरामवत्पुस्तमकरोद् ग्रन्थ महादेववित् ॥ ११६ ॥

CT-OPENING श्रीगणेशाय नमः । अथ निर्णयसिद्धान्त सटीको लिख्यते ।

प्रणम्यैकरद देव, शारदा गुरुमेव च ।
कालनिर्णयसिद्धान्त, व्याकुर्वे विशदोवितत ।। १ ।।

प्राज्ञैराद्यैर्ह्यपर्चनिबन्धा, क्लृप्तानाना वेदशास्त्रार्थविज्ञे ।
भास्वत्स्वेतेष्वर्थसदर्शनार्थं, दीपाकारा मे सूक्तिर्गुंजरस्य ।। २ ।।

जानन्ति ये भूरि सुभूरिविद्या तेषा निमित्त न ममैष यत्न ।
उत्पत्स्यते मत्सदृशोऽपि कश्चित्, कालो ह्यनन्तो विपुला धरित्री ।। ३ ।।

अथ ग्रन्थकर्त्ता स्वाभीष्ट प्रतिजानीते—

CT CLOSING अथ टीकालेखनसमय व्याख्यातारमुपदिशति—

शाके विक्रमभूपतेर्गगनभूसप्तेन्दु १७१० सख्येयने ,
सौम्ये माधवमास उज्ज्वलदले वारे गुरौ पुष्यभे ।
जीवाहे युजि गजनाम्नि करणे षष्ठे भुजे पत्तने ,
व्याख्येय जयरामजेन रघुणा ग्रन्थस्य बुद्धया कृता ।। १२० ।।

व्याख्या—एतादृशे समये भुजे नगरे द्विवेदि जयरामजेन रघुरामेण ग्रन्थस्येय बुद्धया मनीषया कृतेति ।

COLOPHON इति द्विवेद्यग्निहोत्रि-श्रीविजयरामसुत रघुरामविरचितो निर्णयसिद्धान्त सटीक' समाप्तिमगमत् ।

Post-Colophonic ।। सवत् १८३५ वर्षे शाके १७०० प्रवर्त्तमाने मासोत्तममासे मार्गशीर्षमासे शुक्लपक्षे पञ्चम्या पुण्यतिथौ चन्द्रवासरे । रविदाक्षरणायने गते हेमन्तऋतौ । पूर्वाषाढनक्षत्रे गजनाम्ने योगे । नविननगरमध्ये वास्तव्य जाम श्रीअसाजी विजयराज्ये यजुर्वेदि वाजसनेयी माध्यदिनशाखाध्यायिन गोधामौद्गलसगोत्री श्रीश्रीमालज्ञातीय दवेजी श्री ५ कृष्णासुत दवे श्यामलसुत दवे जगन्नाथसुत दवे वैकुण्ठसुत दवे नाभाई सुत दवे मह्यासुत दवे करशनजीसुत दवे इन्द्रजीसुत दवे महीधरसुत दवे प्रभाकरात्मज दवे श्री ५ भीकमजी तत्सुत जादवजीकेन लिखितमिद पुस्तक ग्रन्थ निर्णयसिद्धान्त । स्वयमेव पठनार्थ । पुत्रपौत्रप्रपौत्रवृद्धवर्थ च परोपकारार्थम् ।

147. जयसिंह-कल्पद्रुमः

(श्राद्धनिर्णय)

OPENING श्राद्धे मातामहपार्वण नाचरन्ति शिष्टा. यत्तु पूर्वोक्तधौम्यवचनाद्दर्शविकृतित्वेन वा मातामाहानामत्र कैश्चित् प्राप्तिरुक्ता तत्र पितृपात्रेषु प्रेतपात्र प्रसेचयेत् इत्यादौ पितृशब्दस्य वस्वादिभावापत्तिरूपसस्कारनिरापरत्वेपि इह न तत्परता, किन्तु लिङ्गसमवायन्यायात् पितृसमुदायपरत्वमेव कर्पूसमन्वित युक्ता । तथाद्य श्राद्धषोडश प्रत्याब्दिकञ्च शेषेसु पिण्डा स्यु ।

COLOPHON

इति देवभट्टात्मज-पौण्डरीकयाजिरत्नाकरविरचिते जयसिंह-कल्पद्रुमे महालय-श्राद्धनिर्णयः।

Post-Colophonic

स्वस्तिश्रीनेनरग्नर्पविधुमितसरमाघमुक्लाष्टमीषु ,
श्रीमत्पौष्यैकदीनोप्यतिविषमदशा प्राप्त मापूरयत् सत् ।
पुस्त कल्पद्रुमाख्य कतिपयदलक श्राद्धशास्त्रार्थयुक्त ,
नाम्ना सोमप्रवाको व्रजविभुरयतो मङ्गल वान्छतीह ॥ १ ॥

162. वाशिष्ठी-भाष्यम्

OPENING

श्रीगणेशाय नम । ॐ ग्रहेभ्यो नम ।

प्रणम्य पूर्वं पुरुष पुराण, तथैव कात्यायनपादपद्मम् ।
शान्तेर्महाभाष्यमिद तनोति, श्रीवेदमिश्रः श्रुतितो विविच्य ॥ १ ॥
सविश्रादिग्रहान्नत्वा वशिष्ठादीन्महानृषीन् ।
वेदमिश्र स्फुट ब्रूते भाष्य वाक्यानुसारत ॥ २ ॥

CLOSING

माध्यन्दिनी तु या शाखा सर्वसाधारणस्य ता ।
तामेव तु पुरस्कृत्य वसिष्ठेन प्रकाशितम् ॥

या सर्वसाधारणा-वर्णचतुष्टयसाधारणा समा ता शाखा आश्रित्य वसिष्ठेन प्रकाशित-कथितमिति ।

शान्तिक । य शान्तिक नित्य भवति । तस्य पठनशीलस्य ग्रहा सर्वदा सानुकूला भवन्ति । यथा समुत्थित यत्र यन्त्रेण हन्यते तथा मुथित घोर ग्रहशान्त्या प्रनश्यति । यथा बाणप्रहाराणा कवच भवति वारण तथा दैवे शान्तिर्भवति वारणम् ।

COLOPHON

इति श्री वेदमिश्रकृत वासिष्ठीभाष्य समाप्तम् ।

Post-Colophonic

सवत् १८६८ ना माहा वद २ गुरुवासरे लिखितग देवे (दवे) श्री ५ डोसामुत पुरुषोत्तमेन श्री कुतीश्राणा मध्ये अमरेश्वरसन्निधौ ।

167. स्मार्त-पदार्थ-संग्रहः

OPENING

श्रीगणाधिपतये नमः । श्रीसरस्वत्यै नम ।

श्रीनृसिंह शिव नत्वा भवान्या च सरस्वतीम् ।
गणेश पितरौ कात्यायनादीन् वक्रेरगुरुौ ॥ १ ॥
रामाग्निहोत्रीपुत्रस्य पुत्रो गङ्गाधराभिध, ।
परोपकृत्यै कुरुते गद्यैः सस्कारपद्धतिम् ॥ २ ॥

तत्र सस्कारक्रमः—

CLOSING & COLOPHON

इति श्रीगङ्गाधरभट्टविरचितायां प्रयोगपद्धतौ स्मार्तपदार्थसग्रहे चतुर्थीकर्म समाप्त । ततः आवसथ्या ध्यान कुर्यात् ।

ग्रन्थान्तराणि सवीक्ष्य, यथामति मयोदितम् ।
उक्तान्नुक्त दुरुक्त यदत्र शोध्य तदार्यकैः ॥ १ ॥

यो कात्यायनवंशभालतिलको रामो ह्यभूद् भूतले,
तत्पुत्रो वसुधाञ्जितेन यशसा दामोदरोऽमण्डयत् ।
तत्पुत्रो व्यदधात्तयो दशसु संस्कारेषु गर्भं...ञ्
विप्राणामुपकार एव निरतो गङ्गाधर पद्धतिम् ॥ २ ॥
इति पूर्वार्द्धं सम्पूर्णम् ।

Post Colophonic संवत् १८३१ वर्षे वैशाखम(मा)से कृष्णपक्षे पञ्चम्यां तिथौ गुरुवासरे लिखितं । श्रीरस्तु । श्रीमाल्लीज्ञातीय दवे इन्द्रजीसुत दवे महीधरसुत दवे प्रभाकरसुत दवे नीकमजी तत्सुत जादवजी केन लिखित पठनार्थं । तथा भाई गदाधरपठनार्थम् ।

170. स्मृत्यर्थसारः

OPENING (Begining from 3rd folio) × × × × × [प्र]थमे वर्षे तृतीये वा कार्यम् । बहुमतत्वात् तद्यथा कुलधर्म वा । एते संस्कारा बीजगर्भस्थदुरितक्षयार्था यथास्वाचारं कार्या । स्त्रीणामहोमकास्तूष्णीं स्युः विवाहस्तु समन्त्रक । एते कालातिक्रमे व्याहृतिहोम कृत्वा कार्या. । एतेष्वेकैक लोपे पादकृच्छ्र कार्या । चौलौ त्वर्थकृच्छ्र मत्यालोपे अनापदिव द्विगुण ।

CLOSING
अहन्येकादशे प्राप्ते पार्व्वणं तु विधीयते ।
एकोद्दिष्टं न कुर्वीत त्रिदण्डानां कदाचन ॥
सपिण्डीकरणं तेषां न कर्त्तव्यं सुतेन तु ।
त्रिदण्डधारणात् प्रेत्य नष्टमाहोशना मुनिः ॥
कुटीचकं संप्रदहे पूरयेच्च वहूदकम् ।
हंसं जले तु निक्षिप्य, परमहंसं विकारयेत् ॥
इत्याह भगवान्बौधायनः । छ ।

COLOPHON: इत्यादि स्मृत्यर्थसारे आशौचप्रकरणम् ।

Post-Colophonic संवत् १४८५ वर्षे । कार्तिक वदि ९ ।

176. आचारादर्शः

OPENING
श्रीगणेशाय नमः ।
दीक्षितो रणयज्ञेषु विबुधानन्ददायिषु ।
हरिरब्धिमुतावक्त्र, सोमपीथी पुनातु वः ॥ १ ॥
अहोरात्राश्रितो धर्म इह वाजसनेयिनाम् ।
निबध्यते निबद्धोऽयं धर्मशासननिबन्धभिः ॥ २ ॥
तत्र मनु —

CLOSING:
समूलवचनाभोगी मीमांसान्यायनिर्मलः ।
श्रीदत्तेन सनामेष आचारे दर्पणः कृतः ॥
दुरुक्तमपि सूक्तञ्च मन्वादिवचनाश्रितम् ।
अपि चर्मोदकं तीर्थसलिलान्तर्गतं शुचिः ॥

COLOPHON:
इति श्रीमहामहोपाध्यायश्रीदत्तकृत
आचारादर्शः सम्पूर्णम् ।

Post-colophon : पुष्यमासे कार्तिकशुक्लपक्षे त्रयोदश्यां रवौ संवत् १८६७ शिवनाथेन लिखित-मिदं जयनगरे राजामलक्षत्रियस्य कटलामध्ये देवगृहे समाप्तमिदं पुस्तकम् ।

179. आशौचत्रिंशत्

OPENING श्रीगणेशाय नमः । ॐ अथाशौचं विलिख्यते ।

तत्र स्मार्तधर्ममुल्लङ्घ्य लोकप्रसिद्धकर्ममनुसरन् गर्भनिमित्ताऽऽशौचक्रमेणाऽऽशौचं प्रतिपादयति—

CLOSING इति संस्मृत्य गच्छेयुः गृहं बालपुरःसराः ।
विदश्य निम्बपत्राणि नियताद्वारि वेश्मनः ॥ १ ॥
आचम्यादि सलिलं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः ॥ २ ॥

COLOPHON इत्याशौचत्रिंशत् सम्पूर्णम् ।

180. आशौचदशकं सटीकम्

OPENING श्रीगणेशाय नमः । ॐ नमः श्रीपरमात्मने ।

विज्ञानेश्वरविरचितमुनिजनवाक्यैर्मिताक्षरामध्यात् ।
आशौचदशकवृत्तिं, वदति हरिर्हरिहरो नत्वा ॥ १ ॥

अत्र तावत् श्रीविज्ञानेश्वरयोगीन्द्रः चतुर्वर्णलोकस्य जन्मनि सूतौ भवं सूतकं मरणे शवे भवं शावं सूतकं शावसिद्ध्यर्थं वृत्तदशकं शार्दूलविक्रीडितेन चकार । तत्रादिवृत्तम्—

COLOPHON इत्याशौचदशकभाष्यं श्रीहरिहरविरचितं समाप्तम् ।

Post Colophonic संवत् १७१५ वर्षे फल्गुनमासे शुक्लपक्षे ७ भृगुवासरे लिखितं वैश्यात्‌ नारायण-दास पठनार्थं त्रिपाठी शिवराममुत काशीदास ।

181. आशौचनिर्णयः सटीकः

W OPENING षण्मासाभ्यन्तरे तु स्वपुरुषनिहिते गर्भमात्रे विनष्टे,
माता तन्मासरात्रा समदिनमशुचिः स्नानशुद्धाः सपिण्डाः ।
अन्त्ये मासद्वये तु त्रिदिनमशुचयोऽतः परं सूतिवत् स्यात्—
च्चातुर्वर्ण्यस्य तुल्यं भवति वयसि यत् प्रोच्यते शौचमात्रम् ॥ १ ॥

W-CLOSING : दत्त्वा पिण्डं सपिण्डाः परस्ववहन्नम्नापकादच वर्जित्वा,
सद्भेमचारि धाम्य प्रशमितमनसो निम्बपत्रं विदश्य ।
आचम्याम्यग्नदूर्वावृषभशरसभानश्मनान् गोमयञ्च,
स्पृष्ट्वा सिद्धार्थतैलाभ्यय दृषदि पदं न्यस्य सर्वे विशेयुः ॥ १० ॥

श्रीगणेशाय नमः। श्रीमते गोपिजनवल्लभाय नम।

नत्वा गणेश्वरं देवं, शारदां गुरुमात्मनः।
आशौचनिर्णयं निशच्छ्लोक्या व्याख्यां करोम्यहम् ॥ १ ॥

तत्र स्मार्त्तक्रममुल्लंघ्य लोकप्रसिद्धमनुस्मरन् गर्भविपतिनिमित्तमाशौचं प्रतिपादयति—

CLOSING

इति सम्मृत्य गच्छेयुः, गृहं बालपुरः सदा।
विदस्य निम्बपत्राणि, नियताहारि वेश्मनः ॥
आचम्याग्न्यादिसलिलं, गोमयं गौरसर्षपान्।
प्रविशेयुः समालभ्य, कृत्वाश्मनि पदं शनैः ॥ इति ॥ ३० ॥

COLOPHON:

इति सव्याख्या त्रिंशत्श्लोकी समाप्ता।

Post-Colophonic

संवत् १६२= ना पौष वदी ५ वार चन्द्र लखित शास्त्रि छोटु नाहाना शास्त्रि नुं पुस्तक छे।

182. आशौचनिर्णयः

OPENING:

श्रीगणेशाय नम। श्रीसरस्वत्यै नम। श्रीगुरुभ्यो नम।

गणाधिपं नमस्कृत्य, प्रत्यूहाद्रिपविं नविम्।
त्र्यम्बकेणावबोधाय, क्रियते शौचनिर्णय ॥ २ ॥
अर्थतः शब्दतश्चेह, पौनरुक्त्यं न दुष्यति।
स्फुटबोधाय बालानां, ग्रन्थोऽयं रच्यते यतः ॥ २ ॥

CLOSING

अत्र मूलवचनानि मिताक्षरा-माधवादीनि निबन्धेभ्यो ज्ञेयानि। विस्तरभयाद् बालानां दुरधिगमत्वाच्च न लिखितानि।

CLOPHON

इति नारायणात्मज-रघुनाथपण्डित विरचिताशौचनिर्णय समाप्त।

183. आशौचनिर्णयः

OPENING

श्रीगणेशाय नमः।

अथ प्रेतश्राद्धे नवश्राद्धे·············· मार्गे विश्रामस्थाने चैकोद्दिष्टं भवति। सञ्चयनस्थाने तृतीये चतुर्थे दिने एकोद्दिष्टकार्यं। अथ प्रथमे चतुर्थे पञ्चमेऽष्टमे नवमे दशमे चैकादशे च युग्मदिने नवश्राद्धानि कुर्यात्।

CLOSING:

एवं कृत पुनरागते तदा त घृतकुण्डे निमज्य जातकर्मादिसंस्कारान् कृत्वा पूर्वपत्न्या सह विवाहः कार्यं।

COLOPHON:

इति कालनिर्णयावबोधे आशौचप्रकरणं। सम्पूर्णं। समाप्तः।

OPENING & CLOSING

184. आशौचनिर्णयः

As at no 182

COLOPHON

इति श्रीमदङ्गिरसमुद्गलकुलजलधिमुधांशु-पदवाक्यप्रमाणपारावारपारीण-याज्ञिकशिरोरत्न नारायणात्मजरघुनाथसूरिसूनु त्र्यम्बकपण्डितरचिताशौचनिर्णयः। समाप्तोऽयं ग्रन्थः।

Post-Colophonic　　सवत् १६२४ ना म्राश्विनशुद्धपक्षे च पञ्चमी वार चन्द्रवासरे लखु छे। मास्तीय मनतेन लिखित। शास्त्री जगन्नाथ रणछोड इद पुस्तकम्।

185. आशौचनिर्णयः

OPENING & CLOSING.　　श्रीकृष्णाय नमः

As at no 184

COLOPHON :　　इति आङ्गिरसमुद्गलजलधिसुधांशु-पदवाक्य(प्र)माणपारावारपारीणायमज्ञक-शिरोरत्न नारायणात्मज-रघुनाथसूनुत्र्यम्बकपण्डित-विरचितो आशौचनिर्णय समाप्त-

Post-Colophonic　　सवत् १६०६ माहा शुदि १३ शनउ। लिखित दवे श्री ५ गदाधरसुत डुगरजी वेन्य लिखित। भाई मयाशंकरपठनार्थम्।

186. आशौचनिर्णयः

OPENING & CLOSING　　श्रीगणेशाय नम।

As at no 184

CLOPHON　　इति नारायणात्मज-रघुनाथपण्डितविरचिताशौचनिर्णय समाप्त।

Post-Colophonic　　इति सदाशिवा जोशियात्मज रामचन्द्रेण लिखितम्। आजलेश्वर। शके १७५० विकारी नाम सवत्सरे गुजराथे सपरणा समाप्तम्। वैशाख शु० ८ सौम्यवासरे दो प्रहरास समाप्तम्।

194. आशौचाष्टक-व्याख्या

C: -OPENING　　श्रीगणेशाय नम।

अथाशौचाष्टकस्य व्याख्या—'नाम्न प्राक्०'। नामकरणात् प्राक् मृतश्चेदृत्विज् दीक्षितब्रह्मचारिवर्जिताना ज्ञातिनामाप्लवः स्नानमित्यर्थ-।

C: -CLOSING·　　अथ जननाशौच वदयामः। एकोदकानि दशपिण्डा। ज्ञानयन्नेषामपि त्रिदिनमाशौच भवेत्। पिण्डनाशो सप्तमात् पञ्चमाद् वा पुरुषादर्वाचीना दशाहेनैव शुद्धि। प्रतिशान्ते श्रुत चेत् सद्यः। द्वयदिने सति तावेति पूर्वस्मिन् जननाशौचे वर्तमाने सति अन्यस्मिन् जननाशौचे प्राप्ते सति प्रेताशौचवदनुष्ठेय। मातुरन्यदिति जननाशौच जनन पितृ दशाहेन गच्छति॥ ८॥

OPENING :　　इति शौचाष्टकव्याख्या समाप्ता।

Post-Colophonic·　　लि० जादवजी।

हयाब्धिनागभूवर्षे (१८४७) मधुमासि सिते दले।
बाणतिथौ भृगौ वारे लिखिताशौचपद्धतिः॥
नगराख्ये तु वसन् ग्रामे शुभदत्तुग्रजीविना।
त्रिविक्रमाख्यपुत्रेण जादवाख्येण स्वात्मना॥

198. कर्मप्रदीपभाष्यम्

OPENING (on f 10A) × × × × × × द्वितीय । इहामन्त्रणे हेयोपादेयविप्रविषयीणि वाशिष्टादिस्मरणानि सन्तीन्यतो नैतदुक्त वक्ष्यति । च यत इद शास्त्र गृह्यन्तेति । न चाप्युत्तमविप्रा सपत्नौ व्याधिनव्यङ्गादिदोषदूषितान् विहायाऽऽयाम मन्त्रज्ञानपिति मन्त्रयेदिति शङ्कनीयम् ।

CLOPHON (on f 132) इत्यौपासनिकश्रीमच्चक्रधरात्मजमिश्रआशादि[त्य] कृतौ कर्मप्रदीपभाष्ये तृतीयस्य षष्ठी कण्डिका ॥

CLOSING. (on f 134) × × × × × दध्नाथ पयसा वा स्यात्, घृतमिश्र पृषातकम् ।
होमकाले तु तस्याग्ने स्यानमुत्तरपूर्वत ॥

अथैतस्यासादन किमिति चेत् ? कामिकत्वात् । अस्यावेक्षणार्थमिति × × ×

200. कुण्डदीपिका सटीका

W-OPENING: कृतदितिजविनाशस्थापित स्वर्जनेश ,
स्वजनवितरिताशच्छिन्नविघ्नौघवश ।
हुतभवफणिवशस्तेजसोद्भासिताश: ,
स भवतु वरदेश शर्मणे मे गणेश ॥१॥

नत्वा श्रीविघ्नराज तदनु सुगुरुपदपङ्कजद्वन्द्वमीड्य ,
शश्वत्सद्गद्यपद्याद्यधिकतरसुधाकृश्लाघ्यकल्लोलहेतुम् ।
नानाकुण्डानि सागान्यहमपि सुगुरुज्ञातपूर्वाणि वच्मि ,
प्रत्यश्रीभीमसूनु सुमतिरभिमजो पुण्यनामा कवीन्द्र ॥ २ ॥

W. & Ct-CLOSING: अस्ति श्रीवृद्धपूर्व नगरवरमिद तत्र भीमद्विवेदी ,
पार्वत्या य स्वसूनु व्यजनयदतुल यन्मजोऽस्त्रमेनम् ।
तेनाऽय कुण्डदीप स्वमतिमनुकृत. सद्गुरूपासनाच्च ,
श्रीश प्रीणातु तेनाप्यखिलजनपिता बालवातेव तात. ॥१२२।

गुणबाणरसैकसम्मिते (१६५३), नृपतेर्विक्रमत शुभवत्सरे ।
मधुमासिताष्टमीतिथौ, मत्कृतिरस्तु समर्पिता शिवे ॥ १२३ ॥

इह निखिलविचारे न्यूनमन्यादृश वा ,
यदधिकमखिल तत् सर्वमार्यै विचार्यम् ।
उपकृतिमपरेषा सविधातु प्रवीणा ,
जगति कतिचिदस्मिन् नारदाद्याश्चरन्ति ॥ १२४ ॥

श्रीमन्मदानन्दपुरप्रकाश विराजतात् पण्डितरत्नकोशम् ।
काश्यादितीर्थेष्वधिकप्रकाश यशोभिराब्रह्मपद प्रकाशम् ॥ १२५ ॥

मज्जाता स्वकनामभिरोर्वरसुरान् सन्तर्पयन्तोऽनिशं,
न क्षीणाः कति वाक्सुधाम्बुनिवरास्ते निर्मला पण्डिताः।
तत्रोक्तेन समानतासुरदमून् क्षीराब्धिमित्य हरन्,
कीर्त्या योऽमलया हरेन जयतान् कौशल्यवशादिचरम् ॥ १२६ ॥

भारत्या कुचकुम्भसम्भृतसुधासारैर्निषिक्ता बहु-
प्राप्तोच्छ्रायविदग्धभूरुहवरा यत्रान्ववाले पुनः।
स्वग्रन्थप्रसवैः सुगन्धिमरसैस्तत्सादयन्ते मुदं,
श्रीमद्भार्गवजो जय स लसता कौशल्वय कीर्तिमान् ॥ १२७ ॥

तत्रान्वये स्फुटतरेहकारमात द्विजान्वयक्षीरमहोदधिचन्द्रात्।
मत्वीतिविद्याततदिवक्लापात्. जनार्दनोऽभू[त्]स्मृतिवेदसिन्धुः ॥ १२८ ॥

तत्सूनुर्भीमनामा गुणिगणगणनारम्भगण्याग्रगण्यो,
य पावन्या च सूनु व्यजनयदतुल द मजोमतमोडयम्।
तेनाब्जे(ब्दे)सप्तबाणेन्द्रियसुगणिमिते कृष्णपक्षे नभस्य-
स्यैकादश्या कृतस्य स्वमननुरचिता कुण्डदीपस्य टीका। १२९ ॥

Ct-OPENING

श्रीगणेशाय नमः।

विश्वेशं भूधराधीशदुहितुर्दान्नधारिणम्।
वन्दे कर्पूरगौराङ्गं शशिलेखाशिखामणिम् ॥ १ ॥

नानासन्मुनिवाक्यसम्मतिमतं सदर्शनाय स्फुटं,
टीका कर्तुमुपक्रम प्रकुरुते सद्भीमसूनुर्मजो।
मद्विद्या गुरुपादपङ्कजरज श्रीगाप्रिमसवनात्
प्राप्य स्वप्रतिपादितस्य सुमति कुण्डप्रदीपस्य च ॥ २ ॥

इह खलु सकलशिष्टाचारपरिपालनाय कविरिष्टदेवतानमस्कारस्य निर्विघ्नग्रन्थ-परिसमाप्तिकामस्तावन्मङ्गलमाचरति—

COLOPHON: इति श्रीद्विवेदी भीमसूनु-मजी कृता स्वकृतकुण्डदीपटीका समाप्ता।

Post-Colophonic: सवत् १८३० ना वर्षे माघमासे सिते पक्षे पञ्चमितिथौ मन्दवासरे मोरबी-मध्ये मामाजी श्री ५ देवकृष्णात्मज-जयरामानुज-धनेश्वर-गृहे लिखित द्विवेदी दवे श्री केशवजीभवा धनेश्वरेण आत्मविलोकनार्थं। श्रीकल्याणमस्तु।

सवत् १८३० ना मार्गशीर्षमासे कृष्णपक्षे षष्टी पर सप्तमी रविवासरे रात्रिगत-घटी १० समये भस्मदुर मोना श्री ६ जगजीवन श्रीकृष्णस्मरण स्वयमेव कुर्व(न्) सन् श्रीजीना चरणारविन्द पामा ॥

201. कुण्डदीपिका-विशेषवचनानि

OPENING:

श्रीगणेशाय नमः।

अथ कुण्डदीपिकाया विशेषवचनानि लिख्यन्ते—

कुण्डवरणमण्डपे स्थण्डिलमाह—कुण्डाज्ञानेति। तथा वासनीयसंहितायाम्—

अयाग्निकार्यं वक्ष्यामि कुण्डे वा स्थण्डिलेऽपि वा ।
वेद्यां वाप्यायसे पात्रे मृण्मये वा नवे शुभे ॥ १ ॥

अथ विकल्प. । तथा च क्रियानारे०—

CLOSING

राहो वृत्तार्द्धक्षेत्र तस्य व्यास अ० ५।५ क्षेत्रफल अ० २५। केतो ध्वजाकारक्षेत्र दीर्घत्रिकोणे पार्श्वद्वये प्रत्येक अ० ७।७।५ तिर्यक् भुजे अ० ७।१।२ क्षेत्रफलं अ० २५। राहो शूर्पाकारपक्षे पार्श्वद्वयप्रत्येक अ० ५।४।५ उपरि अ० २।४ अग्राङ्गुल ७।४ क्षेत्रफल अ० २५। इति सम्पूर्णम् ।

202. कुण्डनिर्माणं सटीकम्

W OPENING
CLOSING

इष्टापूर्त्तं त्वङ्गमाद्य यदाहुर्यस्योनरवाधिक्यतो भूरिदोषा ।
कुण्ड साङ्ग भूरिभेद तदत्र ब्रूते रामो नैमिपस्थो विचार्य ॥ १ ॥

ॐ नमो गणेशाय ।

Ct OPENING

सूनो श्रीवरमालवस्य शिवदासाख्यादुरख्यातिन ,
सम्राडग्निचिदापयस्य जनक श्रीसूर्यदासोऽजनि ।
यन्मातुर्यशसा दिशो दश विशालाक्ष्य[व] लक्ष्या सृज-
त्येष स्वाहितकुण्डलक्षविहृति समावमन्नं मिये ॥ १ ॥

शिष्यबुद्धचनुकूलनाय प्रयोजय(न) वर्णयश्चिकीर्षित प्रतिजानीत —

W. & Ct
CLOSING

न्यायेन तत्त्वमवधार्य मयाऽयमर्थ-
रस्फोरित प्रकटतामुपलम्भितोऽर्थ ।
तुष्यन्तु तेऽमु सुधिय कुमतिस्त्वयोग्य ,
किं कामिनीरतिकथाधिकृतो विवर्ण ॥ ७२ ॥

श्रीमद्रत्नपुराधिपेन महित श्रीरामचन्द्रेण यो,
भारद्वाजकुलाम्बुधेर्विधुरिव श्रीमज्जनार्दनद्विजः ।
तत्सूना परिणीतनेऽभ्युपगतोऽसौ मालवो नैमिष ,
तेनर्ग्वेदविदेरितेन रचिना रामेण कुण्डासिस ॥ ७३ ॥

रसगगनतिथिप्रमाणवर्षे (१५०६) मनवति विक्रमभूमिपस्य कालात् ।
ऋतुविधिफलदायके मखे ज्ये कृतिरियमस्तु ममार्पिता सुरेशे ॥ ७४ ॥

COLOPHON

इति श्रीनैमिपस्य रामवाजपेयकृती स्वकृत कुण्डनिर्माणश्लोकवृत्तिः समाप्तम् ।

210 कुण्डाहृतिः

OPENING
& CLOSING

ॐ श्रीगणेशाय नम ।

(same as no 202)

COLOPHON

इति श्रीनैमिषवास्तव्य-रामचन्द्रविरचिता कुण्डाहृति समाप्त. ।

Post Colophonic

सवत् १६४३ वर्षे द्वितीयवैशाखमासे शुक्लपक्षे १४ दश्या तिथौ बुधवासरे लाठी-स्थानात् । उदीच्यजातीय । भट श्रीकान्हाजीसुत मरावन्नेन लिखितम् ।

211. गायत्री-छन्दोरूप-व्याख्या

OPENING   ॐ भूर्भुव स्व तत्सवितुर्वरेण्य भर्गो देवस्य धीमहि धियो यो न प्रचोदयात्। इति सूत्रम्। ओमिति गायत्री छन्दोरूप। परब्रह्मयोनीरूप नादविन्दुकलात्मक नित्यमस्ति।

CLOSING:

मन्त्राणा पल्लवो वामो मन्त्राणा प्रणव शिरः।
शिर पल्लवसयुक्त मन्त्रकामदुघोपमम ॥ १ ॥
सन्ध्यासन्धि न जानाति विमर्थ क्षिपते जलम्।
या सन्ध्या समरसीभूता सा सन्ध्यासन्धिरुच्यते ॥ २ ॥
निरक्ती तु सा सन्ध्या कुशवारिविवर्जिता।
निर्मलज्ञानसयुक्ता सा सन्ध्यासन्धिरुच्यते ॥ ३ ॥

गायत्री छन्दोरूप, पद्कलारूपयुक्त वर्णमात्रानादमय त्रिकालान्वित षड्ऋतुमय इति हार्दम्।

COLOPHON: इति गायत्रीछन्दोरूप-व्याख्या समाप्ता।

220. दशकुण्डमरीचिमाला

OPENING

श्रीगणेशाय नम।
हेरम्बमम्बुजकर करिवक्त्रमीशं,
गौरीमुमा मरकताभरण दिनेशम्।
ब्रह्माजशक्रपुरन्दरशारदादी-
न्नत्वा ब्रवीमि दशकुण्डमरीचमालाम् ॥ १ ॥
श्रीमद्रामकृति चित्रामत्यर्णव दुस्तराम्।
धृत्वा विष्णु क्रमोपाय कुरुते होमवृद्धिषु ॥ २ ॥

CLOSING·

कुण्डमण्डपवेदीना वशिष्ठोद्भवविष्णुना
निरणायि यथाग्रन्थ सक्षिप्त सुखबोधने ॥ ५६ ॥

COLOPHON: इति कुण्डमण्डपादिलक्षण सम्पूर्णम्।

Post Colophonic   सवत् १८२७ ना मार्गशीर्षशुक्लतृतीया भौमे लि० दवे केशवस्यात्मजेन धनजी।

224. दानचन्द्रिका

OPENING:

श्रीगणेशाय नम
प्रणम्य मातर गङ्गा भैरव वनमकरौ।
महादेवाख्यपितर श्रौतस्मार्तविशारदम् ॥ १ ॥
दिवाकरेण सुधिया सारमुद्धृत्य शास्त्रतः।
शिष्टाना तन्यते तुष्ट्यै दानप्रदीपचन्द्रिकाम् ॥ २ ॥

COLOPHON:

कालोपनामरामेशभट्टसूनो. सुधीमन।
महादेवद्विजार्यस्य सूनुना प्रभविष्णुना ॥ १ ॥

विद्याकरेण रचिता दानसंक्षेपचन्द्रिका।
गिरिजाजीतितुष्ट्यर्थं मुद वितनुतात् सताम् ॥ २ ॥ इति।

विद्वत्प्रार्थना—
अदृष्टदोषान्मतिविभ्रमाद्वा यदर्थहीन लिखित मया यत्।
तत्सर्वमार्यं परिशोधनीय कोप न कुर्यात् खलु तन्यकस्य ॥ ३ ॥

किञ्च—
शास्त्रकर्त्ता भवेद् व्यासो लेखको गणनायक.।
तयोर्वै चलिता बुद्धिर्मनुष्याणा च का कथा ॥ ४ ॥
लिखनपरिश्रमवेत्ता भुवने विद्वज्जनो नाऽन्यः।
सागरलङ्घनखेद हनुमानेकः पर वेत्ति ॥ ५ ॥

COLOPHON. इति काश्या श्रीमत्कालोपनामक-भट्टरामेश्वरात्मज-भट्टमहादेवद्विजवर्यसूनुना बालभट्टानुज-भट्टदिवाकरविरचिता दानचन्द्रिका समाप्ता।

228. द्विजवदनचपेटा

OPENING श्रीसरस्वत्यै नम।

अथ अश्वघोषा भिक्षवो द्विजवदनचपेटाद्वितीयाभिधान वज्रसूची नाम प्रकर्ण (रण) चिकीर्षवः प्रमाणरूप देव नमस्कुर्वन्ति—
श्रुतिर्विभिन्ना स्मृतयोऽपि भिन्ना नैको मुनिर्यस्य वच प्रमाणम्।
धर्मस्य तत्त्व निहित गुहाया महाजनो येन गत सा पन्था ॥ १ ॥

CLOSING
चतुर्वेदोऽपि यो भूत्वा चाण्ड कर्म समाचरेत्।
अब्रह्मचारी हिंसावाश्चाण्डाल सर्वजातिषु ॥
ब्रह्मचर्यतपोयुक्ता. समलोष्टककाञ्चनाः।
सर्वभूतदयावन्तो ब्राह्मणा. सर्वजातिषु।
अस्माभिरुक्त यदिद द्विजाना मद निहन्तु हतबुद्धिकानाम्।
गृह्णन्तु सन्तो यदि युक्तमेतत् मुञ्चन्तु चायुक्तमिद यदि स्यात् ॥

COLOPHON. कृतिरिय बौद्धभिक्षु-पण्डिताश्वघोषस्य।
इति द्विजवदनचपेटा नाम द्वितीयाभिधानयुक्त वज्रसूची-प्रकरण समाप्त ॥

Post Colophonic. सवत् १८८७ फाल्गुनकृष्ण १० दशम्या चन्द्रवासरान्वितायां मगनीरामेण अलेखि कृष्णगढमध्य। स्वाध्ययनाय। श्रीरस्तु। लेखकपाठकयो शुभ भूयात्। श्री। श्री। श्री। श्री। श्री। श्री। श्री। श्री। श्री।

229. नवरात्रनिर्णयः

OPENING श्रीकृष्णो जयति।

अथ नवरात्रे प्रतिपन्निर्णय। निर्णयो नाम विप्रतिपन्नाना वाक्याना विरोधपरिहारस्तत्त्वदर्शनरूपस्तदुक्तम्।

सत्त्वे विप्रतिपद्यमाना. वाक्यानामितरेतरम् ।
विरोधपरिहारोऽत्र, निर्णयन्तत्त्वदर्शनम् ॥

इति । तत्र व्रतस्य स्प स्कन्द-मार्कण्डेय-भविष्योत्तरेषु दर्शितम् ।

CLOSING : इत्याद्यष्टम्यामर्द्धरात्रे दशकर्म कृत्वा महिषघातनं कृत्वा नवम्यां बलिं दत्वा दशम्यां प्रेषयेदिति । तद्वज्जे पूजार्थत्वेन यजशब्दस्य पूजनार्थत्वेन व्याख्येयम् । पूर्वविशेषवाक्यविरोधात् । वाक्यान्तरेऽपि अष्टम्यां पूजा च विहिता । काले कर्म समारब्धमकाले च समाप्यत । इति ।

COLOPHON इति श्रीगोविन्दार्णवे आश्विननवमी-निर्णयः ।

श्रीरस्तु । शुभं भवतु ।

अक्षरमात्रपदस्वरहीनं व्यञ्जनसन्धिविवर्जितरेफम् ।
साधुभिरेव समं क्षमितव्यं कोऽत्र न मुह्यति शास्त्रसमूहे ॥ १ ॥

श्री । श्री । श्री । श्री । श्री । श्री । श्री ।

232. निर्णयोद्धार-विशेष-तिथिनिर्णयः

OPENING श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

स्मृत्यर्थ(थ)सार(र)हेमाद्रि माधव निर्णयामृतम् ।
कौस्तुभं निर्णयसिन्धुं च स्मृतिदर्पणमादरात् ॥ १ ॥
निर्णयोद्धृतं सारं मुक्तोद्धारं करोम्यहम् ।
राघवो विदुषां प्रीत्यै निर्णयोद्धारनामकम् ॥ २ ॥

CLOSING फाल्गुनकृष्णप्रतिपदि श्वपचस्य स्पृष्ट्वा स्नायादिति निर्णयसिन्धुः, तद्दिने प्रातः होलाकाभूमिं विभूतिं च वन्देत् । तथा चूतकुसुमप्राशनं कुर्यात् । इति फाल्गुनः । मध चैत्रकृष्णाष्टम्यां जानक्या उत्पत्तिः ।

COLOPHON . इति श्रीराघवभट्टकृते निर्णयोद्धारविशेषतिथिनिर्णयः सम्पूर्णः ।

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यत(ते) ॥ १ ॥

शुभं भवतु । श्री । श्री । श्री

241. भट्टोजी-दीक्षितानां पद्यानि

OPENING : श्रीगणेशाय नमः ।

भीमेऽर्के भृगुजे महाग्रहनिशा सम्भ्रमनद्गाहया,
नन्दा जन्मदिनेषु मध्यितजने नो तर्पणं स्यात्तिलैः ।
नोद्वाहव्रतचौलदर्शिषु समार्द्रेविमासम्यमान्,
नो कुर्वीत मतौ महागजघातुन्याह्नीदर्शिषु ॥ १ ॥

CLOSING

वेदीमार्जनसेकबर्हिरय शुचती च पिण्डा जना-
म्याङ्गी वास उपस्थिते स्मयजुपा कर्जं परेतश्रुति ।
कृत्वा प्रोक्षितगोत्रवृद्धिकयन स्वस्त्ययरण दक्षिणा,
धोराशिर्ग्रहपानचालनविसर्गामावरा मग मे ॥ १४ ॥

COLOPHON: इति भट्टोजिदीक्षितानां पद्यानि ।

Post-Colophonic. सवत् १८६२ ना अशाढ वद १० रवे उ लिखितग दवे श्री ५ डोसा सुत पुरुषोत्तम ॥

246 रुद्रसूत्रम्

OPENING

श्रीगणेशाय नम ।

अथ पराशरबौधायनादिप्रोक्त [वि] धिना जपेत् शिवसकल्प पुरुषसूक्त उत्तरनारायण अप्रतिरथ विभ्राडिति पञ्चागमन्त्रान् जपित्वा षडङ्गमन्त्रानित्येके तिसृणा महाव्याहृतीना रुद्रस्य चादाविति ।

CLOSING जपान्त इमा रुद्रायेति जप निवेद्य द्राप इत्यष्टाङ्ग प्रणम्य विकिरिद्रेति विसृज्य शिवरूपो विहरेच्छिवरूपो विहरेत् ।

COLOPHON इति रुद्रसूत्रे प्रथमोध्यायेः ।

श्री । पञ्चदिनपक्षमाह । प्र० ।११। द्वि० २२ तृ० ३३ । च० ४४ । प० ११ । अनन्तरहोम । ऋत्विक् ११।११।२२।३३।४४।११।१२१।

Post Colophonic सवत् १९१८ असाड वदि २ मोमे । लि० दवे लिलाधरसुत रेवाशकरेण स्वार्थं ।

254. शिक्षापत्री सार्थ

W OPENING

श्रीकृष्णाय नमो नम ।

अथ शिक्षापत्री लिख्यते । श्लोकः—
वामे यस्य स्थिता राधा श्रीश्च यस्यास्ति वक्षसि ।
वृन्दावनविहार त श्रीकृष्णं हृदि चिन्तये ॥ १ ॥
लिखामि सहजानन्द स्वामी सर्वान्निजाश्रितान् ।
नानादेशस्थितान् शिक्षापत्रीं वृत्तालयस्थितः ॥ २ ॥

W-CLOSING:

शिक्षापत्र्याः प्रतिदिन पाठो स्याम उपाश्रितैः ।
कर्त्तव्योऽनक्षरज्ञैस्तु श्रवण कार्यमादरात् ॥ २०७ ॥
वक्त्रभावे तु पूजैव कार्याऽस्याः प्रतिवासरम् ।
मद्रूपमिति मद्वाणी मान्येय परमादरात् ॥ २०६ ॥
युक्ताय सम्पदा दैया दातव्येय तु पत्रिका ।
आसुर्या सम्पदाढ्याय पुसे देया न कर्हिचित् ॥ २१० ॥
विक्रमार्कशकस्याब्दे नेत्राष्टवसुभूमिते ।
वसन्ताद्यदिने शिक्षापत्रीय लिखिता शुभा ॥ २११ ॥

निजाश्रितानां सकलार्तिहन्ता सद्धर्मभक्तेरवनं विधाता ।
दाता सुखानां मनसेप्सितानां तनोतु कृष्णोऽखिलमङ्गलं नः ॥ २१२ ॥

Mt COLOPHON इति श्रीसहजानन्दस्वामिलिखिता शिक्षापत्री समाप्ता ।

Ct OPENING श्रीसहजानन्द स्वामि जे ते पोताना मत्सगि प्रत्य शिक्षापत्री ने लिखिता थका प्रथम पोताना ईष्टदेव जे श्रीकृष्ण भगवान तेनु ध्यानरूप मंगलाचरण करे छे।

Ct CLOSING अने पोताना आश्रित ज भक्तजन तेमनी जे समग्र पीडा तेना नाश करनारा एवाने धर्म सहित जनि रक्षाना करनारा एवाने पोताना भक्तजन ने मनवांछित सुख ना आपनारा एवा जे श्रीकृष्ण भगवान ते जेने अमारा समग्र मंगल ने विस्तारो ॥ २१२ ॥

Ct-COLOPHON इति श्रीसहजानन्दस्वामिशिष्य नित्यानन्दमुनिलिखिता शिक्षापत्रीटीका समाप्ता ।

255. शौचदशक-भाष्यम्

OPENING

श्रीमहागणपतये नमः ।

विज्ञानेश्वरविरचित-मुनिजनवाक्यैर्मिताक्षरामध्यात् ।
आशौचदशकवृत्तं वदति हरिर्हरिहरौ नत्वा ॥ १ ॥

अत्र तावत् श्रीविज्ञानेश्वरयोगीन्द्रश्चतुर्वर्णलोकस्य सूतकशावविशुद्धयर्थं दशकं शार्दूलविक्रीडितेन चकार जन्मनि सूतिमेव सूतकं, मरणे शवमेव शावं। तत्राद्यवृत्तम्—

मातुर्गर्भविपत्स्वथ त्रिदिवसं मासत्रयेऽतो यथा,
मासाहं त्रिषु सूतकावधिरतः स्नानं पितुः सर्वदा ।
ज्ञातीनां पतनादिजातमरणे पित्रोर्दशाहं सदा,
नाम्नः प्राक् तदपैति सूतकमथाद् भानुर्दशाहं परम् ॥१॥

CLOSING अत्र प्रसूतके न शूद्रस्य नाधिकारो न विप्रतिषेधः, त्रिंशद्दहोराद्राणेऽदैवें इति प्रचेता इव नु पूर्वकल्पे मासानुसु इति, यस्मिन् ब्रवीति शूद्र स तस्य तन् सूतकमादेशः एवंत्रिंशद्दिनामनुकल्पः। तत्र सवरणा वस्य एव ज्यायान् नाशौच तेषां यत प्रतिलोमा धर्महीना इति स्मृत्यन्तरम्। तेषां केवल प्रसूतौ मृतौ वा मलापकर्षणाय स्नानं, न शूद्रस्य प्रथमकल्पोऽङ्गीकृत इति। शूद्रो धन्यः कलिर्धन्यः इति व्यासवचनात् शूद्रधर्मकरणानादृत। धन्यः शब्दो मङ्गलवाचक इति।

COLOPHON इति शौचदशकभाष्यं श्रीहरिहरविरचितं सम्पूर्णं। शुभं भवतुः। कल्याणमस्तु। श्रीरस्तु ।

256. श्राद्धकल्पः

OPENING -

श्रीगणेशाय नमः ।

अथ नित्यश्राद्धसूत्र लिख्यते—

अथातो नित्यस्नानं नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योदकान्तं गत्वा

शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपाद कुशोपग्रही बद्धशिखी यज्ञोपवीत्याचम्योदङ्हीति तोयमामन्त्र्यावर्त्तयेदेते शतमिति ।

CLOSING अथ काम्यानि भवन्ति स्त्रियोऽप्रतिरूपा प्रतिपदि द्वितीयाया स्यात् स्त्रीजन्म । अश्वदास्तृतीयाया । चतुर्थ्यां क्षुद्रपशव । पुत्रा पञ्चम्या द्यूतर्द्धि । षष्ठ्या कृषि . सप्तम्या अष्टम्या वाणिज्य । मेकशफ नवम्या । दशम्या गाव परिचारका एकादश्या धनधान्य हिरण्य द्वादश्या । कुप्य ज्ञातिश्रैष्ठ्य त्रयोदश्या । युवानस्तत्र म्रियन्ते शस्त्रहतस्य चतुर्दश्या । अमावश्या सर्वमियाऽमावाश्याया सर्वमिति ॥ ९ ॥

COLOPHON इति श्रीश्राद्धकल्प समाप्तो वाजसनेयक ।

Post Colophonic सवत् १७३७ वर्षे शाके १६०२ प्रवर्तमाने दक्षिणायन गते श्रीसूर्ये हेमन्तऋतौ मार्गशीर्षमासे शुक्लपक्षे अष्टम्या तिथौ भृगुवासरे मभेवडीस्थितेन भ० लक्ष्मीदासेन दवे कृष्णजित्-पठनार्थं लिखितमिद श्रीरस्तु शुभ भवतु लेखकपाठकयो ।

257 श्राद्धकल्पः

OPENING श्रीगणेशाय नम. ।

अपरपक्षे श्राद्ध कुर्वीतोर्द्धं वा चतुर्थ्या यदह सम्पद्येत तदहर्ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा स्नानकानिके यतीन् गृहस्थ दन्(?वत्) साधून् वा दृद्धान् अनवद्यान् स्वकर्मण्यानभावेपि शिष्यान् स्वाचारान् श्यावदन्तविन न व्याधितव्यगिदिचत्रिकुष्टिकुनखिवर्जं अनन्वेन आमन्त्रितोनापक्रामेद् आमन्त्रितो वान्यदन्न न प्रतिगृह्णीयात् ।

CLOSING asat No 256

COLOPHON इति श्रीकात्यायनकृतश्राद्धकल्प. समाप्तो वाजसनेयिक ।

Post -Colophonic सवत् १८७६ ना मार्गशीर्षमासे कृष्णपक्षे चतुदश्या गुरौ लिखित आचार्य श्यामजी-सुत देवनन्द ।

274 सन्ध्यातत्त्वविवरणम्

OPENING श्रीगणेशायनमः । ॐ नमः ।

जयति गिरिशबाल. स्वर्णमाणिक्यमाल ,
स्फुरदुरसि विशालः स्फारसिन्दूरभाल ।
नटकनिकटताल. प्रोल्लसत्कान्तिजाल ,
सकलदुरितकाल सर्णरक्तप्रवाल ॥१॥
य वेदत्रितय सदा निगदते कालत्रयस्थायिन ,
लोकाना नितयस्य येन भवति प्रायादवस्थात्रयम् ।
य वर्णा त्रिगुण त्रयोऽपि निपुण ध्यायन्ति सन्ध्यात्रये ,
त भास्वन्तमनन्तमोपनिषद भक्त्या मुहुर्नौमिये ॥ २ ॥
हरन्त ससार निगमवनसार त्रिजगता ,
सदाधार पार स्थितिनिलयनारम्भजरुषे. ।

उदार सदार समुपहितहार हृदि परं,
भजे वार वार मदनसुकुमार रघुपतिम् ॥ ३ ॥
आलोच्याप्यखिलश्रुतिस्मृतिपुराणाद्यर्थनिर्णायक,
भाष्य वेदवचोऽर्थसशयसमुच्छेदाय दृष्ट्वा मुहु ।
विद्वल्लोकहितावनामतगिरामाराधमत्याहित,
सन्ध्यानस्वनतिस्फुट प्रकुरुते रामाश्रमाख्यो यति ॥ ४ ॥

CLOSING

विप्रस्पन्दमखिल सुनिर्मल वेदशास्त्रसुविचारमङ्गुलम् ।
प्रार्थयामि सतत हि केवल नाऽधिकोऽस्ति रचितो हि दैवतम् ॥ १ ॥
बीजब्रह्ममहीप्रभृ[ति]मूलत्व तस्यैव शाखा श्रुति,
च्छदासि च्छदनानि पल्लवचय स्वाध्यायहोमादय ।
आचार[.]न्तवक्त्रपरच कुसुम ब्रह्मावबोधः फल,
सन्ध्यामूलमुदाहरन्ति कृतिनो भूदेवभूमीरह ॥ २ ॥
तस्माद्वैधकृतिमोरकुठारघारात्,
सरक्ष मूलमनिश फलकामना चेत् ।
मूले गते नहि फल न दल न पुष्प
शाखाऽपि नैव न कदापि पुन प्ररोह ॥ ३ ॥
ब्रह्मा जृम्भायते यस्मिन् गायन्त्यारर्थसाधने ।
का कथाऽस्मद्विवादीना क्षन्तव्य वेदविद्द्विजैं ॥ ३ ॥
शिवरामप्रीतये न[चे]द गुह्य गोप्य प्रकाशितम् ।
न देय पाठजम्भेभ्यो मानस्ते द्विजाधमे ॥ ४ ॥
आसीत् पुरा यतिवर. किल विश्वनामो,
शिष्याश्रयोऽपि समभूत् ननु तस्य शिष्य ।
तस्यापि शिष्यमुकुटोऽपनि-रामचन्द्रः,
शिष्योऽपि तस्य च महादिमदेवनामा ॥ ५ ॥
शिष्यस्तदीयो गुरुपादसेवी रामाश्रमाख्यो रघुनाथभक्त ।
श्रीरामतुष्ट्यर्थं व्यलिखत् सुभाष्य सन्ध्याविवर्ण जगदर्थमेतत् ॥६ ।
सवत्यद्वाभ्रमुनिचन्द्रमिते (१७०६) वरेव्दे,
शाके च वेदमुनिवाणयुते च उर्व्याम् (१५७४) ।
·· ·············· स्यष्टमीगुरुकृष्णपक्षे,
रामाश्रमेण रचित किल शान्तिपूर्णम् ॥ ७ ॥

COLOPHON · इति श्रीमत्परमहंसपरिव्राजकरामाश्रमविरचिते सन्ध्याविवर्णं सम्पूर्णोऽयः ग्रन्थ ॥
ग्रथा० २२००

284 स्मृतिसमुच्चयाह्निकम्

OPENING ·

श्रीगणेशाय नम :
इन्द्राग्नी च यम वन्दे निर्ऋति वरुण तथा ।
वायु कुबेरमीशान ब्रह्माण विष्णुमेव च ॥ १ ॥

इन्द्राद्याश्च प्रणम्यादौ वेदशास्त्रानुसारत ।
द्विवेदिद्विनायेन क्रियते च यथाह्निकम् ॥ २ ॥

CLOSING
नमस्तस्मै भगवते वासुदेवाय वेधसे ।
वपुर्ज्ञानमय सौम्या यन्मुखाम्बुरुहासवम् ॥ १४ ॥
एतदेवात्मभू राजन् नारदाय विप्र(पृ)च्छते ।
वेदगर्भोऽभ्यधात् साक्षाद् यदाह हरिरात्मने ॥ १५ ॥

COLOPHON
इति श्रीस्मृतिसमुच्चयाह्निके पूजाविधि ।

300. आराधनाप्रयोगः

OPENING
(द्वादशाहकृत्यम्)

श्रीगणेशाय नम ।

अथ द्वादशाहे त्रयोदशाहे वा यथाचारमाराधन । तत्र प्रयोग । गुरुचतुष्टयस्य केशवादीना च प्रत्येकमेकैक इत्येव षोडशब्राह्मणपक्षमभिप्रेत्योच्यते ।

CLOSING
प्रतिमासेव माराधन सत्यब्द पार्वणोत्तर चाराधन चैवमेव । इत्य करणाशक्तौ यथाशक्ति यतीन यथाशक्ति ब्राह्मणान् आहूय पादे प्रक्षालनपूर्वक गन्धादिभिरभ्यर्च्य भोजयेदिति ।

COLOPHON
इति नागरखण्डेनुसार्याचारानुगृहीत आराधनप्रयोग

Post-Colophonic
रामचन्द्रसदाशिवात्मज जोशि आजर्लेकरेन लिखितम् । ××× शके १८४८ हेमलम्बनामसवत्सरे । भाद्रपदे मासि । कृष्णपक्षे त्रयोदश्या तिथौ इद पुस्तक समाप्तम् ।

311. ऐन्द्री शान्तिः

OPENING
श्रीगणेशाय नम ।

अथ ऐन्द्री शान्ति ।

राज्यादिवृद्धिकामेन पूजा कार्या शचीपते ।
पुण्यर्क्षदिनयोन (योग च) चन्द्रताराबलेन च ॥ १ ॥

CLOSING
हवन पूजने मन्त्रा ह्यैन्द्राग्रा स्वा पृथक् पृथक् ।
महा इन्द्रेति वा यद्वा मन्त्र सर्वसम्मत ॥ ११ ॥

COLOPHON:
इति विष्णुधर्मोत्तरे ऐन्द्री शान्ति ।

311. राज्ञः पट्टाभिषेकपद्धतिः

OPENING:
अथ राज्ञ पट्टाभिषेकपद्धतिः ।

प्रथम मातृस्थापनादिब्राह्मणवरणार्चनपुण्याहवाचनानि । आचार्यस्य उष्णीष-श्वेतवस्त्र-चन्दनमाल्योपनीत-सर्वाभरणधारण । अप्रतिरथस्वस्त्ययन । आयुष्यापराजितपठनम् ।

CLOSING

पट्टराज्ञाभिषेचन । तुरङ्गस्याभिषेचन मन्त्रेण अश्वमारुह्य मार्गेण स्वपुरभ्रमण । मुख्यामात्य मन्त्रिसांवत्सर-पुरोहितैरश्वारूढैः सह नगरस्थसर्वदेवताभिगमन पूजा-प्रणामा. । नरवाहनदर्शन । प्रकृतीना विसर्जन । दीनादिभ्योऽन्नादिदान । अमात्या-दिसन्तोषणम् ।

COLOPHON

इति राज्यपट्टाभिषेकपद्धति ।

Post Colophonic

सवत् १८३३ ना आश्विन शुक्ल १३ भृगुवासरे लि वेरा[व]जीभवा धनजिनाख्येन मोरवीमध्ये ।

317. कुशकण्डिका

OPENING

श्रीगणेशाय नम ।

अथ कुशकण्डिका लिख्यन्ते—

कुण्ड स्थण्डिल वा यथाविधिना सम्पाद्य । स्थण्डिले पञ्चभूसंस्कारान् कुर्यात् । तद्यथा—त्रिभिर्दर्भैः पश्चिमत आरम्य प्रागन्तमुदक्सस्थ त्रि परिसमुहेत् ।

CLOSING :

इति स्मार्त्ताग्निमध्ये लौकिकाग्नौ वा होमस्तदा अनेन विधिना माध्यन्दिनानां कुशकण्डिका पूर्वको प्रारम्भो कुर्यात् ।

COLOPHON

इति श्रीगदाधरभट्ट-विरचिता कुशकण्डिका समाप्ता ।

321. कृष्णजन्मोत्सवविधिः

OPENING

श्रीराधागोविन्ददेवो जयति ।

अथ श्रीकृष्णजन्मोत्सवविधिर्लिख्यते —

तत्र सप्तमीकृत्य अङ्गने स्नानवेदिका कुर्यात् । तत्र पुरो दीर्घिकाकार । लघष्ट-खात च कुर्यात् । वेद्या. कोणचतुष्टय कदलीस्तम्भानारोपयेत् । रक्तसूत्रैस्ता[ ] गन्धा सवत परिवेष्टयेत् । तदुपरि चन्द्रातप विभाव्य तद्दिक्चतुष्टये पताकारोपण कुर्यात् ।

CLOSING

ॐ स्वस्ति न· इन्द्रो वृद्धश्रवा स्वस्ति न पूषा विश्ववेदा स्वस्ति न तार्क्ष्यो विष्टेनेमि स्वस्ति नो बृहस्पतिर्दधातु । ॐ स्वस्ति इति त्रिरुच्चरेत् ततो द्यौ शान्ति-राप शान्तिरोषधय शान्तिर्वनस्पतय । शान्ति शान्तिरेव शान्ति पृथिवी शान्ति ।

COLOPHON

इति ग्रन्थ सम्पूर्ण समाप्तम् ।

325. क्रियापद्धतिः

OPENING

श्रीगणेशाय नम ।

अथ क्रियापद्धतिर्लिख्यते—

मृतस्थाने शवो नाम द्वारदेशे च पान्थक. ।
चत्वरे खेचरो नाम विश्रामे भूतसञ्ज्ञक. ॥
भूतायां साधको नाम शेरे प्रेतोऽभिधीयते ॥ १ ॥

आचमनं । प्राणायाम तार विना । अत्रावनियो अपसव्य । अमुकगोत्रस्य अमुक-प्रेतस्य निवृत्त्यर्थ षट्पिण्डविधिमहं करिष्ये ।

CLOSING

अथ कोकीलप्रोक्त मातृसयोजनविधिः । आचमन । प्राणायाम ।

× × × × × × × × प्रेताया अर्घस्य प्रथमास प्रेताया मातामह अर्घेण सह सयुज्यता सह सपु(यु)नज्मी ॥ १ ॥ अर्घस्य द्वितिया मप्रेताया प्रमातामह अर्घेण सह म० ।२। अर्घस्य सर्वाम प्रेताया वद्धप्रमातामह अर्घेण सह सयु० ।३। अर्घसयोजनवत् । पिण्डसयोजन कृत्वा ।

COLOPHON इति कोन्लिप्रोक्त मातुमयोजनम् ।

Post-Colophonic श्रीमालिज्ञाति तयाशाचारा ने पण मोशालपश छे ।

326. क्रियापद्धतिः

OPENING श्रीमरणेशाय नम ।

अथ क्रियापद्धतिलिख्यते—

आचमन प्राणायाम तार विना । अत्राद्यतिथौ० अपसव्य । अमुकगोत्रस्य प्रेतत्वनिवृत्यर्थं षट्पिण्डविधिमह करिष्ये ।

CLOSING दशाहश्राद्धविधि पारीपूर्णता । ततोत्थाय दशम्नान कृत्वा । वस्त्रस्य त्याग० ततो गृहमागत्य । प्रथमदिवस उपवास वा भोजन हविष्यान्नमेव भुजित । लेपनस्य हास्यहर्षोच्चासनोत्कृष्टवस्त्रादिचारणतैलाभ्यङ्गस्त्रिसगखटवाशयनान्यस्पर्शनादि वर्जयेयु । रात्रौ भूमौ शयीरन् । अक्षारा लवणाशन न कुर्यान् । श्रवणिकर्मपर्यन्त उपान न धार्यते । गत्त्पूरियित्वा तदुपरि नित्यश्राद्धविधि समाप्तम ।

Post-Colophonic श्री । सवत् १८८५ कारतक्सुद ७ वुधे लक्षत गदाधर ।

327. क्रियापद्धतिः

OPENING • श्रीगणेशाय नम ।

ॐ उर्ध्वदेहिक्रिया लिख्यते—

तीर्थं गत्वा । अश्वत्थसमीपे स्थानशुद्धि कृत्वा वस्त्रान् प्रक्षाल्य आतपे स्थापयेद् । एकदीप कृत्वा निर्वातस्थले निधाय । यजमान । तीर्थे गत्वा । स्नानविधि कृत्वा । अश्वत्थसमीपे आगत्य सर्वेशार्थं स्थण्डिल । १ ।

CLOSING त्रि· मासिकश्राद्धकर्ते अपसव्य । अमुकगोत्रस्य अमुकप्रेतस्य प्रतत्वे निवृत्ति. । असद्गति मृत्युविनाशः सद्गति स्वर्गलोकप्राप्तिः अप्रेतन । सव्य । अस्य मासिकश्राद्धस्यार्चनविधे सर्व परिपूर्णता । आचमन । तुलसीदल गृहीत्वा । कायेन वाचा० यस्य० ।

COLOPHON त्रियापद्धति समाप्त ।

Post-Colophonic : लखितग दवे डोसासुत पुरषोत्त म । सवत् १८५६ ना चैत्रसुद ६ गुरुवासरे ।

335. गृह्य-पद्धतिः*

OPENING श्रीगणेशाय नमः । ॐ नमो भगवते श्रीवासुदेवाय ।

अथ गृह्यसूत्रविहितानामाधानादिसर्वकर्मणा साधारणो विधिरुच्यते । तत्र आव-

---

*Acc no. may please be read 1322 in place of 1332 in the text

मस्याधानादिदश(द्य)मान्तेषु सर्वकर्मसु यजमानस्यैव वतृत्वम्। अरिविन्तरन्यानिधातान। परिसमुह्येत्यादि।

CLOSING प्रतिष्ठानमसि, ब्रह्मक्षेत्रोऽसि, अनिरसि, गान्तिरसि, मनिराकरणमसि, ब्रह्मवोध म विग्रहावात्वापि दधामि वाचात्वापि दधामीति, तिष्ठ तिष्ठ स्वरस्त्वग्रहण धारणाज्ञवधारणासक्तिमेव भव चाप्यायन्तु मङ्गानि वाक्प्राणचक्षुश्रोत्र मनोबल यन्मे श्रुतमधीत तन्मे मनसि तिष्ठतु तिष्ठतु इति।

COLOPHON इति श्रीवासुदेवविरचितायां गृह्यपद्धतौ तृतीयकाण्ड समाप्त।

Post Colophon सवत १८५७ ना वरषे चैत्रवद १३ शनिवासरे लखिता। मयेह श्रीपश्चिमखण्ड श्रीश्रीश्रीश्रीमालनानीय दु० डोलायुत पुरुषोत्तममिद वासुदवीयम।

380 पार्थिव-चिन्तामणि-प्रयोगः

OPENING श्रीगणेशाय नम।

अथ पार्थिवचिन्तामणिप्रयोगो लिख्यत। रुद्रयामले सैन्दे च—

मथात सम्प्रवक्ष्यामि प्रतिष्ठा नन्दिकस्य च।
येन यस्य विधानेन व्रतसम्पूर्णतामियात॥ १॥
सहस्र वाऽथ लक्ष वा पूजयित्वा यथाविधि।
कोटि वाऽथ विधानेन कामना वा प्रपूर्यते।
समाप्ते च व्रते राजन विनिर्माय महेश्वरम्॥ २॥

CLOSING श्रीरचेति लक्ष्मीहोम। स्विष्टकृद्धोम। नवाहुत्य। स्थापितदेवताना पुन पूजन। वास्तुस्थापन बलिदान। मण्डपाद्बहिर्दिक्पतिभ्यो बलि दद्यात। पूर्णाहुति। चिति जुहोत्यनुवाकेन घृतेन छिन्नधारया। हसमवल्प। बटुकान् कुमारिस०। ब्राह्मणो०। पूर्णपात्र। आचार्याय पूजायुक्त लिङ्ग समण्डप सवस्त्र दद्यात। मध्यान ऋत्विज दक्षिणा दद्यात। तिलपात्र घृतपात्रादि। अद्य० पार्थिवलिङ्गा वनकृत्य विधर्य० स्तु। दान्तु देवविसर्जनम्।

COLOPHON: इति द्विवेदी-मयाशङ्करेण रचित सक्षेपतो चिन्तामणिप्रयोग।

381 पुत्तलकविधिः

OPENING. श्रीगणेशाय नम.

अथ पुत्तलकविधिर्लिख्यते—दासन्धामृतो तथा विधानमाताया तथाहि गु(ग)रुड पुराणे प्रथमत विलोक्य पुत्तलकविधिलिखितम्।

CLOSING· पुत्रार्थाकृतु दर्शमूलमदन नन्दासुतिष्यो मने,
पौष्णा वारणभे त्रिपुष्करदिन न्यूनाधिमासेयने।
माम्ये द्वारपरतश्च पातपरिप दक्षकश्चान्द्रके,
मदार्कधृतमो. स्वकर्निहूते दाहोम पश(शो)लित॥१॥

पुत्तलकविधि । तत्र कालशुद्धिः । आशौचमध्ये पुन संस्कारे यथासमय(व)दिन शौच्य कालान्तरे तु शोध्यमव । सवत्सराद् ऊर्ध्वं प्रेतकार्यं उत्तरायण । तत्रापि कृष्णपक्ष तिथिनदा त्रयोदशी-चतुर्दशी दिनत्रय च वर्जयत । शुक्र-शनिवारौ वर्ज्यौ । षट्त्रिंशद्धर्मणे पुत्तलकविधि कुर्वात ।

387. प्रतिष्ठा-प्रयोगः

OPENING

श्रीगणेशाय नम ।

अथ निर्णयसिन्धुप्रतिष्ठामयूख चाऽनुसृत्य स्थिरलिङ्गार्च्चाप्रतिष्ठान प्रयोग. । तत्र तत्काला हेमाद्रौ लक्षणसमुच्चये ।

उत्तरायणगते भानौ लिंगस्थापनमुत्तमम् ।
दक्षिणे त्वयने पूज्य त्रिवर्षार्द्धे भयावहम् ॥
स्वगृहे स्थापन नेष्ट तस्माद वै दक्षिणायने ।
स्थापन तु प्रकर्त्तव्य शिशिरादौ ऋतुत्रये ॥
प्राहरपि स्थापित लिङ्ग भवद् वरदमागदम् ।

CLOSING & COLOPHON

इति श्रीज्योतिर्विदशिवदत्तसूरिसूनु भवदत्तात्मज शङ्करदत्तेन निर्णयसिन्धु प्रतिष्ठामयूखौ अनुसृत्यान्वयीकृतसर्वदेवप्रतिष्ठापनकर्त्तव्यताप्रयोग समाप्त ।

भवदत्तसुतेनेत्थ ठाकरेण द्विजन्मना ।
कृतश्रमस्तेन विभु शङ्कर प्रीयता मम ॥ १ ॥

Post-Colophonic

सवत् १८८४ मार्गशीर्षवदद्वितीया । लखित दवे गोवद्धन केशवजी स्वार्थं परोपकाराय च इति ।

388. प्रयोगदर्पणम्

OPENING

(सर्वसंस्कारपद्धति)

श्रीमहागणाधिपतये नम ।

यो वन्द्यस्त्रिदशै सदैव मम(मि)भिर्वन्द्यस्तथा योगिभि-
र्यो विघ्नौघविनाशनेऽप्यतिदृढो भाग्यप्रद भविता(ना)म् ।
यो विश्वार्त्तिहरस्तथैव सुखद साहित्यविद्यानिधि-
स्त वन्दे गिरिजात्मज गणपति वाक्सिद्धये सर्वदा ॥ १ ॥
वन्दे श्रीवैष्णवीं मूर्ति मोहिनी कुलदेवताम् ।
प्रवरायास्तट रम्ये निवासपुरवासिनीम् ॥ २ ॥
श्रीमद्गोपालपितर नारायणपितामहम् ।
श्रीगुरु शितिकण्ठाख्य पार्वतीं देवमातरम् ॥ ३ ॥
नाम्ना वै पद्मनाभस्तु दीक्षितश्रीदयान्वितः ।
तनोति विदुषा प्रीत्यै सर्वसंस्कारपद्धतिम् ॥ ४ ॥

रम्यां नवीनां सुगमां नानावाक्यसुधामयीम् ।
प्रयोगदर्पणाख्यां वै चक्रे पद्धतिमुत्त[मा]म् ॥ ५ ॥

CLOSING & COLOPHON — इति श्रीमद्दीक्षितो नारायणात्मज-गोपालसुत पद्मनाभविरचिते प्रयोगदर्पणे रजोदर्शन-शान्तिप्रकरणं समाप्तम् ।

अथ गर्भाधान रजोदर्शनात् षोडशादे रात्राणि ऋतुस्तन्मध्ये रात्रिचतुष्क पर्वादि-निषिद्धदिनानि च वर्जयित्वा तथापि युग्मासु कन्या जायेत इत्यादि, तत्राऽस्मकम' अद्येत्यादि ए० पुण्यतिथौ अस्या मम भार्याया प्रथमगर्भाति० ··

Post-Colophonic — इयं षोडशीकर्मपुस्तकं पुष्करे रामरतनसुत-नानूराम-पुरतकात् लिखितं । सं० १६१६ का भाद्रवशुक्ल १२ मगनीरामेणालेखि कृष्णगढमध्ये ।

421. रामायणप्रयोगविधिः

OPENING — श्रीकृष्णाय नमः

अथ रामानुजकल्पद्रुमोक्त रामायणप्रयोगविधि —

तत्र प्रथम कालनिर्णय, हयग्रीवो-चन्द्रतारानुकूले च शुक्लपक्षे शुभेऽहनि, आरभेत पुरश्चर्या गुरौ सुप्ते न चार्चयेत् ।

CLOSING — ततो ब्राह्मणभोजन मासनामानि यथा —

कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दन ।
उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरि ॥ १ ॥
योगीश पुण्डरीकाक्षो मासनामान्यनुक्रमात् ।

चैत्रान्मार्गशीर्षाद्वा गणनया यस्मिन् मासे जात शिशुर्भवति तत्तस्याकं मासनामेति । ज्योतिःशास्त्रे तु अवकहडाचक्रानुसारेण नक्षत्रचरणानुसारेणी । इति नामकर्म ।

426. रुद्रपद्धतिः

श्रीगणेशाय नम ।

OPENING: — अथ महारुद्रपद्धतिरुच्यते —

[ज्योति] विदुक्त शुभकाले गुरुभार्गवयो गौडबाल्यवार्धक्यरहिते यथासभव-वित्तादिना प्रायश्चित्त कार्य । तदुक्त परशुरामपद्धतौ० ।

CLOSING — तत सम्पूर्णमस्त्वच्छिद्रमस्त्विति सर्वे वदेयु' । ततस्तेषां मन्त्राशिष्ये गृहीत्वा तान् ता मुनय विसृज्य ब्राह्मणान् भोजयित्वा दीनान्धाधारवाऽन्नादिना सतोष्य स्वय सुहृन्मित्रादियुत सोत्साह सतुष्टो हविष्य भुञ्जीत इति ।

COLOPHON. — इति नारायणभट्टेन परशुरामानुसारी श्रीरुद्रपद्धति समाप्त ।

Post Colophonic. — सवत् १८२६ ना वर्षे आषाढमासे शुक्लपक्षे १५ पौर्णिमास्यायां तिथौ भौमवासरे लि० दवे श्री ५ केशवजी-तत्सुत-धनजी तथा नानापठनार्थम् ।

428. रुद्रपद्धति

OPENING.

श्रीगणेशाय नम ।

श्रीगणेश गुरु नत्वा शारदा च वरप्रदाम् ।
विप्र. परशुरामाख्य कुरुते रुद्रपद्धतिम् ॥ १ ॥
भुक्ति-मुक्ति-प्रदानार सोम सोमार्द्धधारिणम् ।
सदानन्दमय शान्त शिव वन्दे शिवप्रदम् ॥ २ ॥
पूर्वाचार्यकृती दृष्ट्वा स्मृतीश्चागमसम्मती ।
हृद्यं पद्यं मुनीन्द्रोक्तं. क्रियते रुद्रपद्धति ॥ ३ ॥
पञ्चाङ्गान् जपितान् रुद्रान् याजुर्वेद्यान् द्विजन्मनाम् ।
मद्विधाना च मुग्धाना प्रबोधाय प्रबोधिनी ॥ ४ ॥
पञ्चागसज्ञया पच रुद्रा॰ प्रोक्ता विपश्चिता ।
एकाता अतिरुद्रान्ता षडङ्गसहिता हिता ॥ ५ ॥

CLOSING & COLOPHON

ग्रन्थनिष्पन्नकाल —

सवद्विक्रमभूपस्य पञ्चदशशते गते ।
पञ्चदशोत्तरे वर्षे (१५१५) जन्माष्टम्या प्रकाशके ॥ ३९ ॥
उदीच्यज्ञातिविप्रेण मर्णपुत्रेण धीमता ।
कृता परशुरामेण महारुद्रस्य पद्धति॰ ॥ ४० ॥

इति यदिदमसूक्त सूक्तमाहोस्विदुक्त ,
तदपि मनसि धार्य द्वेषतो न प्रहार्यम्॰
दधति मुदमशोके बालकोक्ते हि लोका—
मदुपरि रमणीया मित्रता धारणीया ॥ ४१ ॥

इति परशुराम-विरचिता रुद्रपद्धति. समाप्ता । अस्मिन् ग्रन्थे ग्रन्थसख्या १०३३ ।

सरस्वत्या प्रसादेन मयाऽय ग्रन्थमु(उ)त्तम ।
कृत. परोपकारार्थं यज्ञविद्याविभूषणम् ॥ १ ॥

Post Colophonic

सवत् १८२५ ना वर्षे फाल्गुनमासे सितेतरपक्षे प्रतिपत्तिथौ श्रीगुरवासरे लि० दवे श्री ५ केशवजी-तत्सूनु धरनजी-स्वयमवलोकनार्थे ।

442. वास्तुशान्ति-प्रयोगः

OPENING

श्रीगणेशाय नम ।

अथ सग्रहवास्तुशान्तिप्रयोगः । तत्र दिनशुद्ध्यादिक निर्णये द्रष्टव्य । होमबलिदानादिकर्मादौ कृत्वाऽनन्तर गृहप्रवेश इति ग्रन्थकारा आहुः । अस्मदेशीयास्तु प्रवेशानन्तर होमादि कुर्वन्ति इत्यत्र यथाम्वाचारमनुष्ठेयम् ।

CLOSING

चन्द्रार्कावनिपर्यन्त गृहस्थि विप्रवाक्यत ।
स्वेच्छयाऽर्जितलाभसहृष्टो भुक्ष्व भोगान् सुखी भव ॥

ततो दैवज्ञद्विजाश्च दक्षिणादानादिभि परितोष्यन् ब्राह्मणैरिष्टैर्बन्धुभिश्च परिवृतो भुञ्जीत, त (तद्)दिने महान्तमुत्सव कुर्यात् ।

COLOPHON इति श्रीशुक्लविश्रामात्मज-शिवरामविरचिताया गोभिलिगृह्यपद्धतौ सुबोधिन्यां वास्तुशान्तिप्रयोग ।

Post-Colophonic लि० नविनपुरमध्ये गिरिनारायणज्ञातीयभट-नन्दवेश्वर-डोशा ।

474. श्रीसूक्तविधानम्

(श्रीकल्प)

OPENING श्रीगणेशाय नम

अथात श्रीकल्प व्याख्यास्याम । पञ्चम्या शुक्लपक्षस्य पौर्णमास्या वा वदम्बमय बिल्वसारमय स्थण्डिल विधायतेऽहोरात्रो पोषित शुचि कृतशौच समदेशे गोमयेन गोचर्ममात्र स्थण्डिलमुपलिप्य गन्ध सुमनस सप्रकीर्य हिरण्मयेन पात्रेणोदकुम्भ पूरयित्वा गन्ध सुमनसमेतस्मिन् हिरण्यवर्णा हरिणीमिति ।

CLOSING

न जातु कृपणोत्थाय श्रियमावाहयेत् क्वचित् ।
न यत् किञ्चन कामेन होम कार्य कथञ्चन ॥
महद्वा प्रार्थ्यमानेन राज्यकामेन वा पुन ।
वाच पर प्राथयिता यद्यायुक्त श्रिय जपेत् ॥

COLOPHON इति श्रीसूक्तविधानमद । श्रीहरिर्जयति

495. सर्वदेवप्रतिष्ठाविधिः

OPENING. श्रीगणेशाय नम ।

अथ सर्वदेवानां साधारणप्रतिष्ठाविधिर्लिख्यते—

ज्योतिर्विदादिष्टे सुमुहूर्ते स्नानादिकृतनित्यक्रिय पूर्वाह्णे शुभपीठाद्यासने प्रक्षालितपाणिपादो बद्धशिखा आचान्त समुपविश्य देशकालौ सकीर्त्य अमुकमूर्तिप्रतिष्ठागतया अमुकयन्त्रप्रतिष्ठागतया वा मातृ पूज्ये । इति सकल्प. ।

CLOSING ततो गुरु सम्पूज्य तद्भावे त ध्यात्वा सम्पूज्य तद्धस्तादेव मूर्तियन्त्र वा गृहीत्वा शिरसि निधाय महान्तमुत्सव कुर्यात् । यन्त्र वे(चे)ल्लिखनः सर्वसाधारणो विधि. पूर्वोक्त एव ज्ञेय । तद्दिने ब्रह्मचर्य कार्यम् ।

COLOPHON : इति शुक्ल-विश्रामात्मज-शिवराजविरचिते यन्त्रचिन्तामणौ सर्वसाधारणसर्वप्रतिष्ठाविधिप्रकानसमाप्ति ।

Post Colophonic दवे श्री ५ वेराजी जीवद्याणीना पत्र छे ।

496. सार्वदैविकी-पद्धतिः

OPENING श्रीगणेशाय नम ।

हरिं वरेण्य वरद वरेश्वर षड्र्मिषड्भावविकारवर्जितम् ।
गुणात्मबोध जगदण्डनायक नमामि देव नरसिंहविग्रहम् ॥ १ ॥

सर्वोद्यापनसोधाम यत्राभिरमल कृतम् ।
हरेश्च यस्य मान्तोन्दुजया कमलङ्कृतम् ॥ २ ॥
पञ्चरात्राणि सर्वाणि सन्निरीक्ष्य मुहुर्मुहु ।
देशिकाना मुखार्थाय प्रयत्नेन गरीयसा ॥ ३ ॥
श्रुतिस्मृतिपुराणज्ञो वेदान्तार्थोपदेशक ।
कृष्णामृतो वै भगवान ससारेष्वतिनि स्पृह ॥ ४ ॥
तस्य शिष्यो महाभागो गुरुपादाब्जवल्लभ ।
पूजामृतश्चकारेमा पद्धति सार्वदैविकीम् ॥ ५ ॥
इष्टापूर्तौ द्विजातीना धर्मौ प्रोक्तौ सनातनौ ।
तत्रेष्ट स्वर्गफलद पूर्तो मोक्षप्रद. स्मृतः ॥ ६ ॥

CLOSING

भूता[न्]भव्याश्च मनुजा स्तारयेद् रो(व्यो)मसस्थितान् ।
परा सिद्धिमवाप्नोति पुनरावृत्तिदुर्लभाम् ॥ २० ॥
य इद शृणुयान्नित्य श्रावयेद् वापि मानव ।
सोऽपि सम्पूजितो देवैर्ब्रह्मलोके महीयते ॥ २१ ॥

COLOPHON:

इति वृक्षोद्यापनविधि समाप्तः ।

Post-Colophonic

सवत् १६२६ ना वर्षे पौषशुक्लसप्तम्या मन्दवासरे श्रीरस्त । लिखितग ज्ञातिय श्रीमालिदवे श्रीलिलाधर माणजीसुत-रत्नाकर तथा रामाकर स्वार्थे लिखितमिदं पुस्तकम् । श्रीनागेश्वर जगदम्बा प्रसन्नोऽस्तु ।

509. संस्कार-पद्धतिः

OPENING

ॐ नमः । श्रीमहागणपतये नम ।

श्रीनृसिंह शिव नत्वा सदम्बा(सदम्वा)च सरस्वतीम् ।
गणेश पितरौ कात्यायनादीन् कर्करेणुकौ ॥ १ ॥
रामाग्निहोत्रि-पुत्रस्य पुत्रो गङ्गाधराभिध. ।
परोपकृत्यै कुरुते गद्यं सस्कारपद्धतिम् ॥ २ ॥
ग्रन्थान्तराणि सवीक्ष्य यथामति मयोदितम् ।
उक्तानुक्तदुरुक्त यदत्र शोध्य तदार्यकै ॥ ३ ॥

CLOSING ·

श्री वात्स्यायनवंशभालतिलको रामोह्यभूद्भूतले,
तत्पुत्रो वसुधा निजेन यशसा दामोदरो मन्दयन् ।
तत्पुत्रो व्यदधात् त्रयोदशसु सस्कारेषु गद्यैर्न्हंजु,
विप्राणामुपकार एव निरतो गङ्गाधर- पद्धतिम् ॥ २ ॥

COLOPHON

इति श्रीगङ्गाधरी-पद्धति सम्पूर्णतामस्तु ।

Post -Colophonic

संवत् १८२२ मासे मार्गशीर्षे कृष्णे त्रयोदश्या तिथौ मन्दवारेण मयुक्तो केशवात्मजेन लिखित ।

511 संस्कारपद्धतिः

OPENING

श्रीगणेशाय नम ।

कश्यपादिमुनीन नत्वा गुरुश्चाचलदीक्षितान् ।
सर्वेषामुपकाराय कुर्वे संस्कारपद्धतिम ॥ १ ॥

COLOPHON

इति श्रीमन्महायाज्ञिक-श्रीदीक्षित-आनन्दरामकृता षोडशसंस्कारपद्धति समाप्ता।

518. स्वस्तिवाचन-कारिका

OPENING

श्रीगणेशाय नमः ।

जपेन्नामसहस्र तु दासीगोपीभिरादृतम् ।

सूत उवाच—

देवकीनन्दन शौरिर्वासुदेवो बलानुजः।

× × × × × × × × × × ×

CLOSING तस्माद् वृन्दावन गोप्यो गोविन्दनिकटे स्थिता ( )।
यथापूर्वं वै कुर्वन्ति ज्ञातपूर्वं मया मुने॥ १२६ ॥

COLOPHON: इति श्रीनारदीयपुराणे नारदेनोक्त युगलकिशोरसहस्रनामस्तोत्र सम्पूर्णम्।

Post Colophonic स० १७८० वर्षे पौषसुदि ११ गुरुवारे।

1377 वल्लभाष्टकम्

OPENING श्रीमद्वृन्दावनेन्दुप्रकटितरसिकानन्दसन्दोहरूप-
स्फूर्जद्रासादिलीलामृतजलधिभराक्रान्तसर्वोऽपि यस्वत्।
तस्यैवात्मानुभावप्रकटनहृदयस्याज्ञया प्रादुरासीद्,
भूमौ यः सन्मनुष्याकृतिरतिकरुणस्तं प्रपद्ये हुताशम्॥ १ ॥

CLOSING मज्ञानाद्यन्धकारप्रशमनपटुताख्यापनाय त्रिलोक्या-
मग्नित्वं वर्णितं ते कविभिरपि सदा वस्तुतः कृष्ण एव।
प्रादुर्भूतो भवानित्यनुभवनिगमाद्युक्तमानैरवत्य,
त्वां श्रीश्रीवल्लभेम निखिलबुधजना गोकुलेश भजन्ते॥ ८ ॥

COLOPHON इति श्रीवल्लभाष्टकं सम्पूर्णम्।

Post-Colophonic स० १८२५ प्रवर्तमाने वैशाखमासे शुक्लपक्षे १४ शनौ लिपिकृत कवीश्वर जयसालेन कृष्णगढमध्ये।

1390 विष्णु-दिव्यसहस्रनाम-स्तोत्रम्

OPENING: श्रीगणेशाय नमः

श्रीकृष्णामायन (?) उवाच—

पुराणपुरुषो विष्णुः पुरुषोत्तम उच्यते।
नाम्नां सहस्रं वक्ष्यामि तस्य भागवतोद्धृतम्॥ १ ॥

अथ प्रथमस्कन्धनामानि—

CLOSING· श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्,
राजन्यवंशदहनानपवर्गवीर्य।
गोविन्दगोपवनिताव्रजभृत्यगीत-
तीर्थश्रव श्रवणमङ्गल पाहि भृत्यान्॥ २६६ ॥

COLOPHON इति श्रीभागवतसागरसमुच्चये श्रीवेदव्यासरोक्त विष्णुसहस्रनामस्तोत्र सम्पूर्णम्।

1392. विष्णु-दिव्यसहस्रनाम-स्तोत्रं सार्थम्

OPENING श्रीगुरुभ्यो नमः । ॐ नमो भगवते वासुदेवाय ।

सर्वलोक कल्याण रै ताईं श्रीमहादेवजी पापीया नैं पावन करण की ताईं अनेक आचार मैं रहण कै ताईं धरम १ अर्थ २ कामना ३ मोक्ष ए च्यारि पदारथ पावण कैं ताईं श्रीविष्णुसहस्रनाम लोका मैं प्रवर्त्तायो छै सु कहे छैं–

श्लोक– ब्रह्मलोकादिह प्राप्त नारद भगवत्प्रियम् ।
दृष्ट्वा नत्वा समाया ते अपच्छ(च्छु) मुनयो मुदा ॥ १ ॥

CLOSING: सूत्रम्– राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनामसम तुल्य रामनाम वरानने ॥ ५५ ॥

अर्थ– राम नाम मैं ह रमे मे लिखमी इतरा नाम छै, ए नामसहस्र-समानि छै । एक श्लोक पाठ कीया सहस्रनाम रो फल छै तू सत्य करि माने । ए पाठ श्रीमहादेवजी पारवतीजी नु सुणायो ॥ ५ ।

COLOPHON: इति श्रीपद्मपुराणे उत्तरखण्डे गौरीशङ्करसम्वादे श्रीमहादेवोक्त सर्वरहस्यभूत श्रीविष्णुसहस्रनामक सपूर्णम् ।

1394. विष्णुसहस्रनामार्चनम्

OPENING श्रीगणेशाय नमः

ॐ विश्वस्मै नमः । १ ॐ विष्णवे नमः । २ ॐ वषट्काराय नमः । ३ ॐ भूतभव्यभवत्प्रभवे नम ४ । ॐ भूतकृते नमः ५, ॐ भूतभृते नमः ६ ।

X X X X

CLOSING ॐ शार्ङ्गधन्वने नमः ७, ॐ गदाधराय नमः, ॐ रथागपाणये नमः ८, ॐ अक्षोभ्याय नमः ९, ॐ सर्वप्रहरणायुधाय नमः १००० ।

COLOPHON. इति श्रीविष्णुसहस्रनामार्चन समाप्तम ।

1405. शिवाष्टक-स्तोत्रम्

OPENING ओ नमः शिवाय ।

अगस्त्यमुनिरुवाच—

अद्य मे सफल जन्म अद्य मे सफल तपः ।
अद्य मे सफल ज्ञान शम्भो त्वत्पाददर्शनात् ॥१॥

CLOSING· शिवाष्टकमिद स्तोत्र य पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ९ ॥

COLOPHON इति श्री अगस्त्यमुनिविरचित शिवाष्टक स्तोत्र सम्पूर्णम् ।

1407. श्रीमल्ललिताष्टकम्

OPENING· राधामुकुन्दपदसम्भवघर्मबिन्दु-
निर्मन्थनोपकरणीकृतदेहलक्षाम् ।
उत्तुङ्ग सौहृदविशेषवशाद् प्रगल्भा,
देवी गुणैः सुललितां ललितां नमामि ॥ १ ॥

CLOSING नन्दन्नमूनि ललितागुणलालितानि,
पद्यानि य पठति निर्मलदृष्टिरष्टौ ।
प्रीत्या विकर्षति ?]जन निजवृन्दमध्ये,
त कीर्त्तिदा पतिकुलोज्वलकीर्तिवल्ली ॥ ६ ॥

COLOPHON: इति श्रीमद्रूपगोस्वामीविरचित श्रीमल्ललिताष्टक समाप्तम् ।

1408. सरय्वष्टकम्

OPENING श्री गणेशाय नम ।
जननि ! सरयुदेवि ! स्वज्जल ब्रह्मलोकात्,
क्षितितलमुपनीत ब्रह्मपुत्रर्षभेण ।
विमलमतिवशिष्ठेनात्मनो योगसिद्धये,
रघुवरकुलहृद्यं रामगङ्गे ! प्रसीद ॥ १ ॥

CLOSING स्तोत्रमतद् ऋषिप्रोक्त सरय्वष्टकमद्भुतम् ।
य· पठेत् प्रयतो नित्य सर्वसिद्धिमवाप्नुयात् ॥ ६ ॥

COLOPHON इति श्री अगस्तसंहितायां गार्ग्योक्त सरय्वष्टक सम्पूर्णम् ।

1409. सरस्वती-षोडशनाम-स्तोत्रम्

OPENING सरस्वती महाभागे ! वरदे कामरूपिणी' ।
विश्वरूपी विशालाक्षी दे (?) विद्या परमेश्वरी ॥ १ ॥

CLOSING. या कुन्देन्दुतुषारहारधवला या श्वेतपद्मासना,
या वीणावरदण्डमण्डितकरा या शुभ्रवस्त्रावृता ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता,
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥ १० ॥

COLOPHON: इति श्रीसरस्वतीषोडशनामस्तोत्रम्

1410 सावित्र्यष्टकम्

OPENING: श्रीगणेशाय नम.
श्रीमन्मन्दमुहास्यकोमलमुखां गुञ्जितगण्डस्थलां,
माणिक्यैः खचितान्तरप्रविलसत्ताटङ्कयुग्मान्विताम् ।

कंजाक्षी कमनीयवेणिनिकरा कारुण्यमूर्ति शिवा,
सावित्री सचराचरस्य जननी वन्दे जगन्मोहिनीम् ॥ १ ॥

CLOSING. सावित्र्यष्टकमेतदर्पितमल तद्दिव्यपादाम्बुजे,
सावित्रीमनुराजकेन ग्रथित दिक्पालवर्णाङ्कितम् ।
श्रीमत्कुम्भजपादपद्मकृपया प्राप्त वर मुक्तिद,
जप्त्वा कोऽपि समस्तक्लेशनिचयैर्मुक्तो भवेन्नान्यथा ॥९॥

इतीद मतिवर्य्येण हरिदेवेन कीर्त्तितम्,
श्रीमत्कुम्भजपादाब्ज-कृपया सन्तुमर्हथ ॥ १० ॥

COLOPHON: इति श्रीपरमहंसाख्य-यति ऋषिवर्य्य-हरिदेवकृत सावित्र्यष्टक सम्पूर्णम् ।

Post-Colophon: सवत् १८७६ फा० शु० ६ म० मगनीरामेणाऽलेखि प्रजमेरमध्ये ।

1411- सूर्यशतकम् सटीकम्

OPENING: नमोऽर्हद्भ्य ।

जम्भारातीभकुम्भोद्भवमिह दधत सान्द्रसिन्दूररेणु,
रक्ताम्नक्तैरिवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्त्या तुल्यकाल कमलवनरुचेवारुणा वो विभूत्यै,
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीया. ॥१।

भानोरिमे भानवीया सावित्रा भानवो रश्मयो विभूत्यै लक्ष्म्यै भूयासु भवन्तु । वो युष्माक । कीदृशास्ते रक्ता आताम्राः । अत उत्प्रेक्ष्यन्ते-सान्द्रसिन्दूररेणु दधत इव । सान्द्रश्चासौ सिन्दूररेणुश्च सान्द्रो घनो बहुल सिन्दूररेणु सिन्दूररजस्त दधत इव धारयन्तो यथा । इत्यादि ।

CLOSING: देव कि बान्धवः स्यात् प्रियसुहृदथवाचार्य आहोस्विदार्यो,
रक्षा चक्षुर्नु दीपो गुरुरुत जनको जीवित बीजमोज ।
एव निर्णीयते य क इव न जगता सर्वथा सर्वदाऽसौ,
सर्व्वाकारोपकारी दिशतु दशशतभीशुरभ्यर्थित वः ॥ १० ॥

असौ दशशतभीशुः सहस्रांशुः वो युष्मभ्य मभ्यर्थित दिशतु यच्छतु । X X X X X तत् क इति निर्णेतुमशक्य एव सर्वथा सर्वप्रकारै सर्वदा सर्वकालमिति ॥१०० पुरुषवर्णक ।

COLOPHON: इति श्रीसूर्यशतकटीका सम्पूर्णा ।

Post-Colophon: नेत्रश्रीपरमेष्ठिषोडशमिते वर्षे च मास (से) शुचे (चौ),
पक्षे शुक्लममु शुक्लनवमीघस्रेऽपि वारेऽर्कजे ।
साहाय्याद् द्विजमोहनात्सुहरिजी नाम्नो. प्रति लेखया-
ञ्चक्रे पण्डितपद्ममन्दिरगणिविद्वन्मनोह्लादिनीम् ॥ १ ॥

1437. ईश्वरी-छन्दः

OPENING — श्रीमानापुराणी सत्य छे।

अथ ईश्वरी नो छद लिख्यो—

भावनी भावत्पदपङ्कजभ्रमरभूतसुरासुरसेवितम् ।
सुजनमानसहंसपरिस्तुतकमलयानलदा निभृत भजे ॥ १ ॥

CLOSING — रमयति किल वर्य तेषु चित्त नराणा-
मवरजवरय(म ?)स्माद् रामकृष्णेन कविना ।
म्रहन सुहृताम्य रम्यपद्यैकहर्म्यं,
स्तवनमवनहेतुर्मेत्यये विरचमात् ॥ २८ ॥

COLOPHON — इति श्रीइश्वरीछन्द स० महिपासुरमर्दिनीप्रभृतीसम्बोधन पदानि निरदन—

1442. कालिकास्तव

OPENING — गजद्रगतिगामिनी गिरिमहद्रवातन्दिनी,
महरहृदि मोहिनी स्वनिवासरसिद्धासनीन् ।
गुणत्रयविनादिनी मधुमदन सम्मादिनी,
सुरेश्वरविनोदिनी सततकालिका भावये ॥ १ ।

CLOSING — यमस्य प्रियवल्लभा द्विजहृ सदा नचरी,
महानुव रमसता वटिनटे सदा गोमिनीम् ।
भवभहृदि भासिका सगरसस्यकापूरिणी,
गिरीश्वरविनादिनी सततकालिका भावये ॥ ८ ॥

COLOPHON — इति श्रीमच्चक्रवतन कृत कालिकास्तव सम्पूर्णम् ।

Post-Colophonic — स० १८६४ कार्तिकसुदि ८ भजभर भानीरामस्य सञ्जीवस्य पठनार्थ ।

1443 कीलक-स्तोत्रम्

OPENING : ऋषिरुवाच—

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नम सोमार्द्धधारिणे ॥ १ ॥
सर्वमेतद विजानीयान् मन्त्राणामभिकीलकम् ।
सोऽपिक्षेममवाप्नोति सततं जाप्यतत्परः ॥ २ ॥

CLOSING — ऐश्वर्य त्वत्प्रसादेन सौभाग्यारोग्यसम्पद ।
शत्रुहानि परो मोक्ष स्तूयते सा न कि जनै ॥ १४ ॥

COLOPHON — इति कीलकस्तोत्र सम्पूर्णम् ।

1445. कृष्ण-स्तवः

OPENING. ओं नमः श्रीकृष्णाय ।

नवीननीरदश्यामं नीलेन्दीवरलोचनम् ।
वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणम् ॥ १ ॥

CLOSING: त्रिसन्ध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितम् ।
राजवल्लभतामेति भवेत् सर्वजनप्रियम् ॥ २ ॥
अचला भूतिमाप्नोति स वाग्मी जायते ध्रुवम् ॥ १७ ॥

COLOPHON. इति श्रीकृष्णस्तव समाप्तम् ।

1452. गङ्गास्तुतिः

OPENING श्रीगणेशाय नमः ।

मदनमथनमाराद्दालिप्य वीक्ष्य दारा
निव हृदि कृतरोषाद् धावमाना धरित्रीम् ।
इव शिवघृततारा कान्तकान्तैक्यधारा
हरतु दुरितपारावारसारान्महीयम् ॥ १ ॥

CLOSING हरिहरार्चनचिन्तचमत्कृत सुकृतिकेवलराममहीसुर ।
हरिपदाश्रितपद्मतरङ्गिणी प्रतिममर्पितवानस्रमालिनीम् ॥ २५ ॥

COLOPHON. इति श्रीज्योतिषराम केवलरामविरचिता गङ्गास्तुति समाप्ता । अत्र अनुष्टुप् छन्देन श्लोकसंख्या न्यूनपञ्चाशन्मिता ।

Post Colophonic संवत् १८३७ ।

1453. गायत्र्याख्यानम्

OPENING: श्रीगणेशाय नमः ।

अथ गायत्र्याख्यानम्—

स स्वरूपं वरेणीयं प्रार्थनीयं [च] सज्जनैः ।
शुद्धानन्देषु[मु]भिरपि यैर्यं द्वन्द्वं हि कथ्यते ॥ १ ॥
शुद्धानन्दविरक्तेन प्रार्थितं तन्मुमुक्षुणा ।
वेदान्तशुद्धावारूढं भर्गो विद्यादिवाहकम् ॥ २ ॥
तस्मिन्नपेतु प्रारब्धानुसारवृत्तिविग्रहा ।
सच्चिदानन्ददेवस्य स्वरूपं चिन्तयेमहि ॥ ३ ॥

CLOSING: सोऽहमस्मीत्युपासीत विधिना येन केनचित् ।
त विधि सर्वदा सेवे [द्] योगी परमतत्त्ववित् ॥ १० ॥

COLOPHON: इति गायत्र्याख्यान समाप्तम् ।

1457 गायत्री-व्याख्या

OPENING

श्रीगोपीजनवल्लभाय नम ।

अथ गायत्री-व्याख्या लिख्यते—श्रीकृष्ण शरणं मम ।

श्रीकृष्ण स्वात्मन॰ सर्वमुत्पाद्य विविध जगत् ।
तदासक्ताशबोधाय शब्दब्रह्माऽभवत्स्वयम् ॥ १ ॥

तत्र सर्गादिभि श्रीडन् नित्यानन्दरसात्मक ।
निजभावप्रकाशाय गायत्रीरूप उद्बभौ ॥ २ ॥

CLOSING : तस्मात् प्रणव इत्युक्तस्तस्याप्यर्थोऽयमेव हि ॥ ३४ ॥

COLOPHON इति श्रीमद्विट्ठलदीक्षिताना हस्ताक्षरेषु लिखितानि पद्यानि ।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्था प्रकाशन्ते महात्मन ॥

इति श्रुते । इत्यपि तत्रैव ।

इति श्रीमद्वल्लभाचार्यकृता गायत्रीव्याख्या सम्पूर्णम् ।

Post Colophonic स॰ १६२३ आषाढशुक्ला १२ लि॰ कवि जय ।

1471. जगदम्बा-महिम्नस्तोत्रम्

OPENING

श्रीगणेशाय नम ।

यदानन्दे लीना विधिहरिहरेन्द्रामरगणा ,
सुखाब्धौ श्रीडन्तो विदलितमया प्रापुरमृतम् ।
तदा किञ्चित्तत्व मुनिमनुजराद्यै रभिनुत ,
प्रपन्नोऽह मातस्तव विमलतेजोभिलसितम् ॥ १ ॥

CLOSING.

महिम्नाख्य स्तोत्र तव मनुसुयत्रोद्धृतियुत ,
तथा ध्यानैर्युक्त विरचितमिद स्वच्छमतिना ।
धरानन्देनाथ प्रवरपरमानन्दगुरुतो-
विद्य्या शुद्धान्त भरतनगरे विप्रलमिते ॥ २२ ॥

COLOPHON इति धरानन्दनाथकृत-श्रीजगदम्बाया महिम्नाख्यस्तोत्र सम्पूर्णम् ।

Post Colophon : सवत् १६१७ का पोषमासे शुक्लपक्षे तिथौ १ प्रतिपदाया शनिवासरे मगनीराभेणालेखि अजमेरमध्ये । ज्वालानाथस्य पुस्तकात् ।

1488. त्रिपुरा-स्तोत्रम् सस्तबकम्

OPENING

श्रीसर्वज्ञनाथाय नमः ।

ऐन्द्रस्येव शरासनस्य दधती मध्येललाट प्रभां ,
शौक्ली कान्तिमनुष्णगोरिव निरस्याहन्वती सर्वत ।

एषाऽसौ त्रिपुरा हृदि द्युतिरिवोष्णांशो सदाहस्थिता,

छिन्द्यान्न सहसापदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥ १ ॥

दूहो– जाकी सगति प्रभावतैं, भयो विश्व सुविकास।

सोई पदारथ चित्त धरो, ध्यान लीन ह्वै तास ॥ १ ॥

जो त्रिपुरा भगवती ऐन्द्रस्येव शरासनस्य कहतैं इन्द्र है स्वामि जाको ऐसो जा शरासन कहतैं धनुष इतनैं वर्षा ऋतु को धनुष ताकी जो प्रभा कहतैं ज्योति ताकौं मध्ये मध्यें ललाट दधती क० ललाटमध्य विषै धारती है। इतनैं इन्द्र धनुष की सी पचवर्णी ज्योत मेरे दोनौं भौहा वीचि धार रही है। ए तात्पर्याय पद मैं ऐंकार बीज कह्यौ।

CLOSING. & COLOPHON.

सावद्यं निरवद्यमस्तु यदि वा किं वाऽनया चिन्तया,

नूनं स्तोत्रमिदं पठिष्यति जनो यस्याऽस्ति भक्तिस्त्वयि।

संचिन्त्यापि लघुत्वमात्मनि दृढं संजायमानं हठात्,

त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवम् ॥ २१ ॥

इति श्रीलघ्वाचार्यविरचित श्रीत्रिपुरास्तोत्र सम्पूर्णम्।

अब या स्तोत्र की महिमा कहे है। कोऊ या स्तोत्र को सावद्य क सदोष कहे है, कोऊ या स्तोत्र को निरवद्य क निर्दोष कहे है। × × × × × × तेरे प्रसाद के निश्चय तैं रचित क ए स्तोत्र रच्यो ॥ २१ ॥

दूहो– सत्रहसैं अठानुवैं, माघ कृष्ण पख बीज।

सोमवार ए वचनिका, पूरण लिखी सबीज ॥ १ ॥

गछ खरतर कुल खेम के, दयासिंध के सीस।

रुपचंद कीन्हे सुगम स्तोत्र काव्य इक ईस ॥ २ ॥

ग्रंथाग्रंथ ४७५. लेखका वदन्ति तदनुसारेण मयापि कृत गणनम्।

1489. त्रिपुरास्तोत्रम्

OPENING: & CLOSING

श्रीत्रिपुरसौन्दर्यै नमः।

Same as at no 1437

COLOPHON

इति श्रीत्रिपुराछन्दसम्पूर्णम्।

Post Colophonic.

लि। गुसाई निश्चलपुरि।

1490. त्रैलोक्यमङ्गल-कवचम्

OPENING:

श्रीगणेशाय नमः। श्रीकृष्णाय नमः।

पुलस्त्य उवाच—

भगवन् सर्वधर्मज्ञ कवचं यत्प्रकाशितम्।

त्रैलोक्यमङ्गलं नाम कृपया कथय प्रभो।

CLOSING — इद कवचमज्ञात्वा भजेद् य पुरुषोत्तमम्।
शतलक्षप्रजप्तोऽपि न मन्त्र सिद्धिदायकः॥

COLOPHON : इति सनत्कुमारतन्त्रे त्रैलोक्यमङ्गल नाम कवच समाप्तम्।

1498. दत्तमहिम्नस्तोत्रम्

OPENING : दत्तात्रेय प्रपद्ये शरणमनुदिन दीनबन्धु मुकुन्द,
निर्गुण्ये सन्निविष्ट पथि परमपद बोधयन्त मुनीनाम्।
भस्माभ्यङ्ग जटाभि सुललितमुकुट दिक्पट दिव्यरूप,
सिहाद्रौ(ह्याद्रौ) नित्यवासप्रमुदितममल सद्गुरु चापि शीलम्॥१॥

CLOSING : योऽधीते नित्यमग्रे स्तनचरणयोः स्तोत्रमत्यन्तगुह्य,
कृत्वा स्वान्त निजान्त विमलतरमति स्यान्मुनीना वरेण्यम्।
कामक्रोधोऽहि(धाहि)मर्दी विदितपरपदो देवदत्तप्रसादात्,
नित्य प्रेमार्यमुक्त(वत) क्षपितकलिमल शाश्वती स्वस्तिरूपम्॥६॥

COLOPHON इति श्रीपरमहसपरिव्राजकाचार्य-श्रीमच्छङ्कराचार्य विरचित दत्तमहिम्न सम्पूर्णम्।

1502. देवीक्षमापराध-स्तोत्रम्

OPENING ॐ श्रीगणेशाय नम।

त्व काली त्व च दुर्गा त्वमसि गिरिसुता सिद्धि-लक्ष्मी शिवा त्व,
त्व माता कालरात्रिस्त्वखिलजनपदस्यानमुख्यैकहेतु।
त्व छिन्ना त्व च तारा विकटितरदना बगला हिङ्गुला त्व,
सर्व मामापराध रिपुदलदलने क्षमस्व चोग्रकाली॥१॥

CLOSING य आश्विने मासि च शुक्लपक्षे काल्योत्सवे चाष्टमी(मि)शौरिवारे।
श्रीचन्द्रदत्तेन कृतेन पर्व क्षमापराधान् कुरु चोग्रकाली॥११॥

COLOPHON इति क्षमापराधस्तोत्र श्रीचन्द्रदत्तेन कृतम्।

Post Colophonic : सवत् १८६४ कार्तिकसुदि ५ मगनीरामेणालेखि अजमेरमध्ये सेठजीकस्य उपवनेषु। गुरुवासरे।

1515. पञ्चपद्यानि

OPENING इति श्रीकृष्णविक्षिप्तमानसा रतिवर्जिता।
अनिरुता लोकवेदे मुख्यास्ते श्रवणोत्सुका॥१॥

CLOSING अनन्यमनसो मर्त्या उत्तमा श्रवणादिषु।
स मार्गविनये प्रोक्तो भक्तौ ज्ञाने विशेषत॥५॥

COLOPHON : इति पञ्चपद्यानि।

1519. पुष्टिप्रवाहमर्यादा-स्तोत्रम्

OPENING

पुष्टिप्रवाहमर्यादा विशेषेण पृथक् पृथक् ।
जीवदेहक्रियाभेदं प्रवाहेण फलेन च ॥ १ ॥
वक्ष्यामि सर्वसन्देहा न भविष्यन्ति यच्छ्रुते ।
भक्तिमार्गस्य कथनात् पुष्टिरस्तीति निश्चय ॥ २ ॥

CLOSING:

दुर्लास्ते भगवत्प्रोक्ता ह्यज्ञास्ता ननु ये पुन ।
प्रवाहेऽपि समागत्य पुष्टिर्यस्तैर्न युज्यते ॥ २५ ॥
सोऽपि तैस्तत्कुले जात कर्मणा जायते यत ॥ २६ ॥

COLOPHON

इति श्रीपुष्टिप्रवाहमर्यादास्तोत्र सम्पूर्णम् ।

1520. पुष्पस्तवराजः [कर्पूरस्तवराजः]

OPENING.

श्रीगणेशाय नम ।

कर्पूरं मध्यमान्त्यस्वरपररहित सेन्दुवामाक्षियुक्त,
बीज ते मातरेतत् त्रिपुरहरवधु नि कृतं ये जपन्ति ।
तेषा गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाच,
स्वच्छन्द ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धि गतानाम् ॥ १ ॥

CLOSING:

कुरङ्गाक्षीवृन्द तमनुसरति प्रेमतरल
वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधि ।
रिपुः कारागार कलयति च तत्केलिकलया
चिर जीवन्मुक्त स भवति सुभक्त प्रतिजनु ॥ २२ ॥

COLOPHON.

इति श्रीकर्प्पूरस्तवराज समाप्तः।

Post-Colophonic

१८१४ शुभम् ।

1521. पुष्पाञ्जलि-स्तोत्रम्

OPENING & CLOSING

श्रीगणेशाय नम ।

अथ पुष्पाञ्जलीस्तोत्र —

Same as at no 1437 and 1489

COLOPHON

इति श्रीरामकृष्णभट्टविरचित मत(प्त)विशतिपद्यपुष्पाजलिस्तोत्र समाप्तम् ।

Post-Colophonic

लिखित मुनिगुणचन्द्रे ण श्रीमेदनीपुरमध्ये । (स० १७८४ वर्षे)

1528 बलिभद्र-कवचम्

OPENING

श्रीगणेशाय नम ।

ॐ अस्य श्रीबलिभद्रकवचस्य ब्रह्माविष्णुमहेश्वरो(रा)देवता गायत्रीछन्दः आदित्य-

चक्रिणाय महाबलीप्रबन्धाय गौरवदाताय हनुमत्तान्तुदाय नघादि...रखवन्धाय हुरु हुर स्वाहा XXXXX

यद्यद्य मन्त्रवश्यानि दवनद नमोऽस्तु ते ।
महावीरस्य वीरोऽयं हन च मुञ्च (ला) त्वम् ॥ १ ॥

CLOSING मद्यचमिन कुल लम्नाब प्रमाएन प्रयो(गो)भवेत् सिद्धिमन्द[सिद्धि मन्त्री] दाक्षिण प्रार्थयेत् । मलयागिरचदन मेलि गहूड धूप जनार्दन दीप घृत मा नीर । नैवेद्यमनन्तमी लक्ष मन्पूर्णम् ।

1533, बृहस्पति-स्तोत्रम्

OPENING: बृहस्पतिः सुराचार्यो दयावान् शुभलक्षणः ।
लोकत्रय... श्रीमान् सर्वज्ञः सर्वकोविदः ॥ १ ॥

CLOSING यः पठेत् प्रातरुत्थाय शुचिर्भूत्वा समाहितः ।
अप्रीतोऽपि भगवान् सुप्रीतिः तस्य जायते ॥ ५ ॥

COLOPHON इति बृहस्पतिस्तोत्रम् ।

1534 भक्तिवर्द्धिनी-स्तोत्रम्

OPENING: यथा भक्तिः प्रवृद्धा स्यात् तथोपायो निरूप्यते ।
बीजभावे दृढे तु स्यात् त्यागाच्छ्रवणकीर्तनात् ॥ १ ॥

CLOSING इत्येवं मनोनिश्चयं सुवस्य निरूपितम् ।
य एतत् समधीयीत तस्यापि स्याद् दृढा रतिः ॥ ११ ॥

COLOPHON इति भक्तिवर्द्धिनीस्तोत्रम् ।

1537. भगवती-पुष्पाञ्जलि-स्तोत्रम्

OPENING & CLOSING श्रीगणेशाय नमः ।

अथ पुष्पाञ्जलि लिख्यते—

Same as at no. 1437, 1459 and 1521

इति श्रीपुष्पाञ्जली सम्पूर्णम् ।

1545. भारती-स्तोत्रम्

OPENING: अथ भारती को स्तोत्र लिख्यते—

त्रिगुणगौरवनवनन्दघनानन त्रिकुलपर्वतिनन्दनानम् ।
त्रिलोकमार्गविवेकमहोदय नवति पञ्चविनायकदर्शनम् ॥ १ ॥

छन्दमनवदय—

विन्दुवारदचन्द्रनिभानना मृगमदी मति मञ्जनलोचना ।
दात्त्वनुरागमदता परा हरतु नो दुर्गति दुर्दिन भारती ॥ २ ॥

मुनिविलोचनमानमहीसमे नभसि मासि तिथौ प्रतिपद्रवौ ।
धिजवरा न चर स्तवन गिरि स्तुतिमनोद्धि(द्धि)जल तु वतो हरिः ॥३३॥

CLOSING · भगवति स्तवन प्रमकोमल भय(ज) नदोपदरिद्रविनाशनम् ।
मम कृपा क्रियते च विद्याधर प्रतिदिन हृदमे(ये) कमलापति(तौ) ॥१४॥

कमलभूतनयामुखपङ्कजे विसुनुते कमलाकरपल्लवे ।
विपुक्ष(वपुषि ?)ते रमते कमलाङ्कजे प्रतिदिन हृदये कमलापति(:) ॥१५॥

COLOPHON इति श्रीकालिकस्य कृत भारतीस्तोत्र सम्पूर्णम् ।

1551 मणकर्णिका-स्तोत्रम्

OPENING श्रीगणेशाय नम ।

त्वत्तीरे मणिकर्णिके हरिहरौ सायुज्यमुक्तिप्रदौ ,
वाद तौ कुरत. परस्परमुभौ जन्तो प्रयाणोत्सवे ।
मद्रूपो मनुजो यमस्तु हरिणा प्रोक्त शिवस्तत्क्षणे,
तन्मध्याद भृगुलाञ्छनो गरुडग पीताम्बरो निर्गतः ॥ १ ॥

CLOSING कृच्छ्रै कोटिशतै स्वपापनिधन यच्चाश्वमेधै फल ,
तत्सर्वं मणिकर्णिकास्नपनज(जे) पुण्ये प्रविष्ट भवेत् ।
स्नात्वा स्तोत्रमिद नर. पठति चेत् ससारपाथोनिधि ,
तीर्त्वा पल्वल(ल्लव)वत् प्रयाति सदन तेजोमय ब्रह्मण ॥ ६ ॥

COLOPHON इति श्रीविश्वेश्वराश्रमेण विरचित मणिकर्णिकास्तोत्र सम्पूर्णम् ।

Post.-Colophonic पठनार्थं शास्त्री जगन्नाथ रणछोड इद पुस्तकम् ।

1552. मणिकर्णिका-स्तोत्रम्

OPENING & CLOSING *Same as at no 1551*

COLOPHON · इति श्रीमच्छंकराचार्यविरचित मणकर्णिकास्तोत्रम् सम्पूर्णम् ।

1553. महाकाली-कवचम्

OPENING श्रीगणेशाय नम ।

देव देव महाबाहो भक्ताना सुखवर्द्धनम्(न) ।
येन सिद्धि ददात्याशु काली त्रलोक्यमोहिनी ॥ १ ॥

तन्मे वद दयापार साधकाभीप्सिसिद्धये ।
कृपा कुरु जगन्नाथ वद देव विदावर ॥ २ ॥

CLOSING इद कवचमज्ञात्वा काली यो भजते नर ।
नैव सिद्धिर्भवेत् तस्य विघ्न तस्य पदे पदे ॥ २८ ॥

COLOPHON इति गन्धर्वतन्त्रे महाकालीकवच सम्पूर्णम् ।

Post Colophonic — स० १८७३ फाल्गुनमासे कृष्णपक्षे ७ शनौ मगनीरामेणालेखि स्वाध्ययनाय कृष्णगढे ।

1563. यमुना-स्तोत्रम्

OPENING — श्रीगणेशाय नमः । श्रीकृष्णाय तुभ्य नम ।

अयि कलिन्दसुते रतिरस्तु मे त्वयि सदा निखिलाघविमोचनी ।
तव पयः पिबता गलितांहसा न भवभीतिरिति श्रुतिविश्रुतम् ॥ १ ॥

CLOSING — *तरणिजा(ज)तव एष सुवल्लभातुगतबालमुकुन्दविनिर्मित ।*
भवतु गोकुलचन्द्रकृपादिना सुलभबालमुकुन्दसमर्पणम् ॥ ११ ॥

COLOPHON — यमुनास्तोत्र समाप्तम् ।

1572. रामरक्षा-स्तोत्र-टीका

OPENING — श्रीगणेशाय नम । श्रीरामो जयति ।

नमस्कृत्य घनश्याम राम काम यथामति ।
व्याख्यास्य श्रेयसा सिद्धयै वज्रपञ्जरमादरात् ॥ १ ॥

इद किल वज्रपञ्जराख्य स्तोत्र विद्वदनुजिघृक्षया पुरारातौ स्वप्ने प्राप्य परम-कारुणिकः कौशिकः त्रिविधतापतप्तमनसा पुसा श्रेय[ ]प्राप्तयेऽनिष्टनिवृत्तये च पठनीय-त्वेनोपदिशति—ध्यात्वेत्यादिना ।

CLOSING — *इदानीमो(मभी)ष्टपवि(व)शात् व्यक्तीकृतेति सूचित । तच्चरितमभिवीक्ष्य लक्ष्मिक्टोपमर्पमसावरणेय तत्रादि परिहाय मा(म?) सूचयन्निरीक्षणमात्र विगतदेहा-*भिमानजनितस्वोपचितीयति विदेहजा इत्यनेन दर्शयति ।

COLOPHON : इति श्रीमन्महामुद्गलभट्टकृतिरिय रामरक्षाटीका सम्पूर्णा ।

Post Colophonic : सवत् १८३५ वर्षे माघ सुदि पचम्या तिथौ सोमे लिखितमिद । श्रीश्रीभट्टारक-श्री १०८ श्रीधीरकुशलसूरीश्वराणा पुस्तकम् । × × × लिखित प । प्रभाकृष्णेन श्रीभुजनगरमध्ये ।

1587. वायुदेवस्तवव्याख्या

(सुवर्णमञ्जरी)

OPENING — *श्रीलक्ष्मीनृसिंहाय नम ।*

नत्वा विष्णुं पर प्राण त्रिविक्रममहागुरून् ।
वायुदेवस्तवव्याख्या स्वरप्रसादात् करोम्यहम् ॥ १ ॥
मनयमावगम्भीरतया दूरावगाहना ।
यदप्यस्य प्रतीतार्थमपा व्याख्येव तन्यते ॥ २ ॥

महार्यरत्नाकरमुविहारोक्तिहेतुत ·
उपरम्य पर भूयो न तद्राहित्य (द्राहित्व ?) हेतुत ॥ ३ ॥
अत्रास्य प्रथमश्लोक । श्रीमद्विष्णुरिति ।

CLOSING & COLOPHON
वासुदेवस्तदन्याख्या रूपीणि रोचयमलम् ।
सुवर्णमञ्जरी जन्तून् रामेणाऽकारि शाभना ॥

वायुस्तुतिटीका समाप्ता ।

1588. वासुदेवस्तुति-श्लोकः पञ्चार्थी-टीकोपेतः

OPENING
श्रीकृष्णाय नम ।

वासना वासुदेवस्य वासित भुवनत्रयम् ।
सर्वभूतनिवासीना वासुदेव नमोऽस्तु त ॥ १ ॥

ववयोरैक्यात् अ्रा इति स्मरणे । कश्चिच्छाक्तिक ईश्वरी स्तौति—हे अम्ब तुभ्य नम । तुभ्यमित्यध्याहारः । कि विशार्य अस्तुतेन स्तुतिर्यस्या सा अस्तुत् तस्यै अनिर्वचनीयाया इत्यर्थ ।

CLOSING
इति शक्तिपक्षे । × × × × × इति रुद्रपक्षे । × × × × × इति भानुपक्षे । × × × × × इति कृष्णपक्षे । × × × × × कि पुनस्तव ह भगवन् त त्वया वा भुवनत्रय वासितहेतो वमरणामि गोपिकास्तुतिपक्षे पञ्चार्थवाच्यय श्लोक ॥ १ ॥ श्री ।

1589. विवेक-धैर्याश्रय-स्तोत्रम्

OPENING
विवेकधैर्य सतत रक्षणीये तथाश्रय ।
विवेकस्तु हरिः सर्व निजेच्छात करिष्यति ॥ १ ॥

CLOSING
एवमाश्रयण प्रोक्त सर्वेषा सर्वदा हितम् ।
कलौ भक्त्यादिमार्गा हि दुःसाध्या इति मे मति ॥ २ ॥

COLOPHON ·
इति विवेकधैर्याश्रयस्तोत्रम् ।

1590. विष्णु-स्तुति-टीका

OPENING ·
श्रीगोकुलेशो जयति ।

भावप्रेमप्रणय स्नेहो रागानुरागस्यमनानि ।
अङ्कुरकन्दलशाखा पल्लवकलिकाप्रसूनफलानि ॥ १ ॥

अथ श्रीमत्प्रभुचरणा हरेर्भावात्मकस्य शृङ्गारोत्तररसात्मकस्य स्वरूप वैचित्र्यस्थितिसिद्धय तदन्यनागमनाय तदेकार्थतावगतय तत्पोष्यत्वाय तत्सेवनाद्यधीनवृद्धिमत्वाय तच्छायादिमर्वोपयोगित्वाद्यर्थं फलरूपत्वपि वृक्षत्वेनैकेन पद्येन निरूपयन्ति—

भावैरङ्कुरित महीमृगदृशामावल्यमासिञ्चित,
प्रेम्णा कन्दलित मनोरथमयं शाखाशतै सम्भृतम्।
लोल्यै पल्लवित मुदा कुसुमित प्रत्याशया पुष्पित,
लीलाभि फलित भजे व्रजवनीशृङ्गारकल्पद्रुमम् ॥ १ ॥

CLOSING तथा चैतादृशस्थलवर्तिवृक्षस्य प्रभो. स्वर्गस्थकल्पद्रुमतोऽप्यतिगूढतेति सर्वमवदातम्।

एव निम्बार्कतदात्मजात पादाम्बुजाताश्रयमात्रचेतसा।
निरूपितस्तत्वतपद्यभावस्तेनात्मदामेति दया दधीताम्।

COLOPHON इति श्रीहरिदासविरचिता भावैरङ्कुरितमिति पद्यव्याख्या समाप्ता।

1602. शिवमहिम्नः स्तोत्र-पञ्जिका

OPENING: श्री स्वस्ति श्रीगणेशाय नम।

यामामनन्ति मुनयो भुवि तत्त्वनिष्ठा
वाचस्पतिप्रभृतयो दिवि देवमुख्या।
या श्रा पिबन्ति सुतलेष्वपि वाद्रवेया-
स्ता भारतीं त्रिपथगामिव ता स्मरामि ॥ १ ॥

स्तोत्रराजे सुविस्तीर्णे दुर्बोधपदपञ्जिका।
श्लोकपाठविशुद्धयर्थं क्रियते पञ्जिका मया ॥ २ ॥

तुष्यते देवदेवेश श्रीकण्ठ प्रभुरीश्वरः।
भुक्तिमुक्ती न दूरस्थे शुद्धपाठवता नृणाम् ॥ ३ ॥

तस्मात् पञ्जिकया कृत्वा शुद्धस्तोत्र पठेन्नर।
श्लोकपाठविशुद्धात्मा शिवलोके महीयते ॥ ४ ॥

कश्चिद् दक्षिणापथे श्रीमान् शान्तिवर्णो नाम राजा। ++++++त्रिपुर भवात् प्रविज्ञाते चार्थे स्तुति क्रियमाणा न सदृशी भवति तत्कथ मा स्तोतु प्रारभयात् (भवान्) इत्याशङ्क्याह—महिम्न पार ते परमविदुषइत्यादि०

CLOSING & COLOPHON श्रीमत्प्रनाथपर्वतमुनितरुवावलम्बिना श्रीसद्धर्माभिचण्डोपाण्डप्रजायिना स्तोत्रराजस्य सक्षेपेणार्थ. प्रकाशितोऽगमत्। पुण्यपाठविशुद्धयर्थं शुद्धपाठवतां सती। श्रीमत्वर्णप्रकाशव्यवहरणे महिमस्तोत्रविवरणपञ्जिका समाप्ता।

Post-Colophonic: लिखित दिलाराम ब्राह्मण मगु शुभ कल्याण। वैशाख वदी सप्तम्या बुधवासरे पोथी ब्रह्मभारथीदी पजतीरथ मध्ये टोवा महन्दी।

1603 शिवमहिम्नस्तोत्र-कल्पलता-टीका

OPENING श्रीगिरिराजसुतापतिसूनवे नम।

ईशान सर्वविद्यानामीश्वर पार्वतीपतिम्।
भजामि श्रीमहादेव सर्वदेवोत्तम प्रभुम् ॥ १ ॥

व्यालमालमनलामलभाल शूलपालममलामलशीलम् ।
कालकालमकल कलयामो लोलपालमनुवेलमलीलम् ॥ २ ॥

महेश्वराराधनदत्तशील. श्रीमन्महिम्नोर्थविचारलीलः ।
महोबलः पूजितकालकालो महिम्नटीका तनुते सुशील ॥ ३ ॥

पुष्पदन्तनामा गन्धर्वविशेषः शिवैकशरणो भूत्वा शिवप्रसादार्थं हिमवत्पर्वते तप कृत्वा । + + + + स्वानौद्धत्य प्रकटयन् स्तोतुमारभते - महिम्न पार ते० ।

CLOSING

सद्मस्मगेखाकविशालभाल शिवार्चनासादितचारुशील ।
महोबलः कीर्तितकालकालो महिम्नटीकामननोत्सवमूलः ।

COLOPHON - इति श्रीमत्सकललोकप्रसिद्धश्रीमद्भास्करवशरत्नमहोदधिसम्भूत-सकलविद्यानिधिभूत-श्रीमन्नृसिंहभट्टमहोपाध्यायतनुजेन रामकागर्भसम्भूतेन महोबलेन श्रीविश्वेश्वरचरणपरिभजनैकनिधानेन विरचिता श्रीमन्महिम्नस्तवव्याख्याकल्पलता सम्पूर्णम् ।

1607 शिवस्तोत्रम्

OPENING

श्रीसरस्वत्यै नम ।

शिव हरे शिव राममखे प्रभो त्रिविधतापनिवारण हे विभो ।
अज जनेश्वर यादव पाहि मा शिव हरे विजय कुरु मे वरम् ॥ १ ॥

CLOSING

प्रातरुत्थाय यो भक्त्या पठेद् वा स्तोत्रमुत्तमम् ।
वीयो (विजयो) जायते तस्य विष्णुमाराध्यमाप्नुयात ॥ १३ ॥

COLOPHON - इति रामानन्दसरस्वतीविरचित शिवस्तोत्र सपूर्णम् ।

Post-Colophonic : चैत्रमासे कृष्णपक्षे तिथौ ३ रविवासरान्युताया सवत् १८२२ का । लिखित कटेश्वर चिर जयलाल । कृष्णगढमध्ये । स्वाध्ययनाय ।

1610 शिवपराधक्षमास्तोत्रम् सटीकम्

OPENING

श्रीशिवाय नम ।

विश्वेश्वर नमस्कृत्य सर्वप्रत्ययकारणम् ।
सुन्दरस्यापराधस्य टीकेयं लिख्यते मया ॥ १ ॥

W.-OPENING

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं ।
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं ,
वन्दे भक्तजनाश्रयं च वरदं(द) वन्दे शिवं शङ्करम् ॥१॥

शं सुखं भवति अस्मादिति शम्भुर्विश्वनाथस्तस्य सम्बोधन हे शम्भो ! मेऽपराधः क्षन्तव्य इत्यन्वय. ।

CLOSING & COLOPHON:

आयुर्नश्यति पश्यता प्रतिदिनं याति क्षयं यौवनं ,
प्रत्यायान्ति गता[ः] पुनर्न दिवसा कालो जगद्भक्षकः ।

लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवनं,
तस्मात् मां शरणागत शरणदः त्वं रक्ष रक्षाऽधुना । १५ ॥

इति श्रीशङ्कराचार्यविरचित शिव-अपराधक्षमास्तोत्र समाप्तम् ।

आयुर्नश्यति । हे शर[ण]द । आमप्रद(आश्रयप्रद)तस्मात् कारणा[त्] अधुना शरणागत मा त्व रक्ष रक्ष । + + + + + तथा जीवितमपि विद्युदिव चञ्चल अस्थिर तस्मात् इत्युपसंहार ॥ १५ ॥

रामेन्द्रवनशिष्येण रामानन्देन भिक्षुणा ।
सुन्दरस्यापराधस्य टीकेयं च कृता शुभा ॥ १ ॥

इति रामेन्द्रवनशिष्यरामानन्देन विरचित अपराधक्षमास्तोत्रस्य व्याख्या[न] समाप्तम् ।

Post-Colophonic — सवत् १९२७ वर्षे—मासे शुक्लपक्षे १४ चतुर्दश्यां बुधवासरे लिपिकृत कवीश्वर चिर० जयलालेन । अजयनगरमध्ये ।

1618: सरस्वती-स्तोत्रम्

OPENING. — *कलमरालविहङ्गमवाहना सितदुकूलविभूषणलेपना ।*
प्रणतभूमिरुहामृतसारिणी प्रवरदेहविभावरधारिणी ॥ १ ॥

CLOSING — स्तवनमेतदनेकगुणान्वित पठति यो भविकः प्रमदात् प्रगे ।
स सहसा मधुरैर्वचनामृतैर्नृपगणानपि रञ्जयति स्फुटम् ॥ १३ ॥

COLOPHON — इति श्रीसरस्वतीस्तोत्र मन्त्रयुक्त समाप्त । मनुभूतिस्वरूपाचार्यकृत स्तोत्र-सम्पूर्णम् ।

Post-Colophonic — स० १८६३ ना वैसाख सुद १० तिथौ सोमवासरे इद सपूर्णम् ।

1619 सरस्वती-स्तोत्रम्

OPENING — श्रीगणेशाय नमः ।

जलजनन्दनचन्दनचन्द्रमा(मः)सदस(दृग)मूर्तिरिय परमेश्वरी ।
निखिलजाड्यजठोग्रकुठारिका दिशतु मेऽभिमतानि सरस्वती ॥१॥

CLOSING — मलयकीर्तिकृतामतिसस्तुति पठति यः सतत मतिमानरः ।
विजयकीर्तिगुरो कृतमादरात् सुमतिकल्पलताफलमस्तु ते ॥ ६ ॥

COLOPHON — इति सरस्वतीस्तोत्र समाप्तम् ।

1622. सर्वोत्तम-स्तोत्रम्

OPENING: — श्रीकृष्णाय नमः ।

अथ सर्वोत्तमस्तोत्र लिख्यते—

प्राकृतधर्मानाश्रयमप्राकृतनिखिलधर्मरूपमिति ।
निगमप्रतिपाद्य यत्तच्छुद्ध साकृति स्तौमि ॥ १ ॥

कलिकालनमश्छन्नदृष्टित्वाद्   विदुषामपि ।
सप्रत्यविषयस्तस्य माहात्म्य समभूद् भुवि ॥ २ ॥

CLOSING
तदप्राप्तौ वृथामोक्षस्तदाप्तौ नद्गतार्थता ।
अत सर्वोत्तम स्तोत्र जप्य कृष्णरसायिभि ॥ ३५ ॥

COLOPHON: इति श्रीमदग्निकुमारप्रोक्त सर्वोत्तम स्तोत्रम् ।

1642 स्तोत्रादिसग्रहः

OPENING × × × × हिरण्मयन सुवीता रथ नो । देवो याति भुवनानि पश्यन् ॥१७॥

CLOSING × × × × मृडयतु तदद्विपमो पुण्ए नो दृष्टि तमेपा ज भेद धम ॥ ६६ ॥

(On f 12) × × ×

(On f 14) × × × मपायुषेनाचाय सुवीर्याय ।६। मदभू नममते ॥ १६ ॥

× × ×

(On f 17) तुत्र सो पवने ण सुषाकाम मधुभीय । अथ पाच आव ।

× × ×

प्रकाममलोके भवेद् राजा पाताले धनमम्पदा ।
मृनलोके भवेनास्ति ये ते मूलकारीजा ॥

1646 दत्तात्रेयपूजापद्धतिः

OPENING: श्रीगणेशाय नम ।

श्रीपार्वत्युवाच—

किरातरूपी भगवान् कदाचिद गिरिजापति ।
कदाचिदिष्टलाभेषु पार्वत्या पृष्ट ईश्वर ॥ १ ॥
ततत् श्रुतानि सर्वाणि मन्त्रजालानि कृत्स्नदा ।
आदावपटामन्त्रत्,न्यान्) पश्चाद्नु(द्र)द्रसागरी ॥ २ ॥

CLOSING
मन्दारमूले मणिपीठमस्थ सुवर्णदाम्नैकनिबद्धवेदिम् ।
ध्यायेत परीत नवनाथसिद्धैर् दरिद्रदावानलनाशमेधम ॥ २५ ॥

COLOPHON. इनि *श्रीभैरवयामल दत्तात्रेय पूजापद्धति* समाप्तम् ।

Post-Colophonic लिखित व्यङ्कटेश मातापुरवासिन ।

1650· अर्थरत्नावली

OPENING (वामकेश्वरतन्त्र चतु शतीटिप्पणम)

श्रीगणेशाय नम ।

श्रीमन्महागणनाथ पादपङ्केरुहद्वयम् ।
योगीन्द्रमधुपव्रातसेवित सर्वदा भजे ॥ १ ॥

प्रियानन्दमहं वन्दे सदानन्दप्रकाशिनम् ।
प्रपन्नजनता दुःख ध्वान्तविच्छेदभास्करम् ॥ २ ॥
आद्य मिथुनमारभ्य स्वगुर्वन्तं क्रमेण तु ।
वन्दे गुर्वो धर्मोतान्या चरणाचरणौ या ॥ ३ ॥
यत्पादाम्बुजसम्भूत रजो विमलयन् मनः ।
प्रसाद तनुते मह्य रत्नरा गुरु भजे ॥ ४ ॥
शिव कामरवरी सिद्धान् त्रिविधानपि दम्पतीन् ।
वङ्कालप्रभृतीन् वन्दे गुरून् कल्याणरोचिषः ॥ ५ ॥
गणनाथमहं वन्दे दिव्यार्यं प्रपूजितम् ।
सर्वविघ्नौघनाशार्थं सर्वाभीष्टफलाप्तय ॥ ६ ॥
वटुक योगिनीवृन्द भैरवानमितौजस ।
प्रणमामीष्टसम्पत्ति-सम्पादनसमुत्सुकान् ॥ ७ ॥
मन्त्रमण्डलवर्णान्[तम] प्रदर्पिणीं करुणापराम् ।
धामनविस्वरूपा ता वन्दे त्रिपुरसुन्दरीम ॥ ८ ॥
सम्प्रदायान्वयेनैव विमलात्मात्ममनुना ।
क्रियते टिप्पणं सम्यक्, वामकेश्वरशास्त्रगम् ॥ ९ ॥
सर्वरत्नावलीत्येषा स्यादास्तु भुवनत्रय ।
भुवनेश्वरि ते भक्त्या क्रियते टिप्पणं मया ॥ १० ॥

प्रारिप्सितग्रन्थस्याविघ्न (घ्न) परिसमाप्त्यर्थं विशिष्टलाभाय च परमकारुणिको भगवान् लोकानुग्रह चिकीर्षु वहुरूपाष्टक शास्त्र मधिष्य चतुःशतनत्यापरिमित ग्रन्थं तत्सारमुद्धर्तुकाम तच्छास्त्रप्रतिपाद्या वर्णावयवा महात्रिपुरसुन्दरी महत्या भक्त्या महादेव प्रणमति । गणेशग्रहनक्षत्रेत्यादिना ।

CLOSING & COLOPHON इति श्रीविद्यानन्दविरचिते चतुःशतीटिप्पणे सर्वरत्नावल्यां त्रिपुराजपहोमोपदेशः पञ्चम पटलः ।

1651 कालीपटलः

OPENING : श्रीगणेशाय नमः ।

कैलासशिखरासीन देवदेव जगद्गुरुम् ।
उवाच पार्वती देवी भैरव परमेश्वरम् ॥ १ ॥

पार्वत्युवाच—

देव देव महादेव सृष्टिस्थितिलयात्मक ।
कि तद् ब्रह्ममय धाम श्रोतुमिच्छामि तत्त्वत ॥
कालिकाया महाविद्या समस्तनिदसगुप्ता ।

CLOSING यथा भार्यो न लभते यथाकार्यं महेश्वरि ।
या भक्त माधवो ज्ञानी तस्मै गन्ध प्रकाशयेत् ॥

COLOPHON इति कालीपटलः सम्पूर्णः ।

1651. श्यामापद्धतिः

OPENING

श्रीमद्दक्षिणकालिकायै नम ।

अथ श्यामापद्धतिप्रारम्भ —ब्राह्मे मुहूर्ते उत्थाय मुक्तशापोऽन्यद्वास परिधाय मृद्वासन उपविश्य स्वशिरसि अधोमुखमहस्रदलकमलकर्णिकाया० ।

CLOSING :

ततो मूलेन अष्टोत्तरशताभिमन्त्रितपुष्पचन्दन धृत्वा त्रैलोक्य वशमानयेदिति श्यामापद्धतिः ।

COLOPHON .

श्रीमद्दामोदरानन्दनाथकृतेय पद्धति ।

धन्योऽस्मि कृतकृत्योऽस्मि जीवन्मुक्तोऽस्मि भो गुरो ।
तव पादाम्बुज[मा]श्रित्य मधुपोऽस्मि स्थितस्तत ।

इति सम्प्रार्थ्य यथासुख विहरेत् ।

इति श्यामापद्धति सम्पूर्णम् ।

1655. कोष्ठयुद्धनिर्णयचक्रम्

OPENING .

श्रो नम- ।

अथात सम्प्रवक्ष्यामि कोष्ठयुद्धस्य निर्णयम् ।
स्तोकारिः कुरुते यत्र भूरिसैन्यपराभवम् ॥ १ ॥
यस्याश्रयकला देवा राज्य कुर्वन्ति भूतले ।
विग्रह चतुराशा[सु] सुशीलं शत्रुभि सह ॥ २ ॥

CLOSING

वज्रार्गलविधान तु कीर्तव्य दुर्गरक्षणे ।
भञ्जने यमराजास्य इत्युक्त ब्रह्मयामले ॥ ८० ॥

COLOPHON .

इति कोष्ठचक्र समाप्तम ।

1683. कौलकुतूहलम्

OPENING .

श्रीगणाधिपतये नम । श्रीमर्वज्ञं नमोनमः ।

वन्दे गुरु ज्ञानमयप्रकाश मुक्तिप्रदान भवभोगहेतुम् ।
चिच्छक्तियुक्त वरदाभयाढ्य भव भवानीसहित नमामि ॥

शारदातिलकेषु—

निर्गुणः सगुणश्चेति शिवो ज्ञेय. सनातन ।
निर्गुणः प्रकृतेरन्यः सगुण सकल स्मृत ॥ २ ॥

CLOSING & COLOPHON :

इति श्रीकौलकुतूहले द्वारपूजानिर्णयो नाम उल्लास ।

अथ पूजामङ्गलं कुर्यात् । × × × × ×

कर्मणि वह्नितारापि विय(प)न्त्राया समीरिता ।
आग्नेया मनवः सौम्या भूय(म्य)ष्टेद्दमृताक्षरा. ॥
आग्नेयाः सम्प्रबुध्यन्ते···· ·······

1684. क्रमदीपिका सटीका

OPENING (On f 6)

उक्तानि स्यात् यादिभि सप्तधातून् प्राण जीवं क्रोधमप्यात्मने तान् ॥ २४ ॥

पूर्वोक्तकेशवादिमूर्तिकीर्त्यादिशक्तिन्यासप्रकार दर्शयति-वर्णानुक्त्वेति । पुरस्तात् प्रथम वर्णा[न्] अकारान्तान् उक्ता । कथभूतान् सार्द्धचन्द्रान् अनन्तर मूर्ति केशवाद्या शक्तिः कीर्त्याद्या ङेवसाना चतुर्थ्यन्ता । नति नम पद चोक्त्वा पूर्वोक्तमातृकास्थानेषु न्यसेत् ।

CLOSING & COLOPHON

जनमिममनुविद्धायनस्मात् प्रसूते पदनुततमजस्रं पाति बाधितायम् ।
यदुरमह उदञ्चियं विधत्ते च गोपी तममनुसुखबोध ज्योतिष नौमि कृष्णम् ॥

अदावन्ते च कृतमङ्गलानि शास्त्राणि पृथ्यन्त इत्यन्तेपि मन्त्रार्थरूपपरदेवता-प्रणतिलक्षण मङ्गलमापादयति-जनमिममिति ।

इति श्रीक्रमदीपिकायां केशवभट्टविरचितायां प्रयोगविधानोपसंहारो नामाष्टम पटल. ।

दुष्टतम कश्चित् ममग्रन्थचोरचतुरमिम ग्रन्थ उपलभ्य अस्य नामान्यथा कारयित्वा मयाय प्रबन्ध कृत इति स्वपाण्डित्य प्रकटयेत् इति मन्वान प्रबन्ध कृत लोके गुप्तबन्धे व्यक्तस्वनामग्रन्थनाम च दर्शयति—यदचक्रमिति । य प्रभु कृष्ण स्वतन्त्र × × × × × × ×दूरीकृताऽतिवृष्टयाद्युपद्रव । उक्तम्०

1685. तन्त्रमण्डनम्

OPENING

श्रीगुरुभ्यो नमः ।

प्रणम्य सम्यग् गुरुपादपङ्कजे सहस्रपत्रान्तरसप्तसङ्गमे ।
उच्चित्य चूडामणितन्त्रमादिह विधीयते * मण्डन मुदा ॥

CLOSING

इति कालीतन्त्रवचनादित्यन्यथा गौरवभयान्नास्माभिर्लिखितम् ।

आलोक्य तन्त्राणि विभाव्य मार्गं दीवेश्वराणी (णा) गदितं गुरूणाम् ।
चूडामणौ यल्लिखित मिताक्षर तत्साधकाना वितनोतु मोदम् ॥

1686. तन्त्रराजः

OPENING:

अथ तन्त्रराज लिख्यते—

य. शान्त परमद्वयापरशिव वच्छ्रानवालान्तरे,
श्रीधाद्वातमनादिनित्यनिचय मङ्कल्पसङ्कोचक ।
भाभामानरभास...... यतर सर्वात्मता बोधक ,
सोऽस्त्र सर्वमयो ददातु जगता विद्यादिसिद्धयष्टकम् ॥१॥

CLOSING

मद्गुणो(स्यो) जायते मत्य देवैरपि न दृश्यते ।
एते सर्वे महायोगाश्चण्डामन्त्रेण सिदिता(दा) ॥ ६१ ॥

COLOPHON

इति श्रीपार्वतिपुत्रनित्यनाथमभिधौ रामचन्द्रसिद्धविरचिते सिद्धखण्डे अमृतसारे मृतसञ्जीवनादिवटपुटीनाम सप्तमोद्देश ॥ ७ ॥

1687. तन्त्रसारः

OPENING

श्रीगणेशाय नमः ।

नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितम् ।
गुरुं च ज्ञानदातारं कृष्णानन्देन धीमता ॥
तत्तद्ग्रन्थकृतान् मानयान्मर्थान् प्रतिपाद्य च ।
सौकर्यार्थं च संक्षेपात् तन्त्रसारः प्रतन्यते ॥

CLOSING

श्रीकृष्णानन्दवागीश-भट्टाचार्यस्य सङ्ग्रहम् ।
तज्ज्ञा अधीतशास्त्राणि धीराध्याये तु साम्प्रतम् ॥

COLOPHON

इति महोपाध्यायश्रीकृष्णानन्दवागीशभट्टाचार्यकृत-तन्त्रसारः समाप्तम् ।

Post Colophonic

संवत् १७३४ समे फाल्गुण सुदी ।

1688. पुरश्चरण-पद्धतिः

OPENING

श्रीगणेशाय नमः । श्रीगुरु भजे ।

शिवादींश्च गुरून्नत्वा पुरश्चरणमुच्यते ।
विना न येन सिद्धि (द्ध) स्यान्मन्त्रो वर्षशतैरपि ॥ १ ॥

इत्यावश्यकता अस्य सम्प्रति तत संक्षेपतस्तद्विधिं वक्ष्ये ।

CLOSING

नानाग्रन्थान् समालोक्य श्रीमान् गोपीनाथः कृती ।
पुरश्चर्याविधिं सम्यक्-साधकार्थमचीकरत् ॥

COLOPHON

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोपालाश्रमपूज्यपादकृपाकटाक्षासादित-परमानन्दैकरस शैवमाधवपाठकाग्निहोत्रिसूतशैवगोपीनाथपाठकाग्निहोत्रिविरचितः पुरश्चरणविधि समाप्त. ।

Post Colophonic

संवत् १९१६ ना फागण विद ८ अष्टम्यां भृगुवासरे लि० दवे श्री ५ लिलाधरसुत रेवाशंकरेण मिदं पुस्तं स्वार्थं ।

1691. मन्त्रमहोदधिः नौका-टीका-सहित

OPENING

श्री गणेशाय नमः ।

नत्वा लक्ष्मीपतिं देवं स्वीये मन्त्रमहोदधौ ।
नावं विरचये रम्यां तरणाय गुणैर्युताम् ॥ १ ॥

तत्र तावत् मन्त्रमहोदधिनामकं तन्त्रं चिकीर्षुराचार्य शिष्टाचारपालनाय निर्विघ्न-ग्रन्थसमाप्तये वेष्टदेवनमनपूर्वकं ग्रन्थकरणं प्रतिजानीते प्रणम्येति ।

प्रणम्य लक्ष्मीनृहरिं महागणपतिं गुरुम् ।
तन्त्राण्यनेकान्यालोक्य वक्ष्ये मन्त्रमहोदधिम् ॥ १ ॥

CLOSING & COLOPHON : अब्दे विग्रमतो जाते बाणवेदनृपैर्मिते ।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधि ॥ १३२ ॥

इति श्रीमन्महीधरविरचिते मन्त्रमहोदधौ षट्कर्मादिनिरूपणं पञ्चविंशस्तरङ्ग ॥ २५ ॥ समाप्तोय मन्त्रमहोदधिग्रन्थ स ४५०० ।

अथ ग्रन्थनिष्पत्तिकालमाह—

विग्रमार्कादिति । बाणवेदनृपैर्मिते वर्षे पञ्चचत्वारिंशत् उत्तरषोडशतमे विक्रमनृपाद्गते सति शिवस्य रामेश्वरस्य अग्रे मन्त्रमहोदधिः समाप्तिमगमत् ॥ १३२ ॥

इति श्रीमन्महीधरविचिताया मन्त्रमहोदधिटीकायां नौकासमाख्याया षट्कर्मादिनिरूपणं पञ्चविंशस्तरङ्ग ॥ २५ ॥

.... ··समाप्तोऽत्र मन्त्रमहोदधौ नौकाया ग्रन्थ ।

1692. मुद्राप्रकरणम्

OPENING अथ मुद्रा—तारत्वकुशमुद्रा कुम्भमुद्राग्निप्रकारमुद्रा कूष्माण्डिन्यामुद्रा गालिनीमुद्रा धेनुमुद्रा शङ्खमुद्रा योनिमुद्रा मत्स्यमुद्रा आवाहनादिनवमुद्रा । गणेशस्य सप्तमुद्रा. शावना दशमुद्रा । गायत्र्या द्वात्रिंशन्मुद्रा । वैष्णव्येकोनविंशतिमुद्रा । सौरद्विमुद्रा । शैवदशमुद्रा ।

CLOSING अन्तरङ्गुष्ठमुष्ट्या तु निरुद्धा तर्जनीमिमाम् ।
रिपुजिह्वाग्रहा मुद्रा न्यासकाले तु सूचिता ॥

इति मुद्राप्रकार ।

COLOPHON : इति श्रीशिवार्चनचन्द्रिकायां मुद्राप्रकरणम् ।

Post-Colophonic संवत् १८६१ भाद्रपदमासे कृष्ण ३ गुरौ मगनीरामेणालेखि अजमेरमध्ये । सेठजी श्रीगम्भीरमलजीकस्य पुस्तकात् स्वयमपि लिखितम् ।

1693 मुद्रालक्षणम्

OPENING : अथ ब्रह्माण्डपुराणे मुद्रालक्षणम्—

कलौ पापैकबहुले धर्मानुष्ठानवर्जिते ।
नामानुकीर्तनं मुक्ता(क्त्वा)नृणां नान्यत्परायणम् ॥

इति । अथ मुद्रालक्षणम्—

CLOSING : मध्यमे कुटिलाकारतर्जन्युपरिसंस्थिते ।
अनामिकामध्यगते तथैव हि कनिष्ठिक ॥

सर्वा एकत्र मयोज्या अङ्गुष्ठोपरिपातिता ।
एषा तु प्रथमा मुद्रा योनिमुद्रेति या स्थिता ॥ ६ ॥

COLOPHON : इति नवमुद्रालक्षणम्

1694. यन्त्रचिन्तामणिः

OPENING

श्रीगणेशाय नमः ॥

यं ध्यायन्ति सुरासुराश्च निखिला यक्षाः पिशाचोरगाः,
राजानश्च तथा मुनीन्द्रनिवहाः सर्वार्थदासिद्धये।
भक्तानां वरदाभयौ द्वयकरे पाशाङ्कुशालङ्कृतं,
सच्चच्चामरवीज्यमानमनिशं सोऽहं श्रये शङ्करं ॥ १ ॥

× × ×

जालन्धरे पीठवरे प्रसिद्धे प्रत्यक्षरूपा भुवि वर्तते या।
गोत्रे तस्मिन् वेदविद्याप्रवीणो योऽभीयपानास्तिकाख्यदेवाह्वान् ॥ ४ ॥

तदन्वये पण्डितसार्वसिंहो ज्वालामुखीं नौमि महाप्रभावाम्।
या योगमाया परमार्थविद्या विशेषपूज्या भृगुवंशजानाम् ॥ ५ ॥

तस्यात्मजोऽभूद् भुवि धर्मशीलो नाम्ना महादेव इति प्रसिद्धः।
नैसर्ग[िं]वैरं प्रजहुः सुसत्वा या प्राप्य दृष्ट्वा हितरक्षकाया ॥ ६ ॥

तस्मादासीत सुमनिविकसः देवदत्तः कलावान्,
मान्यो राज्ञां सदसि विदुषां गद्यगङ्गाप्रवाहः।
उत्कल्लोलं दिशि दिशि जना कीर्तिपीयूषसिन्धुं,
यस्याद्यापि श्रवणपुटकैः कुञ्चिताशाः पिबन्ति ॥ ७ ॥

गङ्गाधरस्तत्तनयो बभूव विवेकगाम्भीर्यगुणैरुदारैः।
यं प्राप्य लक्ष्मी च सरस्वती च तत्पादयुग्मं स्थिरतां न नूनम् ॥८॥

दामोदरः सर्वकलाप्रवीणः तस्मादभूच्छ्रीगणनायभक्तः।
लब्धप्रतिष्ठो गुरुदेवभक्तो मान्यः सतां धर्मपरायणोऽयम् ॥ ९ ॥

दृष्ट्वानेकशिवागमांश्च बहव(हुना)श्चालोक्य सौरागमान्,
देवीकल्पमहागमांश्च विविधानालोक्य विस्तारतः।
कर्तुं वाञ्छितसङ्ग्रहं स मतिमान् दामोदरः सुन्दरं,
लोकानां हितकारि यन्त्रनिकरैर्मन्त्रेण युक्तं स्फुटम् ॥१०॥

प्रेरितश्चन्द्रचूडेन स्वप्नदृष्टेन मद्विजः।
चकार कल्पयन्त्राणां चिन्तामणिमिति स्फुटम् ॥ ११ ॥

CLOSING:

आकर्षणं स्तम्भनकं तृतीयं विद्वेषणं मारणकं ततश्च।
उच्चाटनं शान्तिकरञ्च सप्तमं बन्दिप्रमादजनकं तु महाप्रभावं ॥१॥

मदनन्तमुच्चाटनकं वदन्ति अष्टाधिकारं प्रवदन्ति कल्पे।
चिन्तामणौ देववरा[र] सुपूजितं स्वर्गं च तस्य बहुभाग्ययुतस्य पुंसः ॥२॥

पुण्याधिकस्य बहुयोगयुतस्य लोके प्राप्तिर्भवेत् कल्पलतास्य तस्य।
येनार्चितो देववरो महेशः श्रीयन्त्रचिन्तामणि येन भावितम् ॥३॥

COLOPHON इति श्रीयन्त्रचिन्तामणौ प्रत्यक्षसिद्धिप्रदे उमामाहेश्वरसम्वादे दामोदरपण्डितोद्धृते सप्तमपीठिका सम्पूर्णा । समाप्तोऽयं यन्त्रचिन्तामणिग्रन्थ ।

Post-Colophonic संवत् १७४३ वर्षे आषाढसुदि ३ दिने लिखितेदं शास्त्रं पण्डित-माणिक्यसमुद्रेण स्वकौतुकाय श्रीमेडतानगरे ।

1698 श्रीविद्याक्रमपद्धतिः

OPENING: श्रीगणाधिपतये नमः । श्रीमहात्रिपुरसुन्दर्यै नमः। श्रीगुरुभ्यो नमः।

गुरुं गणपतिं दुर्गां बटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥ १ ॥

वन्दे श्रीगुरुनाथपादयुगलं वन्दे गणानां विभुं,
विद्यादानविशारदां शशिमुखीं श्रीशारदाम्बां तथा ।
श्रीविद्याक्रमपूजनं लघुतरं पूर्वं प्रमाणं मता,
बालानां व्यवसायिनां क्रमरतां सद्भक्तियुक्तात्मनाम् ॥२॥

तत्रादौ विद्योद्धारः तन्त्रराजे०—।

CLOSING: ततः परं योगिनीभिर्वृतः किञ्चित्कालं नीत्वा मिश्रचरणविद्यया स्वात्मानं सच्चिदानन्दमयं परामृश्य सुखी भूयादिति शिवम् ।

क्रमोत्तमे यथाशक्त्यनानां मनुना गणनाश्रमम् ।
अजीगणन्निजात्मासौ सुन्दरीत्रिपुराश्रमम् ॥

COLOPHON इति श्रीनिजात्मानन्दविरचितायां क्रमोत्तमाख्यायां श्रीविद्यापद्धतौ पूजाविवरणं नाम चतुर्थोल्लासः श्रीमत्त्रिपुरसुन्दर्यर्पणमस्तु ।

Post Colophonic: शके १६६० सर्वधारिनामसंवत्सरे उदयन वसन्तऋतौ वैशाखमासे कृष्णपक्षे चतुर्थ्यां तिथौ गुरुवासरे मूलनक्षत्रे शिवयोगे बालववर्णे तद्दिने व्यङ्कटेशात्मज त्र्यम्बकेन ग्रन्थं लिखितं समाप्तिमगमत् ।

1700. सौभाग्यरत्नाकरः

OPENING: श्रीगणेशाय नमः ।

प्रारम्भे भरणे भङ्गे यन्मदस्पदबिन्दवः ।
कारणानि प्रपञ्चस्य त[द्]द्[वि]वारणाननम् ॥ १ ॥

सच्चिदानन्दनाथाङ्घ्रि-सरोरुहयुगं भजे ।
यत्कटाक्षक्षणोत्सेधाद्विदोद्‍ पञ्चकृत्यकृत् ॥ २ ॥

प्रकाशरूपा प्रथमे प्रयाणेऽमृतरूपिणी ।
प्रतिप्रयाणे सामन्तपदस्था चित्कला भजे ॥ ३ ॥

आलोक्य सर्वतन्त्राणि यामलादीन्यनेकशः ।
ज्ञात्वा गुरुमुखाद्भेदा रहस्यार्थांश्च तत्त्वतः ॥ ४ ॥

सच्चिदानन्दनाथाङ्घ्रि सरोजद्वयषट्पदः ।
श्रीविद्यानन्दनाथोऽहं वीतरागो विविक्तधीः ॥ ५ ॥

विचरन् मेदिनीमेना विद्वद्भिर्विमलात्मभिः ।
प्रयागे प्रार्थितः प्रीत्यै तेषां लोकहिताय च ॥ ६ ॥

पञ्चस्रोतपथोऽगाधं तन्मर्मिमन्त्रसङ्कुलम् ।
समस्तयोगिनीचक्र प्रवाललतिकोज्ज्वलम् ॥ ७ ॥

नित्यामण्डलपूर्णेन्दुज्योत्स्नाजालविजृम्भितम् ।
नवचक्रमहाद्वीप न्यासजालतरङ्गकम् ॥ ८ ॥

श्रीनाथपादुकापोत चतुर्वर्गफलामृतम् ।
प्रकाशयामि सौभाग्यरत्नाकरमिति स्फुटम् ॥ ९ ॥

श्रीविद्यायाः सभेदाया नित्यनैमित्तिकार्चनम् ।
काम्यार्चनं च दीक्षाङ्गभूतं प्राच्यादिसाधनम् ॥ १० ॥

दीक्षाभेदं पुरश्चर्यां तत्कर्मनियमादिकम् ।
काम्यहोमविधिश्चैव सौम्यक्रूरविभेदतः ॥ ११ ॥

समस्तन्यस्तविद्यायां यद्यत्काम्यफलोदयः ।
सदाचारादिकं चैव लिख्यते रत्नवारिधौ ॥ १२ ॥

CLOSING:

इति गदितमशेषं त्रैपुरब्रह्मविद्या-
यजनजपहुतानां शास्त्रदृष्टं विधानम् ।
गुरुचरणसरोजाराधनाकाम्यमेतत्,
पशुषु परमगोप्यं भाविता सिद्धमन्त्रैः ॥ १ ॥

श्रीविद्यातत्त्ववेत्ता जगति करुणया धातकश्च शिवो यः,
स श्रीमान् सुन्दराख्यः क्षितिसुरतिलकः सच्चिदानन्दनाथः ।
तच्छिष्यः श्रीनिवासो द्रविडविषयजस्तत्प्रसादाप्ततत्त्वः,
श्रीविद्यानन्दनाथः परशिववचसा भाववेत्ता विधाय ॥ २ ॥

सौभाग्यरत्नाकरनामधेयं *सौभाग्यविद्यादिसुमन्त्ररत्नम् ।
अलङ्कृतं ग्रन्थतरं तरङ्गैः सुशोभितं शैवसुतत्त्वसङ्ख्यैः ॥ ३ ॥

अध्यापयन्नात्मविदात्मशिष्यानभ्यर्थितोऽन्यैरपि तानदुष्टान् ।
क्षेत्रे विमुक्ते शिवराजधान्यामास्ते निजाराध्यनिदेशवर्ती ॥ ४ ॥

यथा पित्रोर्मुदे भूयाद्बालशीलपरिभाषितम् ।
बालस्य महतामस्तु ममापि भणितं तथा ॥ ५ ॥

त्यक्त्वा कुलं कुलवधूः पुरमध्यवीथ्या
गत्वा कुलं मधु निपीय यथेप्सितं या ।
मत्ता परं पुरुषमेत्य तदीयसङ्गात्,
तुष्टा पुनः स्वकुलमेति पुनातु सा नः ॥ ६ ॥

श्रीविद्यानन्दनाथेन शिवयो प्रियसूनुना ।
कृते सौभाग्यरत्नाब्धौ षट्त्रिंशोगात्तरङ्गकम् ॥ ७ ॥

COLOPHON · इति श्रीसच्चिदानन्दनाथचरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीविद्यानन्दनाथेन कृते सौभाग्य रत्नाकरे षट्त्रिंशत्तरङ्ग. समाप्त । समाप्तोऽयं सौभाग्यरत्नाकर ।

Post-Colophonic संवत् १८६५ आषाढसुदि ७ सप्तम्यां भृगुवासरे लिख्यतां जवानकुमल श्री मजमेरगढनगरे ।

1728. कृष्णपूजापद्धतिः

OPENING श्रीगणेशाय नम ।

अथ विष्णुपूजन लिख्यते–श्रीकृष्णगुरुप्रीत्यर्थं षडङ्गन्यास चरणपूजनपूर्वकं ध्याना-ऽऽवाहनादि यथा मिलितोपचारद्रव्य श्रीकृष्णपूजनमहं करिष्ये ।

CLOSING इत पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तिमवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यां उदरेण शीश्नेन स्मृत । यदुक्त यत्कृत तत्सर्वं श्रीकृष्णा-र्पणमस्तु ।

COLOPHON इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीकृष्णाख्यभगवत्पूज्यपादपूज्यशिष्य श्रीपराश्रमेण वैष्णवतन्त्रोद्धारितश्रीकृष्णपूजापद्धति समाप्त ।

Post Colophonic लि गोवर्द्धन १८४२ कार्तिकसुद १०

1731. गणसिद्धिप्रकारः

OPENING श्रीराधावल्लभो जयति ।

अथ गणसिद्धिप्रकार. भरतसूत्रात् । तत्रादौ मगणविचार । मन्त्र —श्रीं श्रीं श्रीं लँ मगणगणाय नमः । अस्य मन्त्रस्य जाप १३००००० त्रयोदशलक्ष कमलबीजस्य मालया आषाढे शुक्ले तीज ३ अष्टमी ८ त्रयोदश्या १३ भौमवारे दिवसे चतुर्थप्रहरे पीतवस्त्र परिधाय पूर्वे न्यास कृत्वा जपेत् ।

CLOSING. अथ सर्वगणस्य प्रकार. । शान्तरसस्य सर्वे गणा । मार्गशीर्ष-पौष-माघ-फाल्गुन-मासा सर्वे गणाना पञ्चमी ५ दशमी १० पूर्णिमा १५ अमावास्या ०० सर्वे गणाना तिथि शेषविधिः सर्वपूर्ववत् ॥

1746. तारानित्यपूजाविधिः

OPENING: श्रीगणेशाय नम ।

तारां त्रैलोक्यतारां जडहृदयतमोदीपमालावतारां
धीरां वीरेन्द्रदेहमाग्रानुवि विनमत् कन्दकन्तोमुदाराम् ।
व्यहारां सर्वविवरदने वरांदातवयार्थधारां
सर्वां सर्वार्थदात्रीं विविधविधरैर्भूषिताङ्गीमुपास्ये ॥ १ ॥

सर्वाम्नायरहस्यानां ज्ञानदं वरदाननम् ।
श्रीविद्यानन्दनाथाङ्घ्रियुगं शिरसि धारयन् ॥ २ ॥

नित्यानन्दः साधकानां सिद्धये रचयत्यसौ ।
ताराकल्पलतानाम्नीं पद्धतिं सकलार्थदाम् ॥ ३ ॥

न विस्तृता न गूढार्था स्वतन्त्रोक्तक्रमोत्कटाम् ।
नित्यनैमित्तिके काम्ये कर्मण्यचिरसिद्धिदाम् ॥ ४ ॥

कृतसंज्ञाऽत्र मन्त्राणां श्रुतीनां संहितादिभिः ।
ताराविद्योपयुक्तानां स्वतन्त्रमिति लाघवात् ॥ ५ ॥

निःसन्दिग्धः स्वतन्त्रस्थो यथा ज्ञातो गुरोर्मुखात् ।
ध्यानं स्तुतिः तथाचारो मन्त्रोद्धारः फलं तथा ।
मयाऽन्यत् सकलं श्लोकैः स्वतन्त्रोक्तंविलिख्यते ॥ ७ ॥

CLOSING तततो मूलविद्यया प्राणायामत्रयं ऋष्यादिकरषडङ्गन्यासांश्च कृत्वा श्रीगुरुं प्रणम्य मूलेन निर्माल्यं शिरसि धृत्वा नैवेद्यादिकं भक्तेभ्यो दत्वा स्वयं भुक्त्वा स्वात्मानं देवीरूपं भावयन् सुखं विहरेत् । इति श्रीमदुग्रतारानित्यपूजाविधिः ।

COLOPHON इति श्रीविद्यानन्दनाथाख्यश्रीश्रीनिवासाचार्यशिष्येण नित्यानन्दनाथाख्यनारायणभट्टेन विरचितायां ताराकल्पलतायां नित्यपूजाप्रयोगरूपः प्रथमः प्रतानः ।

Post Colophonic: सं० १८८८ मार्गशीर्षशुक्ल ६ शनौ मगनीरामेणालेखि कृष्णगढमध्ये स्वाध्ययनाय ।

1648. दक्षिणाकालीपद्धतिः

OPENING. श्रीगुरुभ्यो नमः ।

वन्दे गुरुं ज्ञानमयप्रकाशं मुक्तिप्रदानं भवभोगहेतुम् ।
चिच्छक्तियुक्तं वरदाभयाढ्यं भवं भवा(नी)सहितं नमामि ॥ १ ॥

चित्प्रकाशं गुरुं नत्वा पूर्णानन्दैकनि(वि)ग्रहम् ।
क्रियतेऽनन्तदेवेन दक्षिणाकालिपद्धतिः ॥ २ ॥

CLOSING ततः सर्वशेषं गृहीत्वा ओं ऐं उच्छिष्टचाण्डालिनी मातङ्गी सर्ववशकरी स्वाहा । इत्यनेन शेषिकायै बलिं निवेदयेत् । ततः सर्वेषां भोजनताम्बूलदक्षिणादिभिः सन्तोष्य यथासुखं विहरेत् ।

COLOPHON इति दायदेवसम्प्रदायिना मायापुरस्थितेन अनन्तदेवेन विरचिते दक्षिणाकालीमहापूजाविवरणं नाम तृतीयोल्लासः ॥३॥

Post Colophonic सवत् १८७२ का भाद्रवामासे शुक्लपक्षे तिथौ ३ गुरौ मगनीरामेणालेखि मेडतामध्ये । स्वाध्ययनाय ।

1772. बालात्रिपुरा-सामान्यपूजापद्धतिः

OPENING - श्रीगणेशाय नमः । श्रीबालात्रिपुरायै नमः । श्रीदत्तात्रेयसद्गुरुभ्यो नमः ।

श्रीमन्मृत्युसद्गुरुभ्यो नमः ।

विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥१॥

CLOSING सर्वानन्दकरं सदाशिवपदं ह्यैश्वर्यमुक्तिप्रदं,
साम्राज्यं सुखदं मनोरथकरं ह्यज्ञानविध्वंसनम् ।
आयुः कान्तियशोविवर्द्धनकरं संसारमोहच्छिदम्,
पात्रं यः नवनादराचितनवमं प्रौढप्रतापोदितम् ॥६॥

COLOPHON इति ... माधवाचार्यविरचिता श्रीबालात्रिपुरासामान्यपद्धतिपूजास्तुतिः सम्पूर्णम् ।

Post-Colophonic संवत् १६१२ मिती श्रावणमास कृष्णपक्षे तिथौ १० दशम्यां ... ताया लिखितं कवीश्वर मगनीरामेण अजमेरमध्ये ।

1775. बालार्चनचन्द्रिका

OPENING : श्रीगुरुगणपतिवटुकइष्टदेवताशारदा ... नमः ।

अथ बालार्चनचन्द्रिकाग्रन्थो लिख्यते —तत्रादौ बालामन्त्रोद्धारः ।

CLOSING & COLOPHON इति ... बालार्चनचन्द्रिकायां पञ्चमः प्रकाशः ॥५॥

... लिख्यते । × × × × × × × इति ... संहितायां बालापद्धतिः समाप्ता ।

1799. श्यामा-यन्त्रध्यानविवरणम्

OPENING अथ यन्त्रविवरणं लिख्यते— बिन्दुत्रिकोणं पञ्चवर्तुलं अष्टदलभूपुरं । बिन्दु ब्रह्म । त्रिकोणं ... वा ब्रह्मादित्रयस्वरूपं च । पञ्च-... । अष्टदल-अष्टदिग् पूर्वादि । वर्तुलं सर्वविश्वव्यापकरूपं । भूपुरं पृथ्वीरूपं । ... म । एवं यन्त्रविवरणं इति ।

CLOSING : श्यामा श्यामस्वरूपा वै भक्तानां हृदि संस्थिता ।
करोमि सततं ... भक्तानां ... ॥१०॥

एवं सूक्ष्मरूपं गायत्र्याश्च ध्यात्वा स सर्वज्ञानी भवति ।

COLOPHON - इति ... समाप्तम् ।

Post Colophonic लि ... १८७२ ... संवत्सरे पौष ... १० बुधे हरिदुर्गे ।

1811. अभयकुमारचरितम्

OPENING

नम सर्वज्ञाय। अर्हम्।

आदौ धर्मोपदेष्टार केवलालोकभास्करम्।
सुरासुरनत वन्दे श्रीनाभेयजिनेश्वरम्॥ १॥

हरयोऽपि नमस्यन्ति येषा पादान् बनानिशम्।
तेऽन्येप्यजितनाथाद्या जयन्ति जिनकुञ्जरा॥ २॥

X X X

श्रीजिनेश्वरसूरीन्द्रो जङ्गम कल्पपाद.।
विबुधै सेवित. सोऽय पूरयत्वभिवाञ्छितम्॥ १०॥

अनेकाद्भुतशान्तादिरसनीरसरोवरम्।
श्रीअभयकुमारस्य चरित कीर्त्तयाम्यहम्॥१५॥

CLOSING & COLOPHON

इति श्रीजिनपतिसूरिपट्टलक्ष्मीभूषण-श्रीजिनेश्वरसूरिशिष्य श्रीचन्द्रतिलकोपाध्याय-विरचिते श्रीअभयमहर्षिचरिते अभयाङ्के अभयकुमारदीक्षोत्सवनन्दीव्रतग्रहणमोक्षगमना-भयकुमारदेशनाकरणसर्वार्थसिद्धिगमनवर्णनो नाम द्वादश सर्ग समाप्त॥ समाप्तमेद अभयकुमारमहर्षिचरित्रम्। ग्र ७२५ अ १३।

इत्य मयाऽभयकुमारमहर्षेश्चरित्र मिथ्यात्वपुष्टतरकमल ' चित्रम्।
श्रोतृप्रमोदभरदायि सदा पवित्र प्रोक्त स्वशक्तिमनपेक्ष्य विचित्रचित्रम्॥१॥

श्रीजिनपालोध्यायवृता नि प्रेरणामहम्।
चरितकरणे प्राप सरस्वत्युपदेशवत्॥ ४१॥

सुशकुनमिवास्मि तन्मनो इङ्गितामान्वित।
काव्याभ्यासविहीनोपि व्यधा कार्य्यमिद तत॥ ४२॥

वाग्मी तर्कज्ञवैयाकरणगणमणि पीतसिद्धु '',
साहित्याध्वाध्वनीनो निरपमकवितानर्तकी रङ्गभूमि।
व्याख्याताऽत्राश्रुतद्व्याश्रयविषममहाकाव्ययुग्मस्य नाना—
ग्रन्थस्रष्टा च लक्ष्मीतिलकगणिमुनिर्वाचनाचार्यवर्य॥४३॥

द्व्याश्रयटीकाकारी द्विव्याकरण सुदृष्टसाहित्य।
सुकविरभयतिलकगणिश्चाशोधयतामिद शास्त्रम्॥ ४४॥ युग्मम्।

परोपकृतिशीलनसुधिया धर्मबन्धुना।
गणिनाऽशोकचन्द्रेण लिखिता प्रथमा प्रति॥ ४५॥

श्रीनाभेयजिनेन्द्रादितुङ्गप्रासादभूषिते।
श्रीवाग्भटमेरुपुरे प्रारम्भि चरित मया॥ ४६॥

श्रीमद्वीसलदेवगुर्जरधराधीशेऽधिपे भूभुजा,
पृथ्वी पालयति प्रतापतपने श्रीस्तम्भतीर्थे पुरे।

षण्मुशीतकरे त्रयोदशमिते (१३१२) संवत्सरे वैक्रम
वार्ष्य मब्धतम समर्थितमिदं दीपोत्सवे वासरे ॥४७॥

पृथ्वीप्रस्थानतस्य शिखरिभुवगिरिश्रेष्ठवक्त्रः प्रतीची,
प्राचीपायोधिमग्नाद्रितवररतनिकरेन्दुनत गरस्च।
वप्रप्राकारनारोच्छ्रितफलकरनस्तुम्नहेमप्रमानूत्,
दूपस्ततोद्युगङ्गाप्रवरसितपटाधिष्ठितो देवतामि ॥४८॥

श्रीजिनेश्वरसूरीणां विनेयो लब्धशालिनाम्।
यस्याः प्रशस्तौ शास्ताना श्रीकुमारगणिः कवि ॥४९॥*

Post Colophonic संवत् १६६२ ना माहावदि १३ ने वार बुधवार।

1817. किरातार्जुनीयम् 'घण्टापथ' टीकासहितम्

OPENING (Ont 8)

× × × मेति विभा कृत्वा नयेन नीत्या वितन्वते विस्तार्यते ॥ ६ ॥
सम्प्रति भृत्यादिषु अनुरागमाह—सखीति।

CLOSING. ममहार्येति। जयित्व जयशील उदयमस्तकलाकस्य अन्यत्रोदयमुदयाद्रिमाप्य × × × साधुनाहामाप्नोतीति तुष्टुवु। शिवस्तोत्रं नन् ॥४८॥

इ[ति]महोपाध्याय-कोल[?चा]चल मल्लिनाथसूरिविरचिताया किरातार्जुनीय-व्याख्यायांघण्टापथसमाख्यायामष्टादश सर्गः।

Post Colophonic संवत् सप्तदशमाशादि एकोधिकत्रिंशत्तमेवर्षे दक्षिणायनगते चुनरौ मासश्रावणे कृष्णपक्षे द्वितीयाया तिथौ गुरुवासरे श्रीमत्सरोवासन्न जानी० जीवाएम्ब सुतन प्रेमजिदाश्रेन पुस्तकमिदमलेखि।

1823 कुमारपाल-चरितम्

OPENING:

चिदानन्दैकवन्द्याय नमस्तस्मै परात्मने।
शिवश्री रमते यस्मिन् हंसीव सरसीरहे ॥ १ ॥

× × ×

अनादिसंसारस्वेन तेषु स्तुष्टयोस्ति वस्तुन।
कुमारपालभूपालो धाम्ना दिक्ष्वेषु चाद्रवन् ॥ ११ ॥
तस्यास्य चरितं किञ्चिद् वक्ष्यहं स्वबुद्धया।
प्रेरितस्यद्गुरुमामरासरोविदसम्पदा ॥ १२ ॥

*This praśasti in 48 verses was composed by Shri Kumāra Gaṇi p/o Śri Jineśvara Sūri in the first half of the 14th c. It contains the genealogy, other religious works and descriptions of the pilgrimages performed by Khetā with many important historical evidences. The work has been published by Messrs Hirālāla Hamsarāja of Jāmanagar.

CLOSING & COLOPHON — इति श्रीकृष्णर्षीय-श्रीजयसिंहसूरिविरचिते परमार्हतश्रीकुमारपालचरिते महाकाव्ये श्रीकुमारपालस्वर्गगमनवर्णनो नाम दशम. सर्ग ।

इति ग्रन्थकृत्प्रशस्ति ।*

Post-Colophonic — सवत् १४६२ वर्षे आसोसुदि १४ दिने वार गुरौ श्रीकुमारपालचरित सम्पूर्ण-मिद । ठा० महिराजेन लिखितम् ।

1825. कुमारसम्भवम्

OPENING. — श्री नमो गणेशाय ।

अस्त्युत्तरस्या दिशि देवतात्मा हिमालयो नाम नगाधिराज ।
पूर्वापरौ तोयनिधी वगाह्य स्थित पृथिव्यामिव मानदण्ड ॥ १ ॥

COLOPHON: — इति श्रीकुमारसम्भवे महाकाव्ये श्रीकालिदासकृतौ सुरतवर्णनो नाम अष्टम सर्ग समाप्त ॥ ८ ॥

Post-Colophonic — स्वस्ति सवत् १४३१ वर्षे द्वितीयश्रावणसुदि १४ शुक्रे अद्येह मूसुरडीग्रामे राज श्री ······ ल्लप्रतिवृत्तौ मेदपाटज्ञातीय प० राउलसुत प० राघवेण कुमारसम्भव काव्यपुस्तको लिखितम् ।

× × ×

आचार्यसदाफलसुत श्री । दामोदरसुतस्य विभागो । देवजी ।

1833. कुमारसम्भव-टीका

OPENING (On f 2A) — × × × × रेति । यत्र यस्मिन् हिमाद्रौ भूर्जत्वचे भूर्जवृक्षवल्कलानि विद्याधर-सुन्दरीणा विद्याधराङ्गनाना अनङ्गलेखक्रियया × × × × × × हरितालादेरेव अत्र ग्रहणम् ॥ ७ ॥

CLOSING & COLOPHON — इति श्रीमालान्वयसाधुश्रीशालिगनन्दनसाधुश्रीअरडकमल्लसमभ्यर्थितखरतर-गच्छीयनरवेषसरस्वतिवाचनाचार्य-श्रीचारित्रवर्द्धनविरचिताया कुमारतात्पर्यदीपिकायां शिशुहितैषिण्या सप्तम सर्ग ।

वशे श्रीजिनवल्लभस्य सुगुरो: सिद्धान्तशास्त्रार्थविद्
दर्पिष्ठप्रतिवादिकुञ्जरघटाकण्ठीरव सूरिराट् ।
नानानव्यसुभव्यकाव्यरचनाकाव्यो विभाव्यामल
प्राज्ञो विज्ञनतो जिनेश्वर इति प्रौढप्रतापोऽभवत् ॥ १ ॥

× × ×

श्रीवीरशासनसरोरुहवासरेश सद्धर्मकर्मकुमुदाकरपूर्णिमेन्दु ।
वाचस्पतिप्रतिमधीर्नरवेषवाणीश्चारित्रवर्द्धनमुनिर्विजयी जगत्याम् ॥१३॥

---

*There is a long Praśasti of Jayasimha Sūri, the author, in the end The work has been published.

श्रीनानवसहलो डोडागोत्रे पवित्रगुणपात्रम् ।
समजनि जगतूश्रेष्ठी विशिष्टवर्गो वरिष्ठयशाः ॥ १४ ॥

X X X

भरटकमल्लस्तुर्यो वर्यो धुर्यं सतामभासुवं ।
सत्वार्यो धर्मनना मनोहरः सकललननानाम् ॥ २१ ॥

X X X

एतेनाऽभ्यर्थितोऽत्यर्थं मुनिश्चारित्रवर्द्धनः ।
कुमारकाव्यविवृतिमकार्षं मन्दधीरपि ॥ २४ ॥

गम्भीरार्थकुमारसम्भवमहाकाव्यस्य टीका मया,
वर्षे विक्रमभूपतेर्विरचिता दृग्नन्दमन्वह्निते (१४९=) ।
माघे मासि सिताष्टमीसुरगुरावेपोऽञ्जलिर्वो बुधाः,
सशोध्या क्वचिदन्यथा यदि भवेद् युष्माभिरेव स्फुटम् ॥२५॥

श्रीमद्भिर्वाचनाचार्यैः कृता चारित्रवर्द्धनैः ।
ग्रन्थसंख्या ···· ······ ···· द्विसहस्रिका ॥ २६ ॥

चारित्रवर्द्धनाचार्यवर्यैर्विरचिता कुमारकाव्यटीका चिरं नन्दतात् ।

Post-Colophonic संवति १८०५ वर्षे चैत्रसुदि १४ दिने लिखिता प्रतिरियमतिसरवगतया ज्वटाभिधेन ।

1873 पद्मानन्दकाव्यम् (जिनेन्द्रचरितम्)

OPENING मेरुस्नात्रभवैः सकुङ्कुमपयःपूरैः परीतोऽभवत्,
पीतत्वेन सुवर्णपर्वत इति ख्यातिं जगाम क्षितौ ।
देवीनृत्यविशीर्णहारमणिभिस्ताराभिमतस्तारका-
धारोऽस्माविति यज्जनिव्यतिकरे सोऽव्यादृषाद्धः प्रभुः ॥१॥

CLOSING विश्वेशस्य मतिश्रुतावधिमयज्ञानत्रयस्याश्रय,
प्रद्युम्नो नमन प्रवेष्टुमनसश्शैशवचीरोऽपि सन् ।
विश्वस्यामवदोवनं जनिताऽवष्टम्भसरम्भत-
स्तद्धामाद्भुतपाणिपीडनमहःप्रस्तावनावासना ॥ १७२ ॥

COLOPHON इति श्रीजिनदत्तसूरिशिष्य-सरस्वतीकण्ठाभरणवेणीकृपाणापरनामपण्डितश्रीमदमरचन्द्रविरचिते श्रीपद्मानन्दापरनाम्नि श्रीजिनेन्द्रचरिताभिधाने महाकाव्ये वीराङ्के श्री आदिनाथचरिते प्रभुबाललीलादिवर्णनो नाम सप्तमः सर्गः समाप्तः । ग्रन्थाग्र. श्लो० संख्या ७२१ ।

1875. पाण्डव-चरितम्

OPENING ॐ नमः वीतरागाय ।

श्रिय विश्वत्रयत्राणनिष्ठाः पुष्णातु वः प्रभुः ।
यद्वृक्षः पुण्डरीकाक्षः श्रीमन्नाभिकुलोद्भवः ॥ १ ॥

X X X

चरित्रं पाण्डुपुत्राणां पवित्रमभिदध्महे ।
श्रुतं हितोपदेशाय यज्जने पर्यवस्यति ॥ ५ ॥

CLOSING & COLOPHON इति मलधारिश्रीदेवप्रभसूरिविरचिते पाण्डवचरिते महाकाव्ये बलदेवस्वर्गगमन-श्रीमन्नेमिनाथ-पाण्डवनिर्वाणवर्णनो नाम अष्टादश सर्गः ।

श्रीकोटिकाख्यगणभूमिरहस्यशाख्या-
या मध्यमेति विदिता विटपोपमेऽस्या ।
श्रीप्रश्नवाहनकुले सुमनोभिरामः ।
ख्यातोऽस्ति गुच्छ इव हर्षपुरीयगच्छ ॥ १ ॥

तत्राऽजनि श्रुतसुधाम्बुधिरिन्दुराचि-
स्वद्विष्णुकीर्त्तिविभवोऽभयदेवसूरि ।
शान्तात्मनोप्यहह निस्पृहचेतसोऽपि,
यस्य क्रियाऽखिलजगज्जयिनी बभूव ॥ २ ॥

× × ×

तेषां कल्पतरुस्त्रिविष्टपगवाचिन्तासमर्वैहासिका-
दादेशा क्वचि मार्गवल्गनकलानैपुण्यश्चान्यैरपि ।
श्रीदेवप्रभसूरिभिर्मुनुभुवा पाण्डोश्चरित्रं किम-
प्येतत्तद्विबुधादिशिष्यहृदयोल्लासार्थमग्रथ्यत ॥ ६ ॥

श्रीयशोभद्रसूरीणां तथावव्यापृतादृशा ।
यथैतदगमत् सर्वविद्वल्लोकावलोक्यताम् ॥ १० ॥

ज्ञानैक ' य मूर्तीनामस्मिन्न च रमान्विते ।
श्रीनरचन्द्रसूरीणां प्रज्ञया केन वार्यितम् ॥ ११ ॥

प्रीत्याप्तलोकत्रनैव ग्रन्थोऽनन्यातिशे ।
कर्त्तुमातिथ्यमर्हन्ति ग्रन्थस्यास्य मनीषिणः ॥ १२ ॥

1878. पाण्डव-चरित्र-संक्षेपः

(पाण्डवचरित्रोद्धार.)

OPENING ॐ नमः ।

श्रीदेवला श्रीयुगादिनाथाय । पाण्डवानां चरित्रं गद्यबन्धेन लिख्यते—अस्मिन् भरतक्षेत्रेऽस्यामवसर्पिण्यां पूर्वं श्रीआदिदेवोऽभूत ।

CLOSING : & COLOPHON पाण्डवचरित्रात् सक्षेपपाण्डवचरित्रोद्धारो लिखित ।

अर्हन्तो विशदद्युतिः किसलयच्छायाश्च सिद्धासि मे,
आचार्यास्तपनीयवर्णरुचय. प्रियङ्गुप्रभा वाचका ।
वैडूर्याञ्जनकान्तकान्तकलिता वाचयमा सद्यमा,
पञ्चैते परमेष्ठिन प्रददतां स्वान्तेष्टसिद्धि सताम् ॥१॥

× × ×

तेषा पुण्यपविनिताात्मजनुषा शिष्टैवरेखाजुषा (पा),
श्रीमत्पाण्डुनरेशितुस्तनुभुवा श्रागसूरिसत्रितान् ।
श्रीवृत्तादवगाह्य वा · रनिस सक्षेपस्च्यातम ··,
सम्बन्ध सु···धये कमपि · वक्षे समासादहम् ॥ ३ ॥

Post -Colophon इति भद्रम् । गणि·· रीडा सिगु रत्नहर्षेण लिखितम् ।

1879 प्रद्युम्न-चरितम्

OPENING श्रीपार्श्वमानम्य ।

श्रीमन्त सन्मति नेमिनाथ जिनेश्वरम् ।
विश्वजेताऽपि मदनो बोधितु नो शशाङ्कयम् ॥ १ ॥

× × × ×

यदुक्त सूत्रे विद्वद्भिर्महसेनादिसूरिभि ।
तस्वय शक्यते नून मया बालेन भाषितम् ॥ ४ ॥

तथापि तत्क्रमाम्भोजप्रणामार्जितपुण्यत ।
श्रीप्रद्युम्नाभिध ग्रन्थ प्रवक्तु मे श्रमो नहि ॥ ५ ॥

CLOSING नन्दीतटाख्ये विमल सुगच्छे श्रीरामसेनो गुणवारिराशि ।
बभूव तस्यान्वयशाभकारी श्रीरत्नकीर्तिर्दुरितापहारी ॥६६॥

× × ×

श्रीभीमसेनस्य पदप्रसादात् सोमादिशत्कीर्त्तियुतेन भूमौ ।
रम्य चरित्र वितत स्वभक्त्या संशोध्य भव्यै पठनीयमेतत् ॥ ६८ ॥

सवत्सर सत्तिथिसज्ञके वै वर्षेत्र त्रिशैकयुते पवित्रे ।
विनिर्मित पौषसुदेश्च तस्या त्रयोदशी या बुधवारयुक्ता ॥ ६९ ॥

× × ×

चतु सहस्रसख्यान मार्द्ध चाष्टशतैर्युत ।
भूयात् सतत जीयाच्छ्रीमज्जैनप्रसादत. ॥ ७२ ॥

COLOPHON इति श्रीप्रद्युम्नचरिते श्रीसोमकीर्त्त्याचार्यविरचिते श्रीप्रद्युम्नशाम्ब-प्रनिरुद्धादि-निर्वाणगमनो नाम षोडश सर्ग ॥ १६ ॥ पूर्णम् ।

Post -Colophon श्रीपूज्यहरजीवपदप्रसादात् प्राप्त चरित्र निजधर्मलीलाम् ।
मर्म्योपकारो कुशलोमपुस्तक स्वात्मार्थमुक्तंपि लिपीकृतेन ॥ १ ॥

सवत्सरे दशगण्नसहस्रेचि वर्षे नवत्वेरविराजितोपि ।
पूर्ण कृत भाद्रसुदेश्च तस्या प्रतिपत्तिथौ या गुरुवार युक्तो ॥ २ ॥

उदयास्तपर्यंत दशश्लोकोत्तरेषु च ।
सर्वे दिनदच मध्योऽस्य नगरसर्हदि उच्यते ॥ ३ ॥

यथैव प्रीतिसुलक्ष शास्त्रे सेय तु कुशमम् ।
हमरतु गाव त्रिदेव लिखामि पुस्तकं मिदम् ॥ ४ ॥

1881. प्रद्युम्नचरित-काव्यम्

OPENING · प्रणतमानवदानवनायकं प्रथमतीर्थपतिं शिवदायकः ।
विजितदुस्सहमन्मथसायकं प्रकुरुता मतिमस्तकपायकं ॥ १ ॥

CLOSING वराष्टमाङ्गं चरितं च नेमेर्माहात्म्यमुद्यद्विमलाचलस्य ।
दिगम्बराणां चरितं विलोक्य प्रद्युम्नसंज्ञं विदधे चरित्रम् ॥ १४ ॥

पठिष्यति श्रोष्यति वाचयिष्यत् पदस्चरित्रं शुभभावतो य ।
तस्यैहिकामुष्मिकमङ्गलानि प्रादुर्भविष्यन्त्यतुलानि नित्यम् ॥ २५ ॥

COLOPHON इति पण्डितचक्रचक्रवर्त्ति-पण्डितश्रीराजसागरगणिशिष्य—प० श्रीरविसागरगणि विरचिते श्रीप्रद्युम्नचरित्रे श्रीप्रद्युम्नशाम्बतप.करणकेवलज्ञानोत्पत्तिनिर्वाण[ग]मनो नाम षोडश सर्ग ॥ १६ ॥

तस्मिन् माण्डलिनाम्नि चारुनगरे खगाररराजोत्तमे,
सम्पूर्णं समजायताग्रचरितं प्रद्युम्ननामा घनम् ।
सख्यातश्च सहस्रसप्त[कं]मिदं द्वाभ्यां शताभ्यां शुभं,
पञ्चाम्भोनिधिषण्निशापतिमिते वर्षे चिरं नन्दतात् ॥१॥

इति प्रद्युम्नचरित्र सम्पूर्णम् ।

ग्रन्थाग्र सर्वसख्या ७००० । २०० [७२००]

Post-Colophonic उत्सवयालेखि सम्पूर्णं जातं अहमदावादनगरे

1883. भक्तिचन्द्रः 'किरणमाला' टीकासहितः

OPENING · श्रीमगणाधिपतये नमः । श्रीजंयति ।

सर्वान् गीर्वाणमङ्गानिह परिघटयन् पर्वणा पूर्वकान्तीन् ,
वर्णावर्णाम्युदीर्णद्युतिरमृतमयोपर्णया वर्ण्यमान ।
व्यास व्यासक्तचित्तार्पितनवविभवः प्राचिरात् प्राचितार्थ ,
शम्भु शम्भुव्युदग्रं कलयतु भगवान् भावभृद्भावकानाम् ॥ १ ॥

गणपतिमतिसुन्दराङ्गमीशं भजदभयप्रदमम्बिकात्मजं तम् ।
निखिलसुरनिकायवन्द्यमानं जगदुदयस्थितिभङ्गहेतुमीडे ॥ २ ॥

टीका किरणमालाख्या भक्तिचन्द्रे विरच्यते ।
पाठादेव भवेद् यस्यास्तस्यार्थप्रत्यय. स्फुट. ॥ ३ ॥

अथ निखिलकविमण्डलाखण्डल श्रीहरिहरदेवशर्माभिधान कविर्हरिहरभक्तिचन्द्र-नामाऽयं षोडशकलं काव्य निर्मिमाणस्तदादौ गौरीहरात्मकमेकं तत्त्वं वर्णयन् मङ्गल-माचरति-ससारमूलमिति ।

ससारमूलं परमार्थकारणं सुवर्णकर्पूरसमानमव्ययम् ।
आनन्दकन्दं सदनादिचिन्मयं स्त्रीपूरुषाकारमहं भजे महः ॥ १ ॥

[पञ्चदशीकलायाम्]

CLOSING

राधिके तव गतिं भुवि हंसी शिक्षितुं प्रयतते नितपक्षा।
कोकिल किल पठनपि वाच, मेचको मुखसुधांशुविरोधी ॥ १५ ॥

राधिके इति । हे राधिके ! हंसी मराली भुवि तव गतिं शिक्षितुं प्रयतते । × × × × × × वदनचन्द्रस्तमपराधिनं मने, तेनास्मौ पापवान् श्याम इति भाव. ॥ १५ ॥

1884. युधिष्ठिरविजयमहाकाव्यं सटीकम्

OPENING

श्रीवीतद्विषे नम ।

[पञ्चम आश्वास]

अभयवरो धीप्रचारो यो देवो हृतनमन्तपातरप्रवर ।
वामे भागे सशिव पायात् सर्वदा न शिव ॥ १ ॥

अथार्जुनस्य त्रिदिवयानानन्तर युधिष्ठिरादीनामुदन्त वर्णयन्नाह –

अथ नरदेवनिदेशात् पार्थे सम्प्राप्तसुरपदज्वनिदशान् ।
तापसवशमवन्तस्तन्वाना शत्रुपरिभव समवदन्त ॥ १ ॥

CLOSING & COLOPHON

इति श्रीमहाकविवासुदेवविरचित युधिष्ठिरविजये महाकाव्ये कश्मीरदेशवास्तव्य-महामाहेश्वर विपश्चिद्वर राजानकश्रीशङ्करकण्ठात्मज राजान[क]रत्नकण्ठविरचिताया शिष्यहिताभिधानाया टीकायां भीष्मसेनापतित्व-अर्जुनसेनापतित्वाभिषेक धृतराष्ट्रयुयुत्सुमत्व पाण्डवाश्रयणयात्स्यमानाप्रस्थितबन्धुदर्शन[नो]त्पन्नार्जुनौदासीन्यश्रीकृष्ण-तत्प्रतिबोधनलीला तदथरूप-भीष्ममहासङ्ग्रामवर्णन-युधिष्ठिरादियाचितात्मवधस्तो-पायवर्णन भीष्मवधार्जुनकृततदुपयोगोपधानतच्छरशय्यानिवेदनार्जुनशरोत्पादितभूगर्तजलो-त्पत्तिवर्णन - द्रोणाचार्यसेनापतित्वाभिषेक - द्रोणाचार्यवाक्य - दुर्योधनयाचितयुधिष्ठिर-बन्धनार्जुनविनाकृतयुधिष्ठिरबन्धनरूपद्रोणप्रतिज्ञावर्णनापनयनार्थं-संशप्तकगणतदपनयन-भीमसेनसङ्ग्रामवर्णन-भगदत्तयुद्धार्जुनकृतभगदत्तवधास्तवर्णन - द्रोणाचार्यकृतचक्रव्यूह-जयद्रथकृतयुधिष्ठिरादिपाण्डवचतुष्टयरोध - द्रोणकर्णादिहतकृताभिमन्युवधार्जुनागमन-तद्विलापार्जुनकृतजयद्रथवधप्रतिज्ञा - द्रोणकृतजयद्रथरक्षाप्रतिज्ञा - भूरिश्रवोवधार्जुनकृत-जयद्रथवधराजयुद्ध कर्णकृतघटोत्कचवध-धृष्टद्युम्नकृतद्रोणवध-सूर्यास्तमयवर्णन सप्तम आश्वास ।७।

श्रीपरमात्मने नम ।

वेलाम योग गा रक्षन् यति धारयति श्रमो गङ्गाम् ।
जन्मिभयोल्लासहर माया विदधस्तुत न हर ॥ १ ॥

1895 रघुवंशमहाकाव्यं सलघुटीकम्

OPENING

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
[ज]गत पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ १ ॥

अह पार्वतीपरमेश्वरौ वन्दे । उमामहेश्वरौ नमस्करोमि । पार्वती च परमे[श्वर] श्च पार्वतीपरमेश्वरौ । किमर्थं वागर्थप्रतिपत्तये । × × × × × × × × पार्वती- निर्पाति पालयति पार्वतीपरो महेश्वर मा लक्ष्मीस्तस्या ईश्वरो मेश्वर., पार्वती परमेश्वरश्च पार्वतीपरमेश्वरौ ॥ १ ॥

(On f 24) तत्र श्रीकालिदासकृतौ रघुमहाकाव्ये जनार्दनकृतौ टीकायां तृतीय : सर्ग ।

× • × ×

CLOSING & COLOPHON: तं भूत्यर्थम् । ततोऽनन्तर राज्य राज्ञा विदधतः । कारयामास । कैः सार्द्धं मौलं मन्त्रिवरैः स्थविरसचिवैः सार्द्धम् । कि ष्टा सा राज्ञी हेमसिंहासनस्था । राज्ञी कि कुर्वाणा तं गर्भं गूढान्तर्गूढं दधाना । किमर्थ(र्थं) प्रजानां लोकानां भूत्यर्थं । × × × × × × राजा मर्तुं माज्ञा गर्वी इव ॥५८॥

इति कृता कालिदासरघुवंशे राज्यप्रतिष्ठासन्धानो नामैकोनविंशतिम. सर्ग ॥१९॥

1901 रघुवंश-टीका

OPENING [विशेषार्थबोधिका]

ध्यात्वा तां ब्रह्मपुत्रीमधिकमघगमं तन्वती दत्तपद्मा ,
सेवामप्राप्तदेवासुरविमरशिरोमौलिघृष्टाङ्घ्रिपद्माम् ।
मस्या सन्मुग्धदुग्धोज्ज्वलममलयशः श्रोतुमघट्टवासी ,
वाजो दग्धेऽष्टकाष्ठावधिषु सरमस गौतमाशाङ्गनाभि ॥ १ ॥

दिनकर-वल्लभ-चारित्रवर्द्धनाग्रिम-जनार्दनाभिमुख्यैः ।
कविभिर्विहिताः स्वहितास्तद्वृत्ती. प्रथममुपजीव्य ॥ ५ ॥

कुर्वे श्रीरघुवृत्तिं नव्या मव्यार्थदीपनपटिष्ठाम् ।
प्राप्य श्रीगुरुचरणादेश शिष्यप्रबोधकृते ॥ ६ ॥

यद्यप्यन्वयरहिता पूर्वेषां वृत्तयो विशेषयुताः ।
तदपि तदेकीकरणादत्रायासोऽस्तु मे सफल ॥ ७ ॥

वागर्थेति—

CLOSING & COLOPHON: इति श्रीमत्बृहत्खरतरगच्छीयवाचनाचार्यप्रमोदमाणिक्यगणिशिष्यसत्यावनमुख्य श्रीजयसोमगणिनच्छिष्यश्रीगुणविनयगणिकृतायां विशेषार्थबोधिकाख्यायां श्रीरघुवंशवृत्ता- वेकोनविंश. सर्ग ।

श्रीमत्खरतरगच्छे पुरा परा सूरय. पराशोभ्याः
श्रीमदभयदेवार्या वर्यगुणावात(वदात) सौन्दर्या. ॥ १ ॥

× × ×

तेषां वाचकमुख्या गुणरंगाख्या अमी विशदपक्षाः ।
सदयारङ्ग[ः] शिष्या जयसोमाह्वास्तया भान्ति ॥३॥

तेषा शिष्येरोय विपुला वृत्ति विशिष्यस्मिथ्यारणाम्।
पठनायाऽरऽमनसा रचिरा गुणविनयमणिसुधिया ॥ ६ ॥

× × ×

श्रीसूर्यवशीयनृपावतसान् प्रशसितोऽभूद् भवत भुवरा ।
श्रीरामचन्द्रादिनृपा जितेन्द्रिया यत्राऽभवस्तत्र विमद्भुत वः ॥१४॥

× × ×

भूचक्रचक्रवर्तिन्युदारतत्त्वाधिकारनिष्पन्ने ।
विजयिनि श्रीमदकब्बरभूशके मान्यविबुधजने ॥ १८ ॥

श्रीसाहिलब्धमानश्रीमज्जिनचन्द्रसूरिराजानाम् ।
विन्यस्य शिरसि सरसाशेषामिव सद्विशेषयुता ॥ १६ ॥

विश्वमवो रसहरिभृजरससरशीवर्षे जनोत्सवोत्सर्वे ।
श्रीमद्विक्रमनगरे विहितेय विमलननिगम्या । २० ॥ (युग्मम्)

श्रीपार्श्वनाथस्य परप्रसादात् सकलिपतामीप्टविधायिनाम्न ।
निर्विघ्नमेषा लघुसिद्धिमाप श्रीराघवीवृत्तिरनिन्द्यवृत्ता ॥ २१ ॥

श्रीजिनदत्तगुरूणा श्रीमज्जिनकुशलसूरिराजानाम् ।
सौम्यदृशा शुभदा स्तात् विद्वद्भिर्वाच्यमानेयम् ॥ २२ ॥

इति श्रीराघवीवृत्ति समाप्ता । ग्रन्थाग्र० ६०००

1905· रघुवंशादिकाव्यदुर्घटसाधनम्

OPENING

भगवते नम. ।

श्रीज्ञानिनिमित्तवामन्यदनुवतनुच्छ्रयोदयालम्बिन ,
.. .. .. रसातले दितिसुतो द्वे पाद् बलिलीलया ।
दन श्रीडनलेवरेण वसुधामनापूताम्भोनिधि-
तस्मै वनमधे निवृत्तमधुवे नित्य नमो विष्णवे ॥ १ ॥

ज्ञात्वा पाणिनिशास्त्रमद्भुततम दृष्ट्वाथ वा मता ,
वाला पञ्चसमस्तकाव्यनिचय पातोद्य पारायणम् ।
धातोर्दुरिमनुरामा तदपर नाम्ना च पारायरा ,
वैद्यो दुर्घटसाधन वितनुते श्रीराजकुण्डः कवि ॥ २ ॥

रघ्वादिषु प्रबन्धेषु कारके सुप्तिजास्तथा ।
कृत्तद्धितसमासेषु प्रोच्यते दुर्घटोच्चय ॥ ३ ॥

समासे तद्धिते कृते प्रोच्यते कृतिदुर्घटम् ।
तत्र रघुकाव्ये—

CLOSING & COLOPHON: [f 15] इति श्रीराजकुण्डविरचिते दुर्घटसपद्दे रघुकाव्ये दुर्घटानि समाप्तानि ।
अथ कुमारसम्भवे दुर्घटानि ।

× × ×

[f 23] इति वैद्यराजकुण्डविरचिते दुर्घटसङ्ग्रहे कुमारसम्भवदुर्घटानि समाप्तानि ।

अथ मेघदूतकाव्ये ।

× × ×

[f 26] इति श्रीराजकुण्डविरचितमेघदूतदुर्घटानि समाप्तानि ।

× × ×

[f 30] इति सद[द्]वैद्यराजकुण्डविरचितदुर्घटसङ्ग्रहे माघकाव्ये दुर्घटानि ।
अथ किरातकाव्ये–

[f 33] इति किरातकाव्ये दुर्घटानि समाप्तानि । × × ×

ग्रन्थाग्र सहस्र १०१६ ।

1906. वासुपूज्यचरितम्

(आह्लादनाङ्कमहाकाव्यम्)

OPENING : ओं नमः श्रीसर्वज्ञाय ।

अर्हन्तं नौमि नाभेयं कल्याणकलशं सताम् ।
रेजुराम्रदलानीव यत्कर्णनिकटे जटाः ॥ १ ॥

वासवानां हि यः पूज्यो वासुपूज्य इति श्रुतः ।
तस्य तीर्थेशितुश्चारुचरितं रचयाम्यदः ॥ १३ ॥

CLOSING & COLOPHON: इति दण्डाधिपतिश्रीमदाह्लादनमभ्यर्थित-श्रीविजयसिंहसूरिशिष्यश्रीवर्द्धमान-सूरिविरचिते श्रीवासुपूज्यचरिते आह्लादनाङ्के महाकाव्ये महोदयलब्धिवर्णनो नाम चतुर्थः सर्गः । ग्र १३६६ उभय ५४५१ ।

सम्पूर्णमिदं भूर्भुवः स्वस्त्रयीपूज्यस्य श्रीवासुपूज्यचरितम् ।

श्रीनागेन्द्रमुनीन्द्रगच्छतिलकः श्रीवीरसूरिर्विभौ,
यस्माद्बोधमवाप्य मण्डलपतिर्जज्ञे यतिश्चित्रिचिरा ।
तच्छिष्यः परमारवंशविशदः श्रीवर्द्धमानप्रभु-
स्तत्पट्टोदयपर्वतैकतरणिः श्रीरामसूरिस्ततः ॥ १ ॥

× × ×

सूरेर्विजयसिंहस्य शिष्यो गुर्वाज्ञया ततः ।
सूरिः श्रीवर्द्धमानोऽस्मिन् गच्छे यामित्रतां दधौ । ७ ॥

× × ×

सकलाक्षरगणनाया जयति श्रीवासुपूज्यचरितमिदम् ।
वेदनिधिवेदबाणानीताङ्कग्रन्थसम्पूर्णम् ॥ ३१ ॥
अङ्कतोऽपि सर्वसंख्या ५४९४ ।

Post Colophonic : सवत् १५२० वर्षे वैशाखवदि ५ गुरुदिने श्रीमदणहिल्लपुरे प्राग्वाटज्ञातीय श्रेष्ठि घाघा भा० वपूरी सुता भली पुण्यार्थं श्रीवासुपूज्यचरित लिखाप्य श्रीपूर्णिमापक्षे भ० श्रीजयसिंहसूरिपट्टे भ० । श्रीजयप्रभसूरीणां प्रदत्त वाच्यमान चिर नन्द्यात्।

शारदवद्भूरियमा शशाङ्कवदन कन्दर्पदर्पापह ,
श्रीजैनागमपारग शुचिमतिर्वादीन्द्रचूडामणि. ।
विश्वानन्दकरस्तमश्रुतिहर वारण्यपाथोनिधि. ,
सूरीन्द्र स जयप्रभो विजयता स्फूर्जत्प्रभावश्चिरम् ।।१।।

किं वक्त्रेन्दुसमुद्भवद्युतिभर किं हृद्यविद्यावधू-
लीलानिर्मितसुस्मित किमु सुमस्तोम. क्षमाभूरुह. ।
इत्थ यस्य वितर्क्यते सुकविभिर्व्याख्यानवाग्वैभव ,
शुभ्रोऽसौ जयप्रभु स जयता सूरीश्वर सर्वदा ।। २ ।।

1907 विष्णुभक्तिकल्पलताविवरणम्

OPENING *श्रीगणेशाय नम । श्रीनृसिंहाय नम ।*

नृहरिं गिरिजा गिर गणेश गुरुपादाब्जयुग शिवं प्रणम्य ।
हरिभक्तिलतामिधेऽत्र काव्ये विवृतिं वच्मि यथामतीशतुष्ट्यै ।।१।।

तत्र स्वाभीष्टदेवतावर्णनरूप विष्णुभक्तिकल्पलताख्य काव्य चिकीर्षु प्रारिप्सित-प्रन्थनिर्विघ्नसमाप्त्यै शिष्टाचारपरिपालनाय च पुरुषोत्तमकविराड विघ्नरस्मरण-लक्षणमाशीरूप काव्यमुक्त वदति ।

CLOSING इदानी ग्रन्थान्ते मातपितृनामकथनपूर्वक स्वनाम निगमयति—

मानीति । यस्य माता मानी पिता विष्णुनामा । यस्यास्या नाम पुरुषोत्तम स इमा विष्णुभक्तिकल्पलता चक्रे कृतवान् । कीदृश सता साधूना चक्रे समूहे कृतोऽञ्जलिर्येन स । समाप्तेय विवृति ।। ४१ ।।

श्रुतिबाणरसेन्दुमानवर्षे नमसि स्कन्ददिने सितेऽर्कवारे ।
महिदासबुधा गिरीशपुर्या कृतवान् कल्पलताप्रकाशमेतम् ।।१।।

COLOPHON इति श्रीविष्णुभक्तिकल्पलताविवरणे श्रीमहीधरकृते चित्तप्रबोधो नामाष्टम स्तवक ।। ८ ।।

Post Colophonic सवत् १७६६ वर्षे शाके १६६४ प्रवर्तमाने रविदक्षिणायनगते श्रीसूर्ये हेमन्त-ऋतौ महामाङ्गल्यप्रदमासोत्तमे पौषमासे शुक्लपक्षे २ द्वितीया श्रीशनिवासरे अद्येह श्रीनदीते पुरे महिद्यवनागरज्ञातीय मेता कुमरजीसुत प्रभुजितालेखि । श्री श्रीमालज्ञातीय मोभा श्री ५ रघुरामसुत मोभा श्री ५ देवराम चिरजीवपठनार्थं वा परोपकाराय ।

1917. शिशुपालवध-टीका

OPENING (सन्देहविषौषधिसारटीका)

ओं नम. श्रीविघ्नवन्नीकुठाराय । ओं नम श्रीसर्वज्ञाय ।

यस्य मृङ्गावलि कण्ठो(ण्ठे) दानाम्भोराजिर जते ।
भाति रुद्राक्षमालेव स व पायाद् गणाधिप. ॥ १ ॥

अभीष्टफलसम्पत्तीहेतु स्मृत्वा सरस्वतीम् ।
शिशुपालवधे काव्ये सारटीका विधीयते ॥ २ ॥

CLOSING.

सूनोरानन्ददेवस्य दयाभूम्यो - - - स्यव ।
व्यधत्त टीका काव्येऽस्मिन् वल्लभ सूरिवल्लभाम् ॥ १ ॥

विवरणमन्य दृष्ट्वा बुधैस्ततो शास्यते विशेषोऽयम् ।
यत्र येन . क्त तद्बभ्रामास्त कुतो विपावज्ञ ॥ २ ॥

श्लोकाना च समानेया सहस्राणा दशैव हि ।
मूलग्रन्थस्य सयुक्ता सहस्रे ' न द्वादश ॥ ३ ॥

ग्रन्थाग्रन्य सख्या १२००० श्रीरस्तु ।

COLOPHON समाप्तेय वल्लभनाम्नी टीका श्रीमाघमहाकाव्यस्य ।

Post-Colophonic शुभसवत्सरे सवत् १८३८ रा वर्षे शाके १७०३ प्रवर्त्तमाने मासोत्तममासे मार्गशीर्षमासे शुक्लपक्षे षष्ठीतिथाविनि श्रेय श्रेणय श्रीवान्ताग्रामे माहाराजाजी श्रीविजयसिघजीराज्ये । सकल पण्डितचक्रचूडामणिपण्डित श्री श्री १०८ श्रीविनीतसागरजिद्गणिस्तदनुक्रमेण पण्डितोत्तमपण्डितचक्रचूडामणि प० श्री १०८ श्रीधीरसागरजिद्गणिस्तच्छिष्य प० अमृतसागरस्सविनयेन सोल्लासेन लिखिता प्रतिरिय । शिष्यतीर्थसागरवाचनायेद पुस्तकमिति श्रेय श्रेणय ।

1918 शिशुपालवध-'सर्वानुवादिनी' टीका

OPENING

ओ नम परमात्मने ।

कलयामि यदो कुलस्य भूषा निगमान्तैकनिवेद्यमानमर्थम् ।
बहुना नरभावमाश्रयन्त नवनीत मणिकान्ततो हि [?]लीहन्तम् ॥१

प्रबन्धसिन्धूत्तरणैकहेतो प्रयस्यतो मे नवल वचस्य ।
नीरर्गनिर्विघ्ननवद्धसिद्धे विधेहि लम्बोदरत्वम् ॥ २ ॥

अधिगुणमदुक्तिमुक्ता गुणगणसुभगस्य माघकाव्यस्य ।
बालावबोधविषये तनवै सर्वानुवादिनीटीकाम् ॥ ३ ॥

विदुषा सरणौ समाविविक्षौ स्खलितो मेऽप्यधियो न जातु भीति ।
करुणावरुणालया हि सतो विगुणाना सगुणीकृतौ कृतार्था ॥ ४

CLOSING & COLOPHON : इति श्रीधर्माङ्गदसूनो कमलानन्दनस्य दिनकरमिश्रस्य कृतौ माघटीकाया दशम सर्ग ॥ १० ॥

श्रुतिसमधिकमिति । श्रुत्या ध्वनिभेदेन समधिक ऋषभापेक्षया X X X X X
कपिलेन सार्द्धं भिन्नकीकृत्येति अनत्यतगतो वनादिति कन् । तदन्ताञ्चिररति X X X

1936. घटखर्परकाव्यं सटीकम्

OPENING : श्रीगणेशाय नमः ।

निचितं समुपेत्य नीरदैः प्रियहीना हृदयावनीरदे ।
सलिलैर्निहितं रजः क्षितौ रविचन्द्रावपि नोपलक्षितौ ॥ १ ॥

हे सखि ! नीरदैः मेघैरागत्य खमाकाशं निचितं व्याप्तमित्यर्थः । किंविशिष्टै-
र्नीरदैः । ५ × × × × × × × × रेणुर्द्वयोस्त्रियां धूली पांशुर्ना नद्यो रजः
इत्यमरः ॥ १ ॥

CLOSING भावानुरक्तवनितासुरतैः शपेयं आलम्ब्य चाम्बुतृषितः करकोशपेयम् ।
जीयेय येन कविना यमकैः परेण तस्मै वहेयमुदकं घटखर्परेण ॥ २२ ॥

अहं शपेयं शपथकरो करोमि कं भावानुरक्तवनितामपि न व्रजामि । तृषितोऽपि
सन् करकोशपेयमम्बु चालम्ब्य शपेयं । तस्मै कस्मै कविनि अहमत यमकैर्जीयेय २२

COLOPHON इति श्रीटीकायां घटखर्परार्थकाव्यं सांगोपाङ्गा समाप्ता ।

Post Colophonic संवत् १८७५ लिखितं पूज्य बीहारीपि ।

1937 घटखर्परकाव्यं सटीकम्

OPENING ॐकारममृतं ब्रह्मशिवमक्षरमव्ययम् ।
यमामनन्ति वेदेषु तं प्रपद्ये गणाधिपम् ॥ १ ॥

निचितमिति । निचितं निरुद्धं तिरोहितं । किं ? खं-आकाशं । कैः ? नीरदैः
मेघैः । किं कृत्वा ? उपेत्य आगत्य । × × × × ईदृशं समयमस्ति ॥ १ ॥

CLOSING आलम्ब्येति । वाम्यकर्तुं प्रतिज्ञां वै । कीदृशी ? सा मया घटखर्परेण वहेयं ।
× × × × × कैः ? भावानुरक्तवनितासुरतैः भावेन अनुरक्ताचासौ वनिता च
सुरवनिताविलासविभ्रमानि तैः ।

COLOPHON इति घटखर्परटीका समाप्ता ।

1938 घटखर्परकाव्यं सटीकम्

OPENING : श्रीगणेशाय नमः ।

क्रियते घटखर्परस्य टीका विदुषा शङ्करभट्टशास्त्रिणा ।
शिवमङ्गलमूर्तिरामलक्ष्मीः सततं सूर्यमजं गुरुं च नत्वा ॥ १ ॥

अत्र वस्तुनिर्देशात्मकं मङ्गलमस्ति । अथ पञ्चभिः श्लोकैः कुलकमाह—तत्र-
प्रथमम् । × × × × सूत्रमाह-निचितम् ।

CLOSING : अथ कविः कर्ता एतादृशं ग्रन्थं कृत्वा स्वयमर्कं प्रणम्य प्रतिज्ञां दर्शयितुमाह—
× × × × × आलम्ब्य करे धृत्वा । किंभूतोऽहं तृषितः पिपासुः । वसन्ततिलका-
च्छन्दः ॥ २३ ॥

COLOPHON : इति श्रीशङ्कराचार्यविरचितं घटखर्परटिप्पणं सम्पूर्णमस्ति ।

1939. घटखर्परकाव्यं सटीकम्

OPENING. सरस्वत्यै नम ।

बुत्राव्यराक्षसम्येद काव्य भावनिरन्तरम् ।
क्रमाद्विषममीषा स्यु स्पष्टार्थस्यापि बोधका ॥ १ ॥

तथापि चित्तचापल्यात् तस्य टीका विधीयते ।
क्षन्तव्यमिति विद्वद्भि व्याख्यान साध्वमाधु वा ॥ २ ॥

वापि विरहार्दं पञ्चभि श्लोकैर्जलधरप्रवेशसमयनिर्वतशयप्रसूतकुसुमशरव्यतिकरव्यथाव्यथितममस्तपथिकप्रमदाजनाना प्रियमखीमभिमुखी कृत्यव्याहरण। × × × × आदौ तावद् मर्धममसुन्दरीनामहत्तेन प्रथमश्लोक व्याजहार—निचितमिति ।

CLOSING. यदीत्यध्याहार्यम् । यदि अह जीयेय पराजीयेय । × × × × × केन घटकर्परेण घटस्य कर्पर घटकर्परस्तेन घटकर्परेण खण्डेनेति सम्बन्ध ॥ २१ ॥

COLOPHON इति घटकर्पराख्य महाकाव्य सटीक समाप्तम् ।

1940. दुर्घटकाव्यं सटीकम्

OPENING. अर्हं नम ।

लक्ष्मीवन् कृतक्रूरमूरणदहिन् दूधक् क्षम पापडी-
लारुढो कलधौवडाह्नवडी साजाम्बुदालिरुचि ।
महाशाकरखण्डनोवि विभुना क्षीरावसा तुल्य मा,
सा सुहालितडिन्निभागवसतोऽव्या सेवक सारवान् ॥ १ ॥

हे लक्ष्मीवन् ! त्व मा सेवक अव्या रक्ष । कथम्भूतः त्व कृतकू. । × × × × सारवान् सारो वलमस्यास्तीति सारवान् पालनसमर्थ ॥ १ ॥

CLOSING यावत्तोय ‥ ‥‥ धरधरा धीराधराभूधराः,
यावच्चारुसुचारु ‥‥ चमर चामीकर चामरम् ।
यावद् रावणरामरामरमण रामायण श्रूयते,
तावद्भोगविभोग ‥ भवन भोगायते नित्यश. ॥ ८५ ॥

भोगेन घनेन विशिष्टो भोग सुख यस्य स भोगविभोग. तस्य सम्बोधने हे भोगविभोग । भो सुखे घने इति विश्वप्रकाश । × × × × × × × रामणी रा रामा जानकी यस्यासौ रामणराम स चासौ रामश्च रामणरामस्तेन रमणमित्यर्था इति वा ॥ ८५ ॥

COLOPHON इति श्रीदुर्घटाख्य काव्य सुपूर्णम् ।

Post Colophonic. सवत् १७७६ ना ज्येष्ट सुदि १५ शुक्रवारे । लपीकृत प० पुन्यसीलमुनिना । श्रीअहम्मदपुरे ।

1941. दुर्घटकाव्यं सटीकम्

श्रीमद्गुरवे नमः ।

OPENING Same as at no 1940

CLOSING. वनजीवनजीखर्व निरामी मकृपीऽनृप ।
कुर्वन्तु तव कल्याणं अवतारा हरेर्दश ॥ ३७ ॥

[व्या०] मच्छकच्छौ नृसिंहवराहौ वामन राम परशुराम बलिराम बुद्ध कल्कि ॥ ३७ ॥

COLOPHON इति दुर्घटकाव्य सटीकः ।

Post Colophonic: श्रीमतयामलेलि ऋषि रतीरामेण पटयालानिगमे सवत १८८६ मिति जेष्ठकृष्ण चतुर्थ्यां रविदिने ॥

1964. मेघदूतं कल्पलताटीकासहितम्

OPENING कश्चित्कान्ता विरहगुरुणा स्वाधिकारात्प्रमत्त ।× × × × ×

[व्या०] कश्चित् अनिर्दिष्टनामा यक्षो रामगिर्याश्रमेषु चित्रकूटपर्वतेषु वसति चक्रे निवास कृतवान् । यद्यपि यक्षस्यैकत्वात् रामगिर्याश्रमेषु वचन आप्य कथ बहुवचन । × × × × × × × × प्रियाविरहमसहमानो रात्रौ कमलकुड्मलानि धनेपी । तस्मात् तव प्रिया(यया)सह वर्षं यावत्[वि]यो[गो]ऽस्तु ॥ १ ॥

× × ×

CLOSING: [व्या०] कालिदास भार्याया सरस्वत्याश्चरणयुगल चरणारविन्दद्वय नत्वा इद इत्थंभूत प्रधानचरित अतीवसौख्यप्रदम् ॥२७॥

COLOPHON· इति श्रीकविचक्रचूडामणिश्रीकालिदासकृतस्य श्रीमेघदूतमहाकाव्य[स्य] व्याख्या कल्पलता सम्पूर्णा ।

Post-Colophonic सवत् १६५३ वर्षे वैशाखसुदि ६ शुक्रो लिखित साचुरमध्ये ।

1971. मेघदूत-सुखलताटीका

OPENING: श्री नमश्चण्डिकायै ।

कश्चिदिति । कश्चिदनिर्दिष्टनामा यक्ष रामगिर्याश्रमेषु चित्रकूटेषु वसति निवास चक्रे अकरोत् । रामगिरेः आश्रमा रामगिर्याश्रमाः तेषु । मनामग्राह्यः इति कथ । × × × × × × स्निग्धच्छायातरुषु स्निग्धच्छायातरवो वृक्षा येषु ते स्निग्धच्छायातरव तेषु । अत्र मन्दाक्रान्तच्छन्द ॥१॥

CLOSING· श्रुत्वा वार्तामिति । घने ···· ·· ······ पि नारवनिरन्तरं दृष्टान् भोगान् भोजयामास । × × × × × × विगलितशुचौ गतशोकौ । पुन विविशिष्टौ अविरतसुख निश्चलसुख यथास्यात्तथा तुष्टचित्तौ ॥ २६ ॥

COLOPHON: ··············विहितस्य मेघदूतकाव्यस्य वृत्तिःसुखलतानाम्नी पूर्णा ।

1984. वैराग्यशतकं सुबोधिनीटीकासहितम्

OPENING

श्रीगणेशाय नम ।

पुरा प्रार्थितौ ब्रह्मणा सामरेण स्वय सद्गवा पालनायावतीर्णौ ।
सदानन्दमूर्ती श्रुतिध्येयरूपौ प्रभू रामकृष्णौ शरण्यौ नमामि ॥ १ ॥

नत्वा राम तथा कृष्ण गुरु चाभीष्टसिद्धिदम् ।
वैराग्यशतके भर्तृहरौ व्याख्यां करोम्यहम् ॥ २ ॥

इदानी येनोदन्तेन श्रीभर्तृहरिर्भूपतिर्विरक्तोऽभूत् त वृतान्त प्रथमश्लोकेन उपनिबध्नाति—[या चिन्तयामि सततमिति] ।

CLOSING: & COLOPHON:

इति वैराग्यशतकटीका समाप्ता ।

सवत्सरे खबाणाद्रिचन्द्रसज्ञे शुभायने ।
सहस्ये मासे शुक्ले च चतुर्थ्यां बुधवासरे ॥ १ ॥

नारायणपुरे धर्मकर्मसज्जनमण्डिते ।
सौराज्यविशदे देवविप्रगोश्रुतिसश्रये ॥ २ ॥

शेषावतावतसोभौ महासिहचतुर्भुजौ ।
भ्रातरौ राजतनयौ वदान्यौ हरिसेवकौ ॥ ३ ॥

तत्प्रयुक्तेन मिश्रेण घनश्यामेन धीमता ।
कृता भर्तृहरेरेषा वैराग्यशतकाश्रया ॥

सुबोधिनीति विख्याता टीका बुधमनोहरा ।
यदत्र किञ्चित् स्खलितं प्रमादात् सद्भिर्गुणादानपरो स्वबुद्धचा ।
तच्छोधनीय मयि सप्रयुज्या कृपानुवृत्ति परमार्थना मे ॥

इति श्रीगुणगणमण्डितनिजकुलावतसश्रीमहाराजमहासिहचतुर्भुजप्रयुक्तघनश्याममिश्ररचित वैराग्यशतकटीका समाप्ता ।

Post-Colophonic

शाके युग्मदृग वा षट्चन्द्रे सज्ञे शुभायने ।
भाद्रे शुक्लेह्नि चाष्टम्या चन्द्रे शुभदिनेऽलिखत् ।
देविदत्त स्वबुद्धयर्थं टीकाभर्तृह '' '' ।

1998 शृङ्गारविलासिनी

OPENING:

श्रीकृष्णाय नमः ।

छप्पय– सुभगसिद्धि शुभवृद्धि सकलसततसुखकारिणि ,
दुर्गतदुर्गदुरतदु खदारुणदरदारिणि ।
शरणागतनरपुण्यपुण्यकारण्यविहारिणि ,
जगदनिरूपितरूपभूपमूपद्युतिधारिणि ।
निरमपंहर्षवर्षितवचन - सुरनरर्षिहरिहरनुते ।
सु(कु)मतिघ्न विघ्नमपनय विभो जय जय जय गिरिवरसुते ॥ १ ॥

दोहा– रसिकमुदे च विलासिजन-मन॰ परानन्दाय।
भृङ्गारकविलासिनी विहिता नुकविहिताय ॥ २ ॥

यदि भरतादिनिरूपिता ग्रन्थारसन्त्यपि मन्तु।
सरसचमत्कृतिमत्कृति सुधियस्तत्र रमन्तु ॥ ३ ॥

CLOSING: दोहा– देवदत्तकविरिप्टिका-पुरवासी स चकार।
ग्रन्थमिमं वंशीधरद्विजकुलधर बभार ॥ ८६ ॥

षट्पदी– स्वरभूतस्वरभूमिमिते वत्सरे यदाय,
दिल्लीपतिरवरंगसाहिरजयताद्रुपायम्।
दक्षिणदिशि च तदैव कुड़कुणे नामनि देशे,
कृष्णावेणीनामनदीसङ्गमप्रवेशे ॥
श्रावणबहुलनवमीतिथौ रेवानीरे रेवतीतीरे।
कविदेवदत्तउदितैतावगमापयद्दहनि स्तुते ॥ ६० ॥

COLOPHON इति श्रीमत् कविदेवदत्तविरचिता भृङ्गारविलासिनी सम्पूर्णा।

दोहा– वसुवर्णाप्टकभूमिते लिखिता ज्येष्ठसिते च।
Post-Colophon हरिशङ्करद्विवेदिना पूर्णा गुरौ हिते च ॥ १ ॥

2004. सतसैया सटीका

OPENING श्रीगणाधिपतये नमः।

मेरी भवबाधा हरो, राधा नागरि सोइ।
जा तन की झाईं परें, स्याम हरित दुति होइ ॥ १ ॥

सा राधानागरि राधानाम्नी नायिका मम भवबाधा संसारदुःख आधिभौतिकादि-क्लेश हरतु दूरीकरोतु। संसारक्लेशहरणेन निर्विघ्नग्रन्थसमाप्तिर्भवतु इत्याशीर्वाद-रूप मङ्गलाचरण व्यज्यते। X X X X प्रसिद्धि विलाससमये इत्यर्थं ॥१॥

CLOSING. यद्यपि है शोभा सहज मुकतनि तऊ सु देखि।
गुहे ठौर की ठौर तें लरिस्यें होत विशेष ॥ ७१ ॥

यद्यपि मुक्तानां सहजा शोभा तथापि त्वं पश्य। यथास्थानं गुम्फिते सति सूत्र-गुम्फित सति मुक्तापंक्तौ अधिका शोभा जायते ॥ ७०१ ॥

बिहारीदाससतसैया - टिप्पणं संस्कृते कृतं (म्)।
तुष्यन्तु कवयस्तेन मम दोषो न दीयताम् ॥ १ ॥

COLOPHON इति श्रीभट्टमेवाडाज्ञाति-श्यामसुन्दरदेवसूनुना नाह्लाय्यासेन बिहारीदाससतसैयाटिप्पणं धुनबोधाख्यं सम्पूर्णम्।

Post Colophonic लिखितं ब्राह्मण गिरिनाराज्ञातीय भट्टविष्णुजीकेण लिखितमिदं पुस्तकं। संवत् १७०१ वर्षे पौष सुदि १० रवौ।

2031 दमयन्तीकथाचम्पू

OPENING · ओं नमः सर्वज्ञाय ।

जयति गिरिसुतायाः कामसन्तापवाहि-
न्युरसि रसनिषेकश्चन्दनश्चन्द्रमौलिः ।
तदनु च विजयन्ते कीर्त्तिभाजां कवीनां,
मसकृदमृतबिन्दुस्यन्दिनो वाग्विलासाः ॥ १ ॥

× × ×

काव्यस्याम्रफलस्यापि कोमलस्येतरस्य च ।
बन्धच्छायाविशेषेण रसोऽप्यन्यादृशो भवेत् ॥ १७ ॥

CLOSING · इति विहितवितर्कैर्विश्वस्तनिद्रः,
सजलजडिममीलत्पक्ष्मचक्षुर्दधानः ।
हरचरणसरोजद्वन्द्वमाधाय चित्ते,
नृपतिरुभयसगीं स त्रियामामनैषीत् ॥ ३ ॥

COLOPHON: इति समविषमकविश्रीत्रिविक्रमभट्टस्यकृतौ दमयन्तीकथायां विबुधजनमनोहारिण्यां हरचरणसरोजाङ्कः सप्तम उच्छ्वासः समाप्तः ।

Post-Colophon · ग्रन्थाग्र. २५०० । शशिरसवेदशशिप्रमिते वर्षे । बाहुलबहुलपक्षसप्तमीदिने । धिषणवारे प्रतिरियमलेखि श्रीमद् रिणीपुरवरे । उ० श्रीगुणरङ्गगणितच्छिष्यज्ञान-विशालेन । प० हेमसोमगणिशिष्य प० ज्ञाननन्दिपठनार्थम् ।

2032. कथासङ्ग्रहः

OPENING अर्हन् देवो गुरुः साधुर्धर्मो सर्वज्ञभाषितः ।
एतत् त्रयं स्थितं चित्ते सम्यक्त्वं तस्य निर्मलम् ॥ १ ॥

CLOSINGS & COLOPHONS इयं मारामनन्दनकथा समाप्ता । उद्धरिता वा० रत्नलाभगणिना । चन्द्रप्रभ-चरित्रात् । [f. 7]

× × ×

इति विनयविषये हरिषेणश्रीषेणकथा समाप्ता । (f. 13)
[इति कामकेतुकथा । (f. 16)
इति भयाद्दाने सोमस्य कथा समाप्ता । (f. 17)
इति उपरोधदाने सुन्दरकथा (f. 19)
सुपात्रे भावदाने वणिक्सुतस्येयं कथा । (f. 19)
इति दाने कामकेतु कथा । (f. 20)
इत्यदाने कुरङ्गकथा समाप्ता । (f. 21)
इति तपसि दासीदृष्टान्त मतपसि भानपुञ्ज (f. 23)
इति भावनायामसम्मतकथा । (f. 24)

इति प्रभावे वरणदृष्टान्त । (f. 25)

इति नियमे सिद्धकथा समाप्ता । (f 26)

इति जीवरक्षाया मन्त्रिदासीकथा । (f 28)

इति सत्यव्रते स्मरनन्दनकथा । (f 30)

इति अदत्तादाने दानप्रियकथा । (f. 31)

इति चतुर्थव्रते मदनमञ्जरीकथा । (f 34)

इति परिग्रहप्रमाणे धर्ममतिकथा । (f 35)

इति श्री चन्द्रप्रभचरित्राद्युद्धरित वा० श्रीरत्नलाभगणिना श्रीक्षमारङ्गगणीना शिष्येण ।

2034 धम्मिल्लचरितम्

OPENING : अर्हम् । ओ नमो वीतरागाय ।

बोधिबीज सता स्वान्तभूमौ वप्तुमना इव ।
योऽधाद् वृष पदोपान्ते स श्रीमान् ऋषभ श्रिये ॥ १ ॥

× × ×

वृणोति सकला सम्पत् मरणाभाजन जनम् ।
चरित्र धम्मिलस्यात्र साक्षात् कुर्म. प्रतीतये ॥ १८ ॥

CLOSING स श्रीनाभिनरेन्द्रनन्दनजिन श्रेयांसि देयाच्चिर,
यस्याम्ना त्रिजगत्पराभववर भूप जिगाय स्मरम् ।
स्कन्धद्वन्द्वनिलीनकुन्तलततिव्याजेन चयश्रिर-
न्यास वैरिजयप्रशस्तिरमला तेनैव किं लक्ष्यते ॥ १ ॥

× × ×

कविचक्रधर: श्रीमान् सूरिश्रीजयशेखर ।
नाऽपि वेधविधातु यत् कवित्वगणिनां विभु ॥ ७ ॥

प्रबोधचिन्तामणिरद्भुतस्तपोपदेशधिन्तामणि रथपेशल: ।
व्यधायि यैर्जैनकुमारसम्भवाभिधानत सूक्तिसुधासरोवरम् ॥ ८॥

विज्ञापितैस्तैं कित धम्मिलस्य प्रगल्भमेतच्चरित वितेने ।
निपीयतां तत्र पवित्रपुण्यरस सरस्यामिव भव्यलोक: ॥ ६ ॥

द्विपद्वारिधिचन्द्राङ्कवर्षे विक्रमभूपते ।
अकारि तन्मनोहारि पूर्णं गूर्जरमण्डले ॥ १० ॥
तत्र त्रीणि सहस्राणि तथा पञ्चशतानि च ।

ग्रन्थाग्र० ३५००

2038. वासवदत्ता-टीका

OPENING पण्डितश्रीहर्षविमलगणिगुरुभ्यो नम ।

पायाद् वो गोमहस्रेण क्रीडन् गोपालको हरि ।
प्रवासाद तथा तेन भिन्दानोध्वान्तकुञ्जरम् ॥ १ ॥

× × ×

CLOSING श्रीनारायणदीक्षित हरिपदद्वन्द्वारविन्दे रत,
सावित्री सुषुवे त्रिकर्मनिचय श्रीविश्वरूपश्च यम् ।
तेनोद्धृत्य (द्धत्य) विवर्जितेन गुणिना सक्षिप्य नारायणी-
नाम्नीय रचिता सदर्थखचिता व्युत्पत्तिवृद्ध्यै सताम् ॥ १ ॥

रूपभूतगुणक्षोणीयुते विक्रमवत्सरे ।
टीका वासवदत्ताया निरमान्नारायणाऽग्निचित ॥ २ ॥

COLOPHON इति श्रीदीक्षितनारायणविरचिताया वासवदत्ताटीकाया चतुर्थ प्रघट्टक समाप्त । समाप्ताय ग्रन्थ ।

Post Colophonic सवत् १७३० वर्षे कार्तिकवदि १ दिने । श्रीभुजनगरे । पण्डितश्रीशान्तिविमल-गणिशिष्य पडितश्रीकेसरविमलगणिपठनार्थं लिखिता प० । कनकविमलगणिना ।

2039, विक्रमादित्योत्पत्तिकथा

OPENING गूर्ज्जरमण्डले साभ्रवती महिनद्योरन्तराले वन विद्यते । तत्र तामलिप्तर्षिस्तस्य पुत्री यशोमती । तस्या भर्त्ता ताम्रसेनराजा तयो सासारिकसुखमुपभुज्यमानयो पुत्री मदनरेखा समुत्पन्ना ।

CLOSING. इतश्च राज्ञ शुद्धिर्जाता । पुत्रीगर्भं मालिनी गृहीत्वा गता राजा उभयभ्रष्टो जात । न पुत्रो न पुत्री । ततो राजा नगर्यास्त्विम्बावती नाम यातम् ।

COLOPHON. इति विक्रमादित्योत्पत्तिकथा सम्पूर्णा ।

Post-Colophonic गणि रूपचन्द्रेण लि० ।

2043. कमला-भारतीसंवादः

OPENING. श्री नम श्रीभुवनेश्वर्यै ।

अथ कमलाभारत्यो सवाद्र सादर वदत ।
पर्यङ्कीकृतपाथो यदुनाथो मे मुदे भूयात् । १ ॥

CLOSING पयोधिप्रोद्भूते प्रसभमभितो भूप्रभृतयः,
पतन्त्यङ्घ्रिप्रान्ते प्रचुरतपसः शान्तमनस ।
सुगन्धस्रग्बन्धावभिनवभवद्वासभवने,
प्रभावो भारत्या भृगुचरणचिन्ह हृदि हरे ॥ २३ ॥

COLOPHON इति श्रीमधुसूदनभट्टविरचित कमलाभारतीसम्वाद सम्पूर्णम् ।

2046 भरटकद्वात्रिंशिका

OPENING

देवदेव नमस्कृत्य श्रीगुरूश्च यथाश्रुतम् ।
द्वात्रिंशद्भरटकाना लिख्यन्ते कुतवात् कथा ॥ १ ॥

CLOSING

त्वया मम गुप्तगालिर्दत्ता राज्ञाग्रे चल । एव [क] लह कुर्वाणो लोकैर्निवारित । कष्टेन । ततो हृष्टो पण्डितो गृह जगाम ।

COLOPHON

इति भरटकद्वात्रिंशका सम्पूर्णा भवतु ॥ ६८० ॥

2048. विनोदकथा

OPENING

नरसमुद्रं दित्वा कश्चिद् वैदेशिक सकोपीन. सयष्टि सन्ध्याया प्राजगाम । गणिकागृहे यष्टिमड्डाणके मुक्त्वा वासक स्थित । प्रातर्यद् अद्य राजा दास्यति तन्मया तव प्रदानव्यम् ।

CLOSING

मूर्ख त्व सि । त्वया नर्त्तयित्वा मन्मनोरञ्जतो । मया तु मानयित्वा न मनोरञ्जिते । अत्र किं मार्गण विच दान मदातरि ॥ २६ ॥

COLOPHON

इति विनोदकथा समाप्ता सम्पूर्णा ।

2049. विनोदकथासंग्रहः सावचूरिः

OPENING

योऽपि सोऽपि ध्रुव ग्राह्यो नियम पुण्यकाङ्क्षिणा ।
सोऽल्पोऽप्यनल्पलाभाय कमलश्रेष्ठिनो यथा ॥ १ ॥

[अव०] श्रीपुरे श्रीपतिसुन्दरीसू । निर्द्धर्मो निर्गुण । गुरुदेशनाश्रवण १०८ वारान् घण्टिकाचलन १ कौटिकागुणन २ । ××××× रत्ननिधि स्वर्गाच्च्युत. सेत्स्यति ॥ १ ॥

CLOSING & COLOPHON

क्रिया सर्वा कामदुघा प्राक्पुण्य बलवद् यदि ।
तथाहि पथ्य वैद्यस्य पथ्यासीत् सर्वसिद्धिदा ॥ ७५ ॥

इति मलधारिश्रीराजशेखरसूरिकृता ।

[अव०] कर्पूरग्रामे विप्रः्टिप्पनक वैद्यः । भिषग् यहाणि चूर्णानि मेलं मेल स्थालीषु क्षेप क्षेप मुमोच । ××××× तुष्टा सा पथ्या वैद्यमाचार्यमपूपुजत् ।

इति विनोदकथा ।

2052. सिंहासनद्वात्रिंशिका

OPENING :

ओ नम श्रीपार्श्वनाथाय । नमो गुरुभ्यो नम ।

श्री[मन्]नाभिनरेन्द्रवंशमुकुटालङ्कारहीरप्रभ ,
नाम्वन्त परमेश्वर सुरनरैः पूज्य परानन्ददम् ।
स्वर्णाभ वृषभाङ्कन जिनपति श्रीदमिकाया स्थितं ,
नौमि श्रीवृषभ जिन जितभय योगीश्वर योगदम् ॥ १॥

× × × ×

श्रीसाधुपूर्णिमापक्षवानने कल्पपादपा ।
श्रीमद्भव्यचन्द्राख्या गुरव स दिशन्तु मे ।। ६ ।

तेषा पादप्रसादेन विक्रमादित्यभूपते ।
सिंहासनप्रबन्धोऽयं पद्यबन्धेन रच्यते ॥ ६ ॥

क्षेमङ्करमुनीन्द्रेण विबुधानन्ददायिनाम्(ना) ।
गद्यपद्यमयोऽकारि जिनानन्ददायक ॥ ७ ॥

CLOSING · सिंहासनप्रबन्धेऽस्मिन् विक्रमादित्यभूपते ।
श्रीरामचन्द्रसंयुक्तजाता द्वात्रिंशमी कथा ॥ ८ ॥

इति सिंहासन द्वात्रिंशिकाया द्वात्रिंशतितमा समाप्ता । ग्रन्थाग्र

श्लोक ९५ प्र १८ ।

अयात सर्वतोभद्रसिंहासनस्थिता वरा ।
द्वात्रिंशत् पुत्रिका तत्र चलत्कुण्डलभासुरा ॥ १ ॥

× × ×

तज्ज्ञात्वा कुपित शक्रोऽस्माक शाप ददौ तदा ।
रे रे यूयं दुराचारा वि× × × × × ×[॥ १८ ॥]

2053· सिंहासनद्वात्रिंशिका

OPENING · अर्हम् ।

अनन्तशब्दार्थगतोपयोगिन. पश्यन्ति पार नहि यस्य योगिन ।
जगत्त्रयाशेषतमोविनाशक ज्योति पर तज्जयति प्रकाशकम् ।। १ ॥

× × ×

य पूजनीया सुमन समूहे ते सन्तु मे श्रीगुरव प्रसन्ना ।
सदा नवो यत्प्रतिभाप्रकर्ष पुनन्तु ते श्रीकवयश्च वाचम् ॥ ३ ॥

सकलसुरासुरसूरिनिकरनायकप्रणतपादारविन्दश्रीसर्वज्ञशासनप्रभावकस्य परमगुरुश्रीसिद्धसेनदिवाकरप्रणीतोपदेशपेशलविवेकस्य जगद्वर्यधैर्यगाम्भीर्यपरमौदार्यादिगुणगणालङ्कृतस्य विक्रमाकान्तनिर्विक्रमस्य श्रीविक्रमनरेश्वरस्य कश्चित् प्रबन्ध प्रारभ्यते ।

CLOSING श्रीभोजराज य कश्चिदेतत् श्रीविक्रमादित्यचरित्र देवाङ्गनामवादसुन्दर पठिष्यति श्रोष्यति वाचयिष्यति समाचरिष्यति तस्य धृतिकीर्तिलक्ष्मीसकलसौख्यावाप्तिर्भविष्यतीति वर दत्वा देवाङ्गना स्वर्ग जग्मु । श्रीभोजराजस्तु जलधिमेखलायामखण्डशासनश्चिर रराज लक्ष्म्या ।

COLOPHON इति सिंहासनद्वात्रिंशिकाकथानक सम्पूर्ण समाप्तम् ।

2062. प्रज्ञाप्रकाशषट्त्रिंशिका

OPENING

श्रीगणेशाय नमः ।

प्रज्ञाप्रकाशाय नवीनपाठी श्रीमारुदेव वृषभ प्रणम्य ।
काव्यानि चाहृ रचयामि यानि तज्ज्ञैर्विशोध्यानि समानि तानि ॥१॥

CLOSING:

लुङ्कार्यगच्छाम्बरमित्रतुल्ययशस्विनामा गणिना गरिष्ठः ।
तस्य प्रमादाच्च सुभाविताना षट्त्रिंशिकेय मयका प्रणीता ॥ ३७ ॥

COLOPHON इत्याचार्यश्रीमद्हर्षसिंहविरचिता श्रीप्रज्ञाप्रकाशषट्त्रिंशिका समाप्ता ।

Post-Colophonic लिख्यत सिवरजी श्री श्री १०८ श्रीचैनरामजी । ऋ. ईन्द्रभाणपठनार्थम् ॥

2074. साहित्यरत्नावली

OPENING

श्रीगणेशाय नम ।

अथ साहित्यरत्नावलीप्रारम्भः —

श्रीमद्रङ्गजित गुरु गणपति नत्वा च वागीश्वरी ,
विद्वद्वृन्दविनोदनार्थममला साहित्यरत्नावलीम् ।
कुर्वे ता सुवृत्ती नरोप्यधनवान् कण्ठे स्वकीये न्यसेत् ,
तस्य श्रीरनपायिनी किल भवेत् कीर्तिश्च देशान्तरे ॥१॥

CLOSING:

श्रोडग्रामनिवासिना विरचिता साहित्यरत्नावली
श्रीगौडोदयरामनामकविना वृत्तै रनेकैर्मया ।
विद्वद्वृन्दमुदेऽत्र भो बुधजना कृत्वा तु दोष बहि-
रङ्गीकृत्य गुण कुरुध्वमनिश ता कण्ठभूषामिमाम् ॥२६॥

COLOPHON: इति श्रीसाहित्यरत्नावली नाम ग्रन्थ ।

Post-Colophonic सवत् १६०६ सरावणवदि १३ वार गुरु लीखी व्यास रणछोड लक्ष्मीराम । पत्तननगरवास्तव्य ज्ञाति दिवपाल मवटक व्यासाभिध लक्ष्मीरामआत्मज रणछोड-नामेन लिपिकृता स्वात्मपठनार्थं परोपकारार्थम् ।

2097. नीतिशतकं सुबोधिनीटीकासहितम्

Ct-OPENING:

श्री गुरुदेवजी नम ।

परमात्मानमानम्य परमानन्दविग्रहम् ।
सज्ज्ञानप्राप्तये नृणा कुर्वे सन्नीतिवर्णनम् ॥ १ ॥

श्रीमत्पुष्करव्यासस्य सुत धीनाथमशिव ।
सन्नीतिशतकस्यास्य टीका कुर्वे यथार्थत ॥ २ ॥

न चात्र रचनागुर्वी न चात्र कविचातुरी ।
यथार्थख्यापिनी टीका कृतेयं सुखबोधिनी ॥ ३ ॥

Ct-CLOSING: श्रीमत्श्रीमर्विरदासव्यासतनयो न्यायादिविद्यार्थवित्
श्रीमत्पुष्करदासनाम विदितो विद्याप्रवीण कवि·।
तस्याभूत्तनुजो विशालयशस श्रीनाथनामा सुत,
टीका तेन कृता हि भर्तृनृपते काव्यार्थसद्यायिनी ॥१॥

COLOPHON· इति श्रीव्यासश्रीनाथविरचिता भर्तृशतकनीतिकाव्यार्थस्यायिनी सुबोधिनी नाम टीका प्रथमशतकस्य समाप्ता।

2101. चन्द्रगुप्तकुटुगड्डककथा

OPENING कोहे धेवरखवगो इत्यादि यथा–हत्थिकप्पे नयरे एगो साहू मासक्खभणपारणदिने भिक्ख हिंडतो घिज्जाइ।

CLOSING: चुन्नजोग दव्वलोचनाजनप्रयोजन च दोपस्तत्र च
उदाहरणम्–पाडलिपुत्तनयरे आसीनिवो सयलजनसणसमेयो।
नामेण चदगुत्तो चाणक्को तस्स वरमती॥ १॥

COLOPHON इति ह्[?दि]व्याजनयोगविपये चन्द्रगुप्तकुदुगड्डुगकथा।

2124. लघुवैयाकरणभूषणसारकान्तिटीका

OPENING श्रीगणेशाय नम।

नमस्कृत्य गणाध्यक्ष नृसिंह कमलायुतम्।
बुद्धिप्रभाववर्द्धयित्री सहर्त्ता दुरितस्य च॥
सम्पादयित्री कामाना प्रापयित्री श्रिय श्रियम्।
तात शमु सती दुर्गा पाणिनिप्रभृतीन मुनीन्॥
बालभट्टाभिध पायगुण्डोपाध्य पर गुरुम्।
गोपालदेवनामाऽसौ पण्डितो बालवुद्धये॥
कृष्णदेवानुजो लोके मनुदेवापराभिध·।
अनुसृत्य नय प्राचा नव्याना लेशतस्तथा॥

CLOSING & COLOPHON· लघुनो भूषणस्येमा कान्ति वितनुते सुधी।
इति लघुभूषणकान्तौ धात्वाख्यातार्थनिर्णय।

2143 शब्दपरिच्छेदः

OPENING: श्रीगणेशाय नम·।

अनुमित्यर्थकधातुयोगे विधेयत्व विधेयित्व वा द्वितीयार्थः ते वह्न्यादिपक्षकानुमितिपरस्य वह्निमनुमिनोमि इत्यादिवाक्यस्य न प्रामाण्यम्।

COLOPHON· इति शब्दपरिच्छेद [.] समाप्त.।

2154. स्फोटचन्द्रिका

OPENING

श्रीमारुतिर्जयतितराम् ।

पित्रो पादयुग नत्वा जानकीरघ(रघु)नाथयो ।
मौनिश्रीकृष्णभट्टेन तन्यते स्फोटचन्द्रिका ॥ १ ॥

COLOPHON

इति स्फोटचन्द्रिका समाप्ता ।

2158. कातन्त्रविभ्रमसूत्रं सटीकम्

Ct-OPENING

नत्वा रमेश स्वगुरु च भक्त्या तत्तत्प्रसादाप्तसुसिद्धिशक्त्या ।
तत्सम्प्रदायादवचूर्ण(र्णि)मेता लिखामि सारस्वतसूत्रयुक्त्या ॥ १ ॥

प्राय प्रयोगा दुर्ज्ञेया. किल कातन्त्रविभ्रमे ।
येषु मोमुह्यते श्रेष्ठ शाब्दिकोऽपि यथा जड ॥ २ ॥

कातन्त्रसूत्रविसर खलु साम्प्रत यत्रातिप्रसिद्ध इह चाखिलरो गरीयान् ।
स्वसेतरस्य च सुबोधविवर्द्धनार्थं किञ्च विभावस्सफलो लिखितप्रयास ॥ ३ ॥

कस्य धातो इति ।

Ct-CLOSING

मवद्रामरसाद्रिभूपरिमिते वर्षायने दक्ष(क्षि)णे,
पौषे मासि शुचौ तिथिप्रतिपदि प्राङ् भौमवारेऽत्ररौत् ।
श्रीमत्प्रागरनीलकण्ठतनयो नाम्नान्त गोपालक-
ष्टीकामस्य विशुद्ररम्यसुगमा काव्यस्य दुर्गस्य वं ॥ १ ॥

COLOPHON

इति कातन्त्रविभ्रमकाव्यस्य टीकासमाप्यभूत् ।

Post-Colophonic

सवत् १६२४ का मिती मार्गशीर्षसित पक्षे तिथौ २ भानुवासरे अंरस्वत् कृ। हरचदेन श्रीपार्श्वचन्द्रसूरिगच्छे भट्टारकोत्तमभट्टारकजी श्री श्री श्री श्री १००८ श्री श्री श्री श्री श्री हेमचन्द्रसूरिजीजीङ्क्ः चरणकमले सेवाकरणार्थ श्रीमक्सूदाबादस्याजीमगजे श्रीजाह्नवीतटे स्थितमस्ति ।

2159. कातन्त्रविभ्रमावचूरिः

OPENING

नत्वा जिनेन्द्र सुगुरु च भक्त्या तत्तत्प्रसादाप्तसुसिद्धिशक्त्या ।
मत्सम्प्रदायादवचूर्णिमेता लिखामि सारस्वतसूत्रयुक्त्या ॥ १ ॥

प्रायः प्रयोगा दुर्ज्ञेया किल कातन्त्रविभ्रमे
येषु मोमुह्यते श्रेष्ठ शाब्दिकोऽपि यथा जड ॥ २ ॥

कातन्त्रसूत्रविसर खलु साम्प्रत यत्रातिप्रसिद्ध इह चाखिलरो गरीयान् ।
स्वस्येतरस्य च सुबोधविवर्द्धनार्थोऽस्त्वियत्र ममात्र सफलो लिखितप्रयासः ॥३॥

कस्य धातोरित्यादीनामेकस्मिन् प्रत्यये स्पष्टम् । × × × × गु निगरणे गु
सप्तसु स्थानेषु स्यात्र सव पूर्व सर्वे सनघनने घव प्रत्यय ।

CLOSING · वाणाश्वषडिन्दुमिति सम्वति धवलक्कपुरे वरे समहे ।
श्रीखरतरगणपुष्करसुदिवापुष्टचकाराणा ॥ १ ॥
श्रीजिनमाणिक्याभिधसूरीणा सकलसार्वभौमानाम् ।
पट्टे वरे विजयेषु श्रीमज्जिनचन्द्रसूरिराजेषु ॥ २ ॥ गीतिः
वाचकमतिभद्रगणे शिष्यस्तदुपास्त्यवाप्तपरमार्थ ।
चारित्रसिंहसाधुर्व्यदधादवचूर्णिमिह सुगमाम् ॥ ३ ॥
यल्लिखित मतिमान्द्यादनृत प्रश्नोत्तरेऽत्र किञ्चिदपि ।
तत्सम्यक् प्राज्ञवरै शोध्य स्वपरोपकाराय ॥ ४ ॥

COLOPHON इति कातन्त्रविभ्रमावचूरि ।

Post-Colophonic : पट्टणमध्ये शिवमूर्त्तिना लिपीकृत शास्त्रम् ।

2163. सारस्वतटिप्पणम्

OPENING नम चिदात्मने ।
तदर्थतत्त्वाभिनिविष्टबुद्धिगर्वप्रतिक्षेपकयुक्तिलेशै ।
अल्पै पदै व्याकरवाम काम सारस्वत व्याकृतमप्यनल्प ॥

CLOSING . कृष्णाश्रम. श्रीचरणोपसत्तिमवाप्य सम्प्राप्तमतिप्रकर्ष. ।
क्षेमेन्द्रसूरिर्हरिभट्टसूनु सारस्वते टिप्पणमभ्यधत्त ॥ १ ॥
व्याख्या गुणान् परीक्षे(क्ष्ये)ह चिर नन्दतु सज्जन ।
दुर्जनोऽप्यसतो दोषान् दुष्टाशयपरिस्फुटान् ॥ २ ॥

COLOPHON इति श्रीनरेन्द्राचार्य सारस्वते क्षेमेन्द्रकृत टिप्पनं सम्पूर्णम्

2166. सारस्वतटीका

OPENING · ओ श्रीपरमात्मस्वरूपाय नम । श्रीगुरुभारतीभ्या नम ।
आनन्दैकनिधि देवमन्तरायतमोरविम् ।
दयानिलयन वन्दे वरद द्विरदाननम् ॥ १ ॥
श्रीवाग्देवतायाश्चरणारविन्दमानन्दसान्द्रे हृदि सन्निधाय ।
श्रीपुञ्जराज कुरुते मनोज्ञा सारस्वतव्याकरणस्य टीकाम् ॥ २ ॥

CLOSING इति प्रसन्नया वाचा विवक्ष्या(क्षा)र्थदात(मत)शयम् ।
टीका सारस्वतस्येय यथामति विनिर्मिता ॥ १ ॥
हिमालयादामलयाचलादौ विक्षोभयामास मही यशोभि ।
आसीन्नृपाल स्पृहणीय सपत्, साधु स देपाल इति प्रसिद्ध ॥ २ ॥

× × ×

सोऽय टीका व्यरचयदिमा चारु सारस्वतस्य,
व्युत्पित्सूना समुपकृतये पुञ्जराजो नरेन्द्रः ।

गम्भीरार्थैरचितविवृतैः स्वीयमूत्रं पविश्र-
मेनामभ्यस्यत इदमुदा शारदास्तु प्रसन्ना ॥ २२ ॥

व्याख्याविशेषोन्नयनप्रसङ्गात् श्रीपुञ्जराजो यदिहाऽभ्यधत्त ।
अविस्तर चार विनिश्चितार्थं सर्वं समूल समुपेक्षित तत् ॥ २३ ॥

COLOPHON इति श्रीश्रीमालकुलश्री श्रीमालभारश्रीपुञ्जराजनिर्मिता श्रीसारस्वतटीका सम्पूर्णा लिखिता ।

Post Colophonic : सवत् १६२१ वर्षे मार्गशिरमासे कृष्णपक्षे अद्येह श्रीअनन्तरपल्लिग्रामे सारस्वतटीका प्रति म. सहदे स. यादव उभयो सम्भूय ज्ञानकोशो ववृधे ।

2169 सारस्वतटीका

OPENING

ओं नम श्रीपरमात्मने ।

अलिकुलमण्डितगण्ड प्रत्यूहव्यूहतिमिरमार्त्तण्डम् ।
सिन्दूरारुणतुण्ड देव वेतण्डतुण्डमवलम्बे ॥ १ ॥

CLOSING

पृथ्वीमण्डलमौलिमण्डनमणिः श्रीरायवशामलो-
त्तस. श्रीनरसिंहसूरिरभवत् प्रत्यक्षवाचस्पति ।
तत्सूनोः कृतगूढभावविवृतौ सत्प्रक्रियाख्याकृतौ ।
श्रीकृष्णस्य कृतौ समाप्तिमगमद् द्विरवाश्रया प्रक्रिया ॥ १ ॥

COLOPHON

इति द्विरवनप्रक्रिया सम्पूर्णा ।

It is a ct on Prakriya-Kaumudi to be classified under 13(1) Paniniya

2173 सारस्वत-टीका 'दीपिका'

OPENING

ओं नमो ब्रह्मात्मिकायै । श्रीगुरुचरणकमलेभ्यो नम. ।

नमोऽस्तु सर्वकल्याणपद्मकाननभास्वते ।
जगत्त्रितयनाथाय परमाय परमात्मने ॥ १ ॥

CLOSING:

सुबोधिकायां क्लृप्तायां सूरिश्रीचन्द्रकीर्तिभि· ।
कृत्प्रत्ययाना व्याख्याना बभूव सुमनोहरम् ॥ १ ॥

X X X

श्रीचन्द्रकीर्त्तिसूरीन्द्रपादाम्भोजमधुव्रतः ।
हर्षकीर्त्तिरिमा टीका प्रथमादर्शकेऽलिखत्* ॥ ८ ॥

अज्ञानध्वान्तविध्वंसविधाने दीपिकानिभा ।
दीपिकेय विजयता वाच्यमाना बुधैश्चिरम् ।

---

*Harsakirti was not the commentator as mentioned in the text but he was only the first to copy out this work.

COLOPHON

इति श्रीमन्नागपुरीयतपागच्छाधिराजभट्टारकश्रीचन्द्रकीर्तिसूरिविरचिता श्रीसारस्वतव्याकरणस्य दीपिका सम्पूर्णा ।

Post-Colophonic

सवत् १६४६ वर्षे श्रामोसुदि १ भौमे । श्रीपूर्णिमापक्षे गच्छाधिराजश्री५श्री ललितप्रभसूरिस्तत्शिष्य मुनि-गुणराजेन लिखितम् ।

2176. सारस्वत-दीपिकाटीका

OPENING & CLOSING

The Same as at 2173

2218. सारस्वतप्रसादः

OPENING

श्रीपार्श्वनाथाय नम । श्री नम सरस्वत्यै । श्री श्रीगणेशाय नम. ।

श्री नमो गुरवे ।

वन्देय वृन्दारकवृन्दवन्द्यपादारविन्द दलितारिवृन्दम् ।
श्राभान्तमाधी(भी)रवधूभिरेत गोपालभूपालमल कृपालुम् ॥ १ ॥

यस्या निवासाद् वदनारविन्दे मन्दोपि वाचस्पतितामुपैति ।
सहस्रलम्पूर्णसुधांशुभासा सरस्वती सा सृजतान्मतिं मे ॥ २ ॥

श्रीचण्डीश्वरमानम्य दुण्ढिराजं तथा गुरुम् ।
सारस्वतप्रसादोऽयं वासुदेवेन दीप्यते ॥ ३ ॥

CLOSING:

श्रीचण्डीश्वरशिष्येण वासुदेवेन दीपिते ।
सारस्वतप्रसादेऽभूत् कृत्प्रत्ययनिरूपणम् ॥ १ ॥

× × ×

सवत्सरे वेदवह्निरसभूमिसमन्विते ।
शुचौ कृष्णद्वितीयायां प्रसादोऽय निरूपित ॥ ४ ॥

COLOPHON :

इति श्रीभट्टवासुदेवविरचित· सारस्वतप्रसाद सम्पूर्णम् ।

वर्षेऽद्रिनागाष्टशशाकनाम्नि ऊर्जे सिते चन्द्रदिने दशम्याम् ।
पुर्या विहारीऋषिणा शुभाया श्रीकोटलाया लिखितो हि ग्रन्थ ॥ १ ॥

उत्तराधगच्छाधीशश्रीश्रीश्रीश्रीश्रीश्री १०८ श्रीमदातपत्रधारकजैनाचार्यविमलचन्द्रस्वामीजी तच्छिष्येण विहारीऋषिणा लिखित सारस्वतप्रसाद श्री १०८ श्रीमत्पूज्याचार्यरामचन्द्रस्य शासने प्रवर्त्तमाने शुभ भवतुतराम् लेखकपाठकाना यन्मया किञ्चिदशुद्धमपि लिखित तत्सुज्ञैः शोधनीयम् ।

2244. सिद्धान्तचन्द्रिका

OPENING

श्रीगणेशाय नम ।

धातोः इदमधिक्रियते भ्वादि. क्रियावचनो भ्वादिर्धातुसज्ञ· आदनुदात्तङित अनुदात्तेतो ङितश्च धातोरात् जित् ।

CLOSING : भवतादूवो हयग्रीवः कमलावर ईश्वरः।
सुरासुरनराकारः मधुपापीतपल्लव ॥ १ ॥

COLOPHON इति श्रीरामाश्रमविरचितायां सिद्धान्तचन्द्रिकानुवृत्तिसमाप्तिमगमत्।

2263 लिङ्गानुशासनं सविवरणम्

OPENING. अर्हम्।
श्रीसिद्धहेमचन्द्रव्याकरणनिवेशितानि लिङ्गानि।
आचार्यहेमचन्द्रो विवृणोत्यर्हं नमस्कृत्य ॥ १ ॥

पद वाक्यमव्यय वेत्यनदत्त च तद्बहुल। विपुलाद्दृतम्
नि शेषनामनिङ्गानुशासनान्यभिसमीक्ष्य नसेषात्।
आचार्यहेमचन्द्र समद् (ज्) भ्नदनुशासनानि लिङ्गानाम्।

COLOPHON. इत्याचार्यश्रीहेमचन्द्रविरचितं स्वोपज्ञलिङ्गानुशासनविवरण समाप्तम्।
ग्रन्थाग्र ३३८१

Post.-Colophonic सवत् १६५७ वर्षे पोषमासे शुक्लपक्षे प्रतिपत्तियौ रविवासरे वीरटानगरमध्ये मुनिखीमावेन लिखितम्।

2274. हैमविभ्रमसूत्रवृत्तिः

OPENING अर्हम्।
निखिलजगदेकशरण्य भव्याम्भोरुहविकाननपटिष्ठम्।
मोहान्धकारभिदुर श्रीवीरार्क परं नौमि ॥ १ ॥

× × ×

सकलभुवनैकतिलक कुमतध्वान्तकपरौंकदक्षतमः।
नित्योदित स्थिरतरो जयति श्रीदेवसूरिरविः ॥ ४ ॥

सुखप्रबोधिकावृत्तौ स्पष्टसिद्धिसमन्विता।
सिद्धहैमानुसारेण क्रियते तत्रविभ्रमे ॥ ५ ॥

CLOSING. मयारि गुणचन्द्रेण वृत्ति स्वपरहेतवे।
देवसूरिक्रमाम्भोजचञ्चरीकेण सर्वदा ॥ २ ॥

× × ×

पट्टतर्ककर्कशमि(म)तिः कविचक्रवर्ती शब्दानुशासनमहाम्बुधिपारद(दृ)श्वा।
शिष्याम्बुजप्रकरबु भराचितमानु कश्चरत्न एव सुकृती जयति स्थिरायाम् ॥५॥

COLOPHONS. इति पण्डितपुण्डरीकेण श्रीकनकप्रभोपदेशेन तत्त्वप्रकाशिकावृत्ति श्रीदेवसूरिपादपद्मोपजीविना गुणचन्द्रेण स्वपरोपकारार्थं श्रीहेमचन्द्रव्याकरणाभिप्रायेण प्रारब्धि।

कस्य धातोस्तिवादीनामेकस्मिन्प्रत्यये स्फुटम्
परस्परविरुद्धानि रूपाणि स्युस्त्रयोदश ॥ १ ॥

× × ×

अव्याधयोऽमस्त स्याद् ये येषा चक्रिरे पदम् ।
अक्षेपयस्तया चान्यदक्षे वयममी वयम् ॥ २ ॥

इति श्रीहैमविभ्रमसूत्रम् ।*

2278 अनिट्कारिका सटीका

OPENING: अनिट्स्वरान्तो भवतीति दृश्यतामित्यादि ।

[टीका] स्वरान्तो धातुरनिट् भवतीति दृश्यता अवगम्यता वोध्य ज्ञायता तद्विदो वैयाकरणा । × × × × एतान् धातून् सेटो वदन्तीति ॥ १ ॥

CLOSING 'पचि वचिमित्यादि ।

[टीका] डुपचष् पाके । वच परिभाषणे । विचिर पृथग्भावे । × × × × एतान् धातून् इमातान् पूर्वोक्तान् स्वरान् च विद्धि ॥ ११ ॥

COLOPHON. इति अनिट्कारिका सम्पूर्णा ।

2278 (B) औजढत्साधना

OPENING: सत्ताशुद्धिसमृद्धिवृद्धिशयनस्थानासने भासने ,
सज्जाजीवनरोदने च दहने नृत्ये प्रलापे क्षुधि ।
सतुष्टौ रुचिशोकदोषमरणस्पर्द्धाविहारेषु च ,
ज्ञेयो धातुरकर्मको भयमदोन्मादप्रमादेषु च ॥ १ ॥

अकर्मकधातुना काव्यमिदम् ।

वह इति कतौ कृतिसम्प्रहारे ढोढस्तथोर्द्ध प्टुभिनाढिढश्च ।
ऊठौ च निर्डिच्च मधातु भेरढः द्विरच स्वरादेर्द्वेज औजढच्च ॥ १ ॥

[टीका] भू सत्ताया । विद सत्ताया इत्यादिसत्तार्थवाचका अकर्मका । × × × × × × अडि परे च वहतेर्धातो. पूर्वस्य ढस्य जो जकारो भवति । अनेन सूत्रेण ज.

औजढत्साधना सम्पूर्णा समाप्ता ।

2279 अनिट्कारिका सटीका

OPENING नैकस्वरादनुदात्तात् । २ आद्योच्चारणेऽनुदात्तादेकस्व[र]यातो परस्य वसादेरिट् न ।
अनिटस्वरान्तो भवतीति दृश्यतामिमास्तु सेट प्रवदन्ति तद्विद ।
अदन्तम् दन्तमृता[च] वृड्वृञौ श्विडीडिवर्णेष्वथ शीङ्श्रियावपि ॥ १ ॥

टीका—अथ सेट अनिटकारिका प्रोच्यते । अनिट्स्वरान्तो यो धातुर्भवति इति दृश्यता प्रवगम्यताम् ।

---

*The original Kātantra Vibhrama-sūtras have been commented upon according to the हैमव्याकरण

CLOSING दुहि जिघासाया । द्रोटा । द्रोहिता । द्रुहादीना विकल्पेन घत्व । रधादिभ्यश्चेति नट् । मुह् वैचित्य । मुग्धा । मोटा । मोहिता इत्यादि सेट् ।

COLOPHON अनिट्कारिका समाप्ता ।

Post Colophon . स० १७६५ वर्षे पोह वदि १८ दिन बुधिवासरे । लिखत कुशलविमलमुनिना ।

2283. अव्ययार्थादि

OPENING च पुनरर्थे समुच्चयादिषु च वा विकल्पार्थे ओपमार्थे च । ह् अह् इति द्वौ खेदार्थौ पादपूरणार्थौ च अहह इति खेदे ।

CLOSING परि सामस्त्ये उपसमीपवाची ।१८। श्रत् श्रद्धाया ।१६। अन्तर् मध्ये ।२०। अन्य अर्था वृहद्वृत्तिभ्यो ज्ञेया ।

इति प्रादि-अव्ययसज्ञा ज्ञेया ।

2286. उक्तिसङ्ग्रहभाष्यम्

OPENING वाचा कायेन मनसा श्रुत्वा वाच विधीयते ।
बालार्थमुक्तिमस्कार शास्त्राब्धिपरणदर्पण ॥ १ ॥
नम श्रीदेवभद्रेभ्यो गुरुभ्यश्च निरन्तरम् ।
येषा प्रसादमासाद्य बुधायते जडा अपि ॥ २ ॥

CLOSING भारतीभूषणमिद समप्राकृतसस्कृनम् ।
नित्य पठन्ति ये तपामस्तु स्वस्तिनिबन्धनम् ॥ १ ॥

COLOPHON इति वृत्तित्रयसारोद्धारे पण्डिततिलकविरचित भाष्य समाप्तम् ।

Post-Colophon लिखित भादावेन ।

2289. औक्तिकम्

OPENING प्रणम्य श्रीजिन वीर बालानामुक्तिसिद्धये ।
क्रियाकारकसम्बन्धसङ्ग्रह वच्मि किञ्चन ॥ १ ॥

CLOSING एवमपरेण दक्षिणेनोत्तरेणेत्यादिशेषमपरमप्याकारणकपादपरिसमाप्तिविचार्य-प्रयोक्तव्यमिति ।

COLOPHON पूज्याराध्यभट्टारकप्रभुश्रीसोमप्रभसूरीणां रचितमौक्तिक समाप्तम् ।

2293. कारकतत्त्वम्

OPENING श्रीगणेशाय नम ।

गमयति नेह मान देहविहीन च देह ज्यदीनाम् ।
स मयि गेवकभान प्राप्ते वाग्देवता दयताम् ॥ १ ॥

विरोधितातिरोधानक्षमो यस्य गिरा गए ।
वीरेश्वर गुरु शेपवशोत्तस भजामि तम् ॥ २ ॥

COLOPHON इति शेषचमपाणिपण्डितविरचित कारकतत्त्व समाप्तम् ॥

Post-Colophonic सवत् १७८२ पुष्यवदिप्रतिपदि गुरौ लिखितमिद लक्ष्मणेन ।

2296 कारकलक्षणम्

OPENING . श्रीकारकाणि कर्ता कर्म करण सम्प्रदानकम् ।
अपादानमाधार षट् स्यु सम्बन्धस्तु सप्तम ॥ १ ॥
उक्तानुक्ततया द्वेधा कारकाणि भवन्ति षट् ।
उक्तेषु प्रथममेव स्यादनुक्तेषु क्रमादिमा ॥ २ ॥

COLOPHON · इति श्रीमदमरकृत लक्षण कारकाणा षण्णा समाप्तम् ।

2301. गणदर्पणः (फोटोकॉपी)

OPENING × × × × काष्ठा दारणवेशा माता पुनाद्भुतश्च तय ।
(On f 3) भूशघोरा नाज्ञातामुतपरमाश्चेति काष्ठादि ॥ ४ ॥

COLOPHON . इति श्रीराजपितामह-श्रीचौलुक्यभूपालकुमारपालदेवेन दण्डवोमरि-प्रतिहार-भोज-देवार्थं विरचिते गणदर्पणे तृतीयस्वाध्यायस्य चतुर्थं पाद समाप्त । शुभ भवतु । ग्रन्थाग्र । ६०० ।

Post Colophonic : शके १३८३ वृषसवत्सरे पौषवदि १३ भौमे श्रीदेवगिरौ ऊकेशवशे श्रीदेवडागोत्रे सा० वीरापुत्रेण वीनपाले स सोना स. चापसीयुक्तेन ग्रन्थोऽय समलेखि । वा० *समयभक्तगणीनाम् ।*

2309. धातुतरङ्गिणी स्वोपज्ञटीकोपेता

OPENING : नमस्कृत्य महोऽनन्त नित्य सत्य चिदात्मकम् ।
स्वोपज्ञधातुपाठस्य क्रियते पञ्जिका मया ॥ १ ॥
श्रीसर्वज्ञ जिन नत्वा स्मृत्वा सारस्वत मह ।
सारस्वते धातुपाठ वक्ष्ये सक्षेपत स्फुटम् ॥ २ ॥

CLOSING . श्रीमन्नागपुरीयाह्वतपो ···· कजारुणा ।
श्रीचन्द्रकीर्तिसूरीन्द्राश्चन्द्रवच्छुभ्रकीर्त्तय ॥ १३ ॥
तच्छिष्या हर्षकीर्त्याह्वा सूरयो व्यदधु स्फुटम् ।
धातुपाठमिम रम्य सारस्वतमतानुगम् ॥ १४ ॥
खण्डेलवालसद्वशे हेमसिंहाभिध. सुधी ।
तस्याभ्यर्थनया ह्येष निर्मितो नन्दताच्चिरम् ॥ १५ ॥

CI-CLOSING
गच्छे यत्र पवित्रितावनितले हम्मीरदेवार्चित ,
सूरि श्रीजयशेखर सुचरितश्रीनेमर सद्गुरा ।
·· ·· वा पुरि सौहृडस्य वचनादल्लावदीभूभुजा ,
सद्वास पुरमान-दानमहित श्रीवज्रसेनो गुर ॥ १ ॥
शुद्धबोधजलागाधामिमा धातुतरङ्गिणीम् ।
अवगाह्य सुधी सम्यक् कुर्वता निर्मला मतिम् ॥ ७ ॥

COLOPHON
श्रीमन्नागपुरीयतपागच्छाधिपभट्टारकहर्षकीर्तिसूरिविरचित स्वोपज्ञधातुपाठविवरण सम्पूर्ण । समाप्ता चेय धातुतरङ्गिणीनाम्नी धातुपाठटीका ।

Post-Colophonic
सवत् १६५५ वर्षे कार्तिकशुदिपूर्णिमासीतिथौ लिखिता श्रीमन्नागपुरे एषा टीका ।

2316 प्रबोधचन्द्रिका

OPENING
श्रीगणेशाय नम ।

हरिहरगुरुभक्त सर्वलोकानुरक्त त्रिभुवनगतकीर्ति कान्तकन्दर्पमूर्त्ति ।
रणरिपुगणकालो वैजल क्षोणिपालो जयति जयति दाता सर्वकर्मविधाता ॥१॥
चन्द्रावती यदनचन्द्रचकोरविश्रमादित्यदेवतनयो नयतन्त्रवेत्ता ।
चौहानवशतिलक-पटनाधिनाथो राजा पर जयति वैजलदेवनामा ॥ २ ॥

CLOSING
प्रबोधचन्द्रिकायां च कृतौ वैजलभूपते ।
एषा विशेषत सुष्टु समाप्ता सन्धिचन्द्रिका ।

COLOPHON
इति श्रीवैजलभूपतिकृता प्रबोधचन्द्रिका बालावबोधिनी समाप्ता ।
समर्पितोऽयं गोपालकृष्णपादारविन्दयो ।
प्रबोधचन्द्रिकालेखश्रमः सोय सता मुदे ॥ १ ॥

Post-Colophon
सवत् १८५२ का शाके शालिवाहनि उत्तममासे जेष्टमासे कृष्णपक्षे तिथौ ९ सोमवार नें पोथी लिप्यकृत महात्मा रतनचद ।

2320. वाक्यप्रकाशः सटीक

OPENING
(On f 2)
तै र्धीयते मुग यैर्न भूयते रागरोषग्रस्तचित्तै ।
उचितप्रयोग एव क्रमेण कर्त्राद्यभावेषु ॥ ८ ॥

तै र्धीय० । अत्र पूर्वार्द्धे भावोक्तौ दृष्टान्तद्वय एव कर्त्तरि कर्मणि भावे चेति निर्दोक्ति ॥ ८ ॥

CLOSING
गुम्फगगनगगनांगणतरणिश्रीरत्नसिंहसूरीणाम् ।
शिष्याणुनेदमोदितबुद्धिमुदयधर्मगणिना ॥ १२३ ॥
मुनिगगनसरेन्दु १५०७ मिते वर्षे हर्षेण सिद्धपुरनगरे ।
स्वार्थमिरम्मुग्धहितोविहितो वाक्यप्रकाशोऽयम् ॥ १२४ ॥

COLOPHONS इति वाक्यप्रकाशाभिध उक्तिक समाप्तम्। सम्पूर्ण ग्रन्थाग्र. ६०० श्लोक-संख्या। मुनिवर्द्धमानलिखितम्। स० १६६३ माह सुदि ११

इति वाक्यप्रकाशाभिधस्य उक्तिटीका समाप्ति । × × × × तपागच्छाधिपति श्रीहेमविमलसूरीश्वरशिष्येण हर्षकुलपण्डितेन कृतम्। श्रीरस्तु। सवत् १६६३ वर्षे माह सुदि ११ बुधवारे। राडवरमध्ये लिखितम्।

2321. वासनाविवरणम्

OPENING. योगसम्बन्धमिच्छता छात्रेणावश्यमेवेति निश्चयेन निर्णयतो ज्ञातव्यमिति यावत् कतमत् तत्राह-पट्कारकाणि सम्बन्ध उक्तानुक्ततया द्विधा।

COLOPHON इति श्रीभीष्मविरचिते वासनाविवरण समाप्तम्।

2332 संस्कृत-प्राकृतोक्तिसमासः

OPENING महोपाध्यायश्रीराजविमलगणिगुरुभ्यो नमः।

कर्ता १ कम्म २ करण ३ सम्प्रदान ४ अपादान ५ सम्बन्ध ६ अधिकरणकारक ७ सातमउ सम्बन्ध।

CLOSING. आधारो यस्त्रिलोका (क्या) जलधिजलधरा मेदुवो यज्ञोज्या,
भुज्यन्ते यत्प्रसादादसुरसुरनराधीश्वरे सम्पदस्ता।
आदेशायस्य (द्यस्य) चिन्तामणिसुरसुरभे (रभी) कल्पवृक्षादयस्ते,
श्रीमान् जैनेन्द्रधर्मकिसलयन म व शास्वती शर्मलक्ष्मी॥

COLOPHONS: इति श्रीसंस्कृतप्राकृत उक्तिसमास समाप्त।

Post-Colophonic: लक्ष्मीविजयेन लखीत ईद शास्त्रम्।

2338 प्राकृतकामधेनुः

OPENING श्री गणेशाय नम।

ब्रह्माणमादौ शिरसा पितामह नमामि ता मातुरमादिविद्याम्।
श्रीरावणेन नवबुद्धिशालिना विधीयते प्राकृतकामधेनु॥ १॥

विस्तराद् गदित पूर्व संक्षेपादधुनोच्यते।
वालबोधकर सूत्र दक्तो यादृग् नवोद्धृतम्॥ २॥

देवरत्या प्रतीनाना तद्भावना निगद्यते।
लक्षण नेह यत् सिद्ध तत्सम देशज च तत्॥ ३॥

HON इति श्रीविद्याभक्त-श्रीरावणकृतकामधेनु समाप्ता।

2347 अनेकार्थसङ्ग्रहकैरवाकरकौमुदीटीका

OPENING

अर्हम्।

परमात्मानमानम्य निजानेकार्थसङ्ग्रहे।
वक्ष्ये टीकामनेकार्थकैरवाकरकौमुदीम् ॥ १ ॥

× × ×

व्युत्पत्तिलिङ्गनिर्णीतिविषमार्थप्रकाशनम्।
प्रायेण दृष्टदृष्टान्तो वाच्यमत्र चतुष्टयम् ॥ ८ ॥

CLOSING & COLOPHON

इत्याचार्यश्रीहेमचन्द्रविरचितायामनेकार्थकैरवाकरकौमुदीत्यभिधानायां स्वोपज्ञानेकार्थसङ्ग्रहटीकायां अनेकार्थशेषाव्ययकाण्ड सप्तम।

श्रीहेमसूरिशिष्येण श्रीमन्महेन्द्रसूरिणा।
भक्तिनिष्ठेन टीकेयं तन्नाम्नैव प्रतिष्ठिता ॥ १ ॥

× × ×

परिपूर्णा चयमनेकार्थसङ्ग्रहटीकानेकार्थकैरवाकरकौमुदीत्यभिधानेति।

Post-Colophonic

सुदृढश्रेयोमूलः परार्द्ध्यशाखाप्रपञ्चरोचिष्णुः।
वशोऽस्ति धवकंटाना फलभृदपि न नश्वरप्रकृतिः ॥ १ ॥

तत्रासीत् पार्श्वनागाख्य श्राद्ध श्रद्धालुतानिधि।
तस्याङ्गज सता मुख्यागोल्व प्रोल्लासिकीर्तिभाक् ॥ २ ॥

× × ×

अभिधानकोशमेतदनेकार्थं लिलेख भो।
दृष्टिवसुसूरमस्ते विक्रमभूपवत्सरे ॥ १६ ॥

मुनेखकोऽत्र लावण्यसिंहनामा प्रसिद्धिभाक्।
मदक्षरैर्विनिर्माता ब्राह्मणोऽत्र प्रकीर्तित ॥ १७ ॥

2382 एकाक्षरनाममाला सटीका

OPENING

अथ एकाक्षरीनाममाला लिख्यते—

विश्वाभिधानकोषानि प्रविलोक्य प्रभाष्यते।
अमरेण कवीन्द्रेणैकाक्षरनाममालिका ॥ १ ॥

अर्थ—अमरकवि एकाक्षरनाममाला कहै छै समस्त नाममाला देखिनें ॥ १ ॥

सा लक्ष्मी हो निपाते च हस्ने दारुणि शूलिनि।

CLOSING.

क्ष क्षेत्रे रक्षसीत्युक्ता माला श्रावसूरिसम्मता।
नाम्नामेकार्थनानार्थकाक्षराणामियं सदा ॥ २० ॥

अर्थ—सा. लक्ष्मीनें ह निपाति नें कहियें हाथनें महाप्टनें माहादेव नें, क्ष गेतनें राक्षस नें कहियें। एकार्थ नानार्थ इमा जे एकाक्षरी नाम तेह्नी माला मे कही। परिण तेह्वी छे पूर्वाचार्यें मानी छे।

COLOPHON — इति एकाक्षरनाममाला समाप्ता । तत्समाप्तौ समाप्त ।

Post-Colophonic — संवत् १८८३ ना वरषे ज्येष्टसुद १५ शनौ वासरे संपूर्ण लिखित चेला रगजी स्ववाचनार्थ । श्रीकच्छदेशे श्रीमा(न)कुन्थाग्रामे श्रीसुपार्श्वजिनप्रसादात् ॥

2386. एकाक्षरनाममाला

OPENING — श्रीभाषायै नम ।

घा(ध्या)त्वा नत्वा निरीक्ष्यान्त करणे कर्मसाक्षिणम् ।
क्रियते नूतना नाममालैकाक्षरवाचिका ॥ १ ॥
यतयो ये पर पार शब्दाम्भोधेर्गता मता ।
एषा तेषामतो मान्या महामावमनीषिणाम् ॥ २ ॥

COLOPHON: — इति श्रीविश्वशम्भुप्रणीता एकाक्षरीनाममालिका ।

Post Colophonic — लिखिता विद्याविलासेन सोल्लासेन । श्रीयोधपुरे पुरि ।

2387. एकाक्षरनाममाला

OPENING· — ओ नम ।

अथ एकाक्षरीनाममाला लिख्यते -

नत्वा शङ्करपादपद्मयुगल ज्ञानाय हेतो सखे,
नानाग्रन्थविलोकिता पुनरहन(म्) ज्ञात्वा मया लिख्यते ।

COLOPHON. — श्रीदामोदरजागरूकवसुधा तस्यात्मनो श्यामराट्,
तेनाय वितनोदभूत सु[क]वये श्रीकालिदासाभिधः ॥ १ ॥

CLOSING — प्रल्हादपुरसम्भूतो दामोदरोऽभवत् पुरा ।
ग्रन्थकर्त्ताभवत्तस्मात् कालिदासाभिध कवि ॥ २ ॥

COLOPHON- — इत्येकाक्षरीनाममाला सम्पूर्णा ।

2390. गाथाकोशः

OPENING: — ओ नमो जिनाय । सरस्वत्यै नम ।

एसु वयणा रोमाहणपडिमासकनमोरिमुट्यद ।
गहियग्ध पकय पिव सम्मासलिलजलिं णमह ॥ १ ॥

उत्प्रेक्षानामालङ्कार ।

सत्तसयाइ कइ वत्सलेण कोडीए मज्झयाराओ ।
हालेण विरहयाण सालकाराण गाहाण ॥ २ ॥

CLOSING: — विभाव हणा लाव मा पल्ली कुणउ गामिणी समइ ।
पच्चुजीवो जइ कहवि सुणइ वा जोविम मुयइ ।

2401 शारदीयनाममाला

OPENING श्रीसरस्वत्यै नम ।

प्रणम्य परमात्मान सच्चिदानन्दमीश्वरम् ।
गृह्णाम्यह नाममाला मालामिव मनोरमाम् ॥ १ ॥

CLOSING श्रीमन्नागपुरीयनाह्वयतपागच्छाधिपा सज्जपा ,
सूरिश्रीप्रभुचन्द्रकीर्तिगुरवस्तेषा पदानुग्रहा·(त्) ।
भूपाभिज्ञजनोचिता लघुतरा श्रीनाममालामिमा ,
चक्रे श्रीगुरुहर्षकीर्तिरलिखत् वरग्रामणी ॥ ३२ ॥

भूद्वीपसरदद्रिनभा·· · पातालदिव्ज्वलनवायुवनानि यावत् ।
यावन्मुद विरतनो भुवि पुष्पदन्तौ तावत् स्थिरा विजयता वत नाममाला ॥३३॥

COLOPHON इति श्रीहर्षकीर्तिसूरीश्वरविरचिताया लघुनाममालाया तृतीयकाण्ड सम्पूर्णम् ।

Post Colophonic लिखत्व ऋ मनरुप स्वात्मार्थे स० १८६४ शाके १७६० प्रवर्तमा मगसरवद २ भोमवासर मुरगडनयरे मद्यारीयादेग ।

2407· कविकर्पटिका

OPENING : श्रीगणेशाय नम. ।

य वातत्वसुधानिधानकलश साहित्यरत्नालय ,
सानन्दस्फुटगद्यपद्यवचनप्रागल्भसद्वोदय ।
पट्त्रय्यामृतपूरपूर्णवदन मद्वृन्दचन्द्रोदय-
स्तस्येव कविकर्पटीकरचना कण्ठ प्रतिष्ठाप्यताम् ॥ १ ॥

मत्वादिमा कण्ठगता विशरितो श्रुतोपदेशात् विदितोपदेश ।
प्रज्ञातशब्दार्थविनिश्चयोपि श्लोक करोत्येव सभासु शीघ्रम् ॥ २ ॥

COLOPHON इति श्रीकविराजशङ्खधरविरचिता कविकर्पटीकरचना सम्पूर्णतामगमत् ।

2408· गाथालक्षणं सटीकम्

OPENING नमिऊण चलणजुअल नमिजिणिंदस्स भावओ पयओ ।
गाहालक्खणमेय वुच्छामि गुरुवएसेण ॥ १ ॥

अस्य व्याख्या—श्रयीना स्थितिरिय कवय. शास्त्रारम्भे प्राग्नीर्नमस्क्रियावस्तुनिर्देशो-(ग) कुर्वन्ति । अत आह—नेमिजिनेन्द्रस्य चरणयुगल नत्वा अह गुरूपदेशेन एतद् गाथालक्षण वक्ष्यामि । विवि० अहं भावतः प्रयत मादरः ॥ १ ॥

CLOSING : इअ अनुरूा सामलित्त अपरा जे सम्मुद्दयिम ।
जेहि नवकड वयण नागनेहि नहेहि त्ति ॥ ८८ ॥

पञ्चमश्चक्री षोडशो जिन. श्रीशान्तिरितिगम्यम्। × × × × × अनेन तस्य रवेरपि सेव्यत्वमुक्तम् ॥ ६३ ॥

प्रस्तारो यथा।

2409 छन्दःकोशः

OPENING आजोयएाद्विशाए सुरनरतिरियाएहरिसजएाणी।
सरसरवन्नछदा सुमहत्था जयउ जिएवाएी ॥ १ ॥

CLOSING. सूरीहि रयणसेहरनामेहिं सुद्धसीसबोहट्ठा।
विहिम्रो एसो गथो पढिज्जमाणो सुह देउ ॥ १०५ ॥

COLOPHON इति श्रीमन्नागपुरीयतपागच्छाधिराजभट्टारकश्रीरत्नशेखरसूरिकृतश्छन्द कोश सपूर्ण

2422. वृत्तरत्नाकरः सटिप्पण

OPENING सुखसन्तानसिद्धचर्थं नत्वा ब्रह्माच्युतार्चितम्।
गौरीविनायकोपेत शङ्कर लोकशङ्करम् ॥ १ ॥
वेदार्थशैवशास्त्रज्ञ पव्वेकोऽभूद् द्विजोत्तम।
तस्य पुत्रोस्ति केदार शिवपादार्चने रत ॥ २ ॥
तेनेद क्रियते छन्दोलक्षलक्षणसयुतम्।
वृत्तरत्नाकर नाम बालाना सुखबुद्धये ॥ ३ ॥
× × ×
षडध्यायनिवद्धस्य छन्दसोऽस्य परिस्फुटम्।
प्रमाणमपि विज्ञेय षट्त्रिंशदधिक शतम् ॥ ५ ॥

CLOSING. वशेऽभूत् कश्यपस्य प्रकटगुणगण शैवसिद्धान्तवेत्ता,
विप्र पव्वेकनामा विमलतरमतिर्वेदतत्त्वावबोधे।
केदारस्तस्य सूनु. शिवचरणयुगाराधनैकाग्रचित्तः
छन्दस्तेनाभिराम अचिरचितमिद वृत्तरत्नाकराख्यम् ॥ १ ॥

COLOPHON इति भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि षष्ठोऽध्याय. समाप्त। सम्पूर्णमिद छन्दोलक्षणम्।

2423. वृत्तरत्नाकर. सुगमाटीकासहितः

OPENING श्रीपार्श्वनाथ जिन नत्वा गणि समयसुन्दर।
वृत्तरत्नाकरच्छन्दोव्याख्यान कुरुते स्फुटम् ॥ १ ॥

CLOSING. वृत्तरत्नाकरे वृत्ति गणि समयसुन्दरः।
षष्ठाध्यायसबद्धा पूर्णा चक्रे प्रयत्नत ॥ १ ॥

COLOPHONS इति श्रीवृत्तरत्नाकराख्ये छन्दसि श्रीसमयसुन्दरोपाध्यायविरचिता वृत्तरत्नाकर-सुगमवृत्तौ षष्ठोऽध्याय. सम्पूर्ण ।

2425. वृत्तरत्नाकरः सुगमाटीकासहितः

OPENING As at no. 2423

CLOSING संवति विधिमुखनिधिरसशशिसंख्ये दीपपर्वदिवसे च ।
जालोरनामनगरे लूणिया फसलापितस्थाने ॥ २ ॥

श्रीमत्खरतरे गच्छे श्रीजिनचन्द्रसूरय ।
तदा सकलचन्द्राख्यो विनय प्रथमोऽभवत् ॥ ३ ॥

तच्छिष्यसमयसुन्दर एतां वृत्तिं चकार सुगमतरान् ।
श्रीजिनसागरसूरिप्रवरे गच्छाधिराजेऽस्मिन् ॥ ४ ॥

य कोपि मत्सरी मूढ प्रशस्ति न लिखिष्यति ।
स लोके लप्स्यते निन्दा कुगिर्भावी परत्र च ॥

COLOPHON इति वृत्तरत्नाकराख्ये छन्दसि श्रीसमयसुन्दरोपाध्यायविरचितायां वृत्तरत्नाकर-सुगमवृत्तौ षष्ठाध्याय । सम्पूर्ण ग्रन्थाग्र १२००

Post Colophonic संवत १६६६ वर्षे चैत्र सुदि १० रवौ लिखितमिद पुस्तकम् ।

2427. वृत्तरत्नाकरः सटीकः

OPENING यत्पादाग्रनखासुराजिररुणानप्रालिके राजते
तत्कालागतसम्पद पदतति सद्याचक कोकिला ।
त नत्वा प्रथमङ्कलेश्वरतति सकल्परत्नद्रुम ,
श्रीमत्पार्श्वजिनेश्वर मदगज मोहाद्रिमोन्मूलने ॥ १ ॥

गुरो प्रसादादधिगम्य वृत्तरत्नाकरच्छन्दस उद्यमेन ।
सार मया किञ्चिदथास्य वृत्तिर्विधीयते मुग्धसुबोधहेतो. ॥ २ ॥

CLOSING & COLOPHON वादिश्रीदेवसूरेर्गणगगनविधोर्बिभ्रतः शारदाया
नाम प्रत्यक्षपूर्वं सुज्यपदमृता (तो) मङ्गलाह्वस्य सूरे ।
पादद्वन्द्वारविन्दे बुधमधुपहिते भृङ्गभङ्गि दधाना
वृत्ति सोमोऽभिरामामकृत कृतिमता वृत्तरत्नाकरस्य ॥ १ ॥

× × × ×

श्रीविक्रमनृपकाले नन्दवरद्वीपयोनिशशिसंख्ये ।
समजनि रजोत्सवदिने वृत्तिरियं मुग्धबोधकरी ॥ ४ ॥

सर्वाग्र ग्रन्थाङ्के रुद्रमितशतानि नवनियुक्तानि ।
प्रथानुष्टुप्युगगणनायोगात्शतानि किञ्चिदधिकानि ॥ ५ ॥

सम्पूर्णा चेय पण्डितसोमचन्द्रकृता वृत्तरत्नाकरछन्दोवृत्तिः सम्पूर्णा समाप्त. ।

2432. श्रुतबोधः

OPENING

छन्दसा लक्षणं येन श्रुतमात्रेण बुद्धयते ।
तदहं रचयिष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥

CLOSING

विमलकमलचारुचञ्चत्कटाक्षाक्षिविक्षेपनिक्षेपलुभ्यत्प्रकामाभिरामाभिकरञ्च सन्मानसे ।

भवति यदि हि वर्णषट्क तथाद्यलघुश्चोभवेद्दण्डकाख्य पुनर्यन नो युग्ममन्ते गणा राजिरा ।

रसनयनमिताक्षराद्रूर्ध्वमानो निधिव्यालखेटोन्मितैरक्षरैर्वध्यमानो भवेदन्यगःस्त्वादिग. ।

स्फुटमिह यतिरीशसूनोर्मुखैरग्निभि स्मारसौवर्णकुम्भाभवक्षोजपीठेऽलुठत्तारहारेऽनिशम् ॥ १ ॥

COLOPHON

इति श्रीकालिदासकृतश्रुतबोध ।

Post-Colophonic

प० कुशरकुशलग । लिखितम्

2437. श्रुतबोधो मनोरमाटीकासहितः

OPENING

श्रीगणेशाय नम ।

वन्दे विश्वेश्वर देव वा[च]स्पतिमुखान् गुरून् ।
मातर पितर नत्वा निर्विघ्नेप्सितसिद्धये ॥ १ ॥

नत्वा भवानीचरणारविन्द मनोहरेण क्रियते विचार्य ।
माणिक्यमल्लक्षितिपालतुष्ट्यै सुबोधनीय श्रुतबोधटीका ॥२॥

COLOPHON.

इति श्रीसमस्तनृपतिशिरोमणिरञ्जितपादपीठमाणिक्यमल्लकारिता श्रीमनोहरशर्मकृता श्रुतबोधटीका सुबोधिनी सम्पूर्णा ।

2439. श्रुतबोधः सटीकः

OPENING

श्रीगणेशाय नमः ।

शुभजननसमर्थावादिनाथस्य पादावसुरसुरमनुष्यैर्भूरिवन्द्यौ हि नत्वा ।
ललितपदसुरम्या शास्त्रबोधस्य टीका मुनिरहमिह कुर्वे हंसराजो विचित्राम् ॥ १ ॥

सुगुरुवचनदीपैर्दर्शित तत्त्वरूप मम हृदयगुहान्तेनुग्रहाद्यत्तदेव ।
मृदमहमभिधास्ये बालबोधिप्रसन्न निजपठननिमित्त बालबोधाय चैव ॥ २ ॥

COLOPHON

इति श्रीकविकालिदासविरचित श्रुतबोधस्य टीका सम्पूर्ण समाप्तम् ।

2442. अप्पयदीक्षितवृत्तिवार्तिकम्

OPENING:

श्रीगणेशाय नम । श्रीगोपीजनवल्लभाय नमः ।

विश्व प्रकाशयन्ति व्यापारैर्लक्षणाभिधध्वननैः ।
नयनैरिव हरिमूर्त्तिर्विबुधोपास्या सरस्वती जयति ॥ १ ॥

वृत्तय. काव्यसरणावलङ्कारप्रबुद्धिभि ।
अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिता ॥ २ ॥

तत्र क्वचिद् वृद्धै-र्विशेषा न स्फुटीकृतान् ।
नि(दि)ष्ट वयितुमस्माभि क्रियते वृत्तिवार्तिकम् ॥ ३ ॥

COLOPHON: इति अप्पय्यदीक्षितवृत्तिवार्तिकम् ।

Post-Colophonic नवत् १६१० वर्षे मार्गशीर्षशुक्लपक्षे तिथौ पचम्या चन्द्रवासरे ब्राह्मणज्ञातीय साचोरामास्त्रि उपनामक धीरजरामपुत्रमानदरामेण अस्मिन् देवपत्तने लिखित स्वपठनार्थम् ।

2443. उज्ज्वलनीलमणिः

OPENING श्रीगणेशाय नमः । श्रीगोपीनाथाय नम ।

श्रोनामा कृष्णरसजः श्रीलेनोद्दीपयन् सदानन्दम् ।
निजरूपोत्सवदायी सनातनात्मप्रभुर्जयति ॥ १ ॥

मुख्यरसेषु पुरा य सक्षेपेणोदितो रहस्यत्वात् ।
पृथगेव भक्तिरसराट् सविस्तरेणोच्यते मधुर ॥ २ ॥

CLOSING: अयमुज्ज्वलनीलमणिर्गहनमहाघोषसागरप्रभवः ।
भजतु तव मकरकुण्डलपरिसरसेवोचिती देव ॥ १ ॥

COLOPHON: सम्पूर्णोऽयमुज्ज्वलनीलमणि ।

Post-Colophonic स० १६४० पौषशुक्ल १५ लिखित ब्राह्मण रामनारायण चत्रीश्वर जयलालजी वाचनार्थं । उज्ज्वलनीनमणि ग्रन्थ ।

2444. कविरहस्यम् (अपशब्दभाषाकाव्यम्) सावचूरि

OPENING. श्रीवीतरागाय नम. ।

जयन्ति मुरजित्पादनखदीधितिदीपिका ।
मोहान्धकारविध्वंसान्मुक्तिमार्गप्रकाशिका ॥ १ ॥

कवि स्वकाव्यादौ इष्टदेवता नमस्करोति, तन्नमस्कारात् पुण्यप्राग्भारो भवति, तस्माच्च विघ्नविनाश स्यात् । त विघ्न विनाश मन्यमानो हलायुध आह-

काव्य हलायुधकृत कविगुह्यनाम व्याविह तस्य रविधर्मकृतास्ति टीका ।
यन्म्यमत्तो यदि वदन्ति बुधा विवादे स्पष्टं त्रियामरपदैविजय लभन्ते ॥ ६७ ॥

अपशब्दभासाम्ये काव्ये टीका शतानि दश विहिता[नि] ।
श्लोकानामधिकानि कविना रविधर्मसंसतेन ॥ ६८ ॥

Post-Colophonic सवत् १५६३ वर्षे पौषमासे कृष्णपक्षे सप्तम्या तिथौ श्री श्री श्री श्री श्री श्री पुण्यरत्नसूरिविनेयेन मुनिमाव्रतनेन अपशब्दभासाख्यकाव्यमलेखि ।

2451. काव्यप्रकाशः सटीकः

OPENING श्रीगणेशाय नम ।

मुखैश्चतुर्भि स्तुवते विधात्रे स्तोत्रं श्रुतीना च चतुष्टयाय ।
भुजैश्चतुर्भिश्चतुरोथवर्गान् नमो ददानाय चतुर्भुजाय ॥ २ ॥

× × ×

मम्मटभट्टस्तु ता कारिका सोदाहरण व्याख्यातु कारिकाग्रन्थादिभूता नियति-कृतत्यादिकारिका व्याख्यातुमुपस्थापयति । ग्रन्थारम्भ इत्यादि ।

CLOSING इतिहासादीनामित्यत्रादिपदानाटयाङ्गपरिग्रह । निपुणतापदार्थमाह-व्युत्पत्ति सस्कार स चावक्षणीयार्थविपय ।

2452. काव्यप्रकाशसङ्केत.

OPENING स्वस्तिश्रीमन्महागणाधीशाय नम ।

अपरतन्त्रामित्युक्ते यथा परिमाण्वादिपारतन्त्र्यनिरासस्तथा कविपारतन्त्र्यनिरा सोऽपि भारत्या स्यादित्यपशब्दोपादानम । कवेर्यस्य परमाण्वादेरधीना न भवति कवमस्वधीनैवत्यर्थ ।

CLOSING & COLOPHON इति काव्यप्रकाशसङ्केते दशम उल्लास । १० ॥ समाप्तश्चाय काव्यप्रकाशसङ्केत कृतौ राजानकमम्मटालकस्वकानाम ।

2453. काव्यालङ्कारः (शृङ्गारहार:)

OPENING श्रीगणेशाय नम ।

विघ्नेश विघ्नहन्तार सर्वकामफलप्रदम ।
करुणाकोमल कान्त वन्दे देव गजाननम ॥ १ ॥

पौत्र श्रीवसुदेवस्य केस(श)वस्याङ्गसम्भव ।
ग्रन्थ शृङ्गारहाराख्य बलदेव करोम्यहम ॥ २ ॥

COLOPHON इति श्रीबलदेवविरचिते काव्यालङ्कारे शृङ्गारहारे तृतीयो विभाग ।

Post-Colophon लिखितमिद उदयकुशलेन ।

2456. चन्द्रालोकः

OPENING श्रीभवान्यै नम । अविघ्नमस्तु ।

उच्चैरस्यति मन्दतामरमता जाग्रत्कलङ्कं रव-
च्छस हरतयने च या सुमनसामुल्लासिनी मानसे ।
दुष्टोद्य मदनाशनाचिरमला लोकत्रयीदीपिका,
सा नेत्रत्रितयीव खण्डपरशोर्वाग्देवता दीव्यतु ॥ १ ॥

हृद्ो चिन्मयचित्तचन्द्रमणयस्सवर्द्धयध्व रसान् ,
रे रे स्वैरिणि निर्विचारकविते मास्मत्प्रकाशीभव ।
उल्लासीयविचारवीचिनिचयालङ्कारवारानिधे-
श्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्ष. कृती ॥ २ ॥

CLOSING पीयूषवर्षप्रभवं चन्द्रालोकं मनोहरम् ।
सुधानिधानमामाद्य श्रयध्व विबुधा मुदम् ॥ ५ ॥
जयन्ति याज्ञिकश्रीमन्महादेवाङ्गजन्मन. ।
सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः ॥ ६ ॥

महादेव सत्रप्रमुखमखविद्यैकचतुर सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ।
प्रणीतस्तेनासौ सुकविजयदेवेन दृ(द)राभिदिचर चन्द्रालोक(को) रचयतु मयूखैर्दश दिश ॥ ७ ॥

COLOPHON: इति श्रीपीयूषवर्षपण्डितश्रीजयदेवविरचिते चन्द्रालोकालङ्कारे अभिधास्वरूपाभिधानोत्तमो दशमो मयूख ।

2457. चन्द्रालोक:

OPENING श्रीगणेशाय नमः ।

उपमा यत्र सादृश्य लक्ष्मीरुल्लसति द्वयो ।
हसीव कृष्ण ते कीर्ति स्वर्गङ्गामवगाहते ॥ १ ॥

CLOSING शृङ्गारहास्यकरुणारौद्रवीरभयानका ।
जुगुप्साद्भुतसञ्ज्ञ चेत्यष्टौ नाट्ये रसा [.] स्मृता ॥ १७३ ॥

COLOPHON · इति श्रीअलङ्कारग्रन्थ चन्द्रावलोक सम्पूर्णम् ।

Post-Colophonic: सवत् १६२४ का फाल्गुनमासे कृष्णपक्षे तिथौ १० मगलवाशरान् मुताया लिखित ववेश्वर चिरु जयलालेन । कृष्णगढमध्ये । स्वाध्ययनाय ।

2458. चन्द्रालोकः सटीकः

OPENING ॐ स्वस्ति श्रीगणेशाय नम ।

पृथ्वी पृथ्वी न पद्म्या न च वहति नभस्तुङ्गतामुत्तमाङ्गात् ,
पाणिप्रक्षेपयोग्य दधति दश दिश: किञ्च नैवावकाशम् ।
कुर्या किं वा न कुर्या त्रिपुरविजयिनस्ताण्डवे चिन्तयेत्थ,
व्यग्र सर्गादिहेतुस्त्रिदशगणनुत श्रेयसे भैरवोऽस्तु ॥ १ ॥

× × ×

देवपतेरिव शक्तिर्यस्य जने भूभृता प्रथिता ।
श्रीवीरसिंहदेवस्तत्र परामण्डने जात ॥ ४ ॥

दशरयतो रघुपतिरिव तस्मादिह वीरभानुभूपाल. ।
आवद्धधर्मसेतुर्जगति समुद्रे समुद्भूत ॥ ५ ॥

तत्तनयो नयनिर्मलकीर्ति स्वनिमग्ना कमलम् ।
श्रीरामचन्द्रदेवो दूषणहन्ता समुल्लसति ॥ ६ ॥

श्रीवीरभद्रदेवो वैरिवधूगीतसत्कीर्ति ।
जयति तदीयस्तनय कविगोष्ठीदेवताराम ॥ ७ ॥

क्रियते तस्य निदेशाच्चन्द्रालोकप्रकाशोऽयम् ।
शारदागम इति विदितो भट्टाचार्येण यत्नेन ॥ ८ ॥

CLOSING

श्रीवीरभद्रदेवेन भूदेवामरशासिना ।
यशोदागर्भरत्नेन यत्नेनेद विनिर्मितम् ॥

लक्ष्मीर्वक्षसि कौस्तुभप्रणयिनो यावत्तयार्द्धांगिता-
मङ्गीकृत्य पुरद्विषो गिरिसुता स्थेमानमालम्बते ।
यावददेवगिर पुराणविधयस्तावद्भुवो मण्डले
चन्द्रालोकविकाशमेष कुरुता ग्रन्थोऽभिरामोदय ॥

श्रीवीरभद्रचन्द्रभूपतिलब्धिनिदेशेन यत्नेन ।
चन्द्रालोकमयूखो दशम स्पष्टार्थता नीत ॥

COLOPHON: इति श्रीमहाराजाधिराजश्रीरामचन्द्रदेवात्मज युवराजश्रीवीरभद्रदेवादिष्टमिश्रबलभद्रात्मजमकलशास्त्रारविन्दप्रद्योतनभट्टाचार्यविरचिते चन्द्रालोकप्रकाशे शारदागमे दशमो मयूखः समाप्तः ॥ १० ॥

Post-Colophonic श्रीमहाराजाधिराजश्रीमत्पूज्याचार्यसिंहराजतत्पदविराजमान श्रीमहाराजाधिराजश्रीमत्पूज्याचार्यरामचन्द्रतच्छिष्यतुल्लार्यिनाम्ना लिखितेयं समूला स्वपठनार्थहेतवे। सवत् १६०१ मि० मा० शु० ६ ।

2459. चन्द्रालोकः सटीकः

OPENING

श्रीगणेशाय नम. ।

उपमानोपमेयत्व यदेकस्यैव वस्तुनः ।
इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥ १ ॥

COLOPHON: महादेवभट्टेन प्राकृतरचिता टीका समाप्तोऽयं चन्द्रालोक ।

Post Colophonic सवति १७४८ शाके श्रीमन्मूलस्थाणनगरे लिखितेय वृत्ति स्वहेतवे परेषा च पठनाय ।

2460 रसतरङ्गिणी नूतनतरीटीकासहिता

OPENING

श्रीगणेशाय नम ।

गौरी त्रिलोकजननी जनक जगत्या शम्भु शशाङ्ककलया च विराजमानम् ।
हृत्पुण्डरीककुहरे स्थिरभावयोगगम्य नमामि भगवानहमर्धसिद्धं ॥ १ ॥

श्रीमदाशाधरगुरोः प्रसादात् क्रियते मया ।
तरी रसतरङ्गिण्याष्टीकेयं नातिविस्तरा ॥ २ ॥

CLOSING & COLOPHON

इति श्रीकविकलानाथगुणनाथतनयमैथिलश्रीभानुदत्त-विरचितायां रसतरङ्गिण्यामष्टमस्तरङ्गः ॥ ८ ॥

पाण्डित्यं प्रकटीकृतं न च मया निर्मूलमत्राधुना ,
नो वा भूरितरो वृथाविरचितो वादो वितण्डात्मकः ।
काव्यानन्दरणायलङ्कृतिरता ज्ञात्वा मतं ते स्वतः ,
संक्षिप्तं प्रतिसत्कृतं रसतरंगिण्याः कृतेयं तरी ॥ १ ॥

आनन्दरामविबुधः प्रथितः परो यः काव्यायलङ्कृतिरसादिविभावकेषु ।
तत्सूनुना भगवता विदुषा कृतेयं टीकाऽधुना रसविवेकवती मुदे स्तात् ॥ २ ॥

ये मल्लिनाथकविकल्पितसम्प्रदायशिक्षाविलासरसिका विबुधा धरायाम् ।
ते [न] कृति रसविवेकवतीमधेमा दृष्ट्वा प्रहृष्टमनसः सुतरां भवन्तु ॥ ३ ॥

× × ×

अधीताऽऽशाधरगुरोर्यया रसतरङ्गिणी ।
तयैव रचिता तस्याष्टीकेयं कृतिनां मुदे ॥ ५ ॥

चन्द्राब्ध्यष्टेन्दुसम्मेऽब्दे १८४१ सप्ताश्वाद्रीन्दुजे शके १७०७ ।
ज्येष्ठे शुक्लनवम्यां च जातेयं सकला शुभा ॥ ६ ॥

इति श्रीमहोपाध्यायावटङ्काऽऽनन्दरामभट्टात्मजभगवद्भट्टविरचितायां रसतरङ्गिणीव्याख्यायां नूतनतरीसमाख्यायामष्टमस्तरङ्गः सम्पूर्णम् ॥ ८ ॥

इति श्रीरसतरङ्गिणीटीकायां सम्पूर्णम्

2475. रुद्रटालङ्कारटिप्पणकम्

OPENING :

निःशेषापि त्रिलोकी विनयपरतया सन्नमन्ती पुरस्ताद् ,
यस्याहि · नखाङ्गुलिविमल···दर्शसङ्क्रान्त···निस्वा ।
· · लीना यदङ्गमहारोति भीत्येव भाति ,
श्रीमन्नाभेयदेवः स भवतु भवतां शर्मदो धर्मभुवन ॥

पूर्वमहामतिविरचितवृत्त्यनुसारेण किमपि रचयामि ।
संक्षिप्ततरं रुद्रटकाव्यालङ्कारटिप्पनकम् ॥

CLOSING & COLOPHON

इति नमिसाधुविरचिते रुद्रटालङ्कारटिप्पणके पञ्चदशोऽध्यायः समाप्तः । [f 54]

× × ×

एवं रुद्रटकाव्यालङ्कारटिप्पणकविरचना · ।
बोधाद्विनयं विबुध विनयीद् यन्महामतिभिः ॥

मणोपनीयमखिल रचिताञ्जलिरेगया येह् ।

अर्यस्तिरगच्छतन्यून ग्रन्थोऽय पण्डितोऽखिल ।
द्वात्रिंशदक्षरश्लोकप्रमाणेन तु निश्चितम् ॥

CLOSING

वैक्रमेब्दे वसुद्वीपुभसख्ये मासि कार्तिके ।
ग्रन्थोऽनेखि सिताष्टम्या श्रीजयप्रभसूरिभि ॥ १ ॥

य पञ्चव्रतपालक शुभधियामानन्दसम्पादकः,
कर्मारातिजयोद्धुर सुगुणवान् पुण्यापगावारिधि ।
सूरिश्रीजर्यासहपट्टकमलालङ्कारहारश्चिर,
सूरीशो जयताज्जयप्रभ इति स्यात क्षमामण्डले ॥ १ ॥

Post-Colophonic

स० १५२८ वर्षे कार्तिकसुदि ८ सोमे श्रीजयप्रभसूरिभि शिष्य यशस्तिलक पठनार्थं ग्रन्थोय लिलिखे ।

2483. वाग्भटालङ्कारः सटीकः

W-OPENING

श्रीसर्वज्ञाय नम. ।

श्रिय दिशतु वो देव श्रीनाभेयजिन सदा ।
मोक्षमार्ग सता ब्रूते यदागमपदावली ॥ १ ॥

श्रीवर्द्धमानजिनपतिरनन्तविज्ञानमन्तनिर्जये[?य]ति ।
यद्गी प्रदीपकलिका कालतम शम नयति ॥ १ ॥

वाग्भटकवीन्द्ररचितालङ्कृतिसूत्राणि किमपि विवृणोमि ।
मुग्धजनबोधहेतो स्वस्य स्मृतिबीजवृद्धये च ॥ २ ॥

COLOPHON.

इति श्रीसकलविबुधशिरोमणीपण्डितसिंहदेवविरचिता श्रीवाग्भटालङ्कारवृत्ति सम्पूर्णा समजनिष्ट ।

Post Colophonic

वा० श्रीकुशलविमलजीशिष्य वा० श्रीकीर्तिसारजीशिष्य प० रत्नचन्द्रेण गृहीता श्रीराधणपुरमध्ये । पानो १ ओछो हतो ते सरुपचदजी अचलगच्छवाला तेणे पूर्ण करयो ।

2513. अङ्गविद्या

OPENING

अङ्गविद्या प्रवक्ष्यामि नारदेन च यत्कृतम् ।
अङ्गदर्शनमात्रेण ज्ञायते च शुभाशुभम् ॥ १ ॥

CLOSING

हस्तदन्त तथा जिह्वा नेत्रं पृष्ठि समेव च ।
ललाटो कर्णमध्ये च पुत्रजन्मो विधीयते ॥ १ ॥

नाभिको नासिकाश्चैव अगुली कडि कठिका ।
स्तनौ गुह्य वा मध्ये कन्या जन्मो विधीयते ॥ २ ॥

COLOPHON.

इति योषिता अङ्गस्पर्शो गर्भनिर्णय ॥

2514. कौतुकचिन्तामणिः

OPENING

ओं नमः ।

व्यामोहप्रशमो(शमौ)षधं मुनिमनोवृत्तिप्रवृत्तौषधं,
दैत्येन्द्रार्त्तिकरौषधं त्रिभुवनसञ्जीवनैकौषधम् ।
भक्तार्त्तिप्रशमौषधं भवभयप्रध्वंसनैकौषधं,
श्रेयःप्राप्तिकरौषधं पिब मनः श्रीकृष्णदिव्यौषधम् ॥ १ ॥

COLOPHON

इति श्रीमहाराजाधिराजप्रतापरुद्रदेवकृतचिन्तामणिग्रन्थकौतुकनिरूपणे तृतीयमाना (नाम)दीप्तिः ।

Post Colophon

संवत् १७६३ वर्षे शाके १६२८ प्रवर्त्तमाने महावदि ५ पंचमीतिथौ सोमवासरे पूनिमगच्छे वा० श्रीविनयविजयजी वा० श्री ५ श्रीनयविजयजी वाचकशिरोमणी वा० श्रीश्रीसत्यविजयजी वा० श्रीचतुरविजयजी ऋ० उदयविजयजी ऋ० उत्तमविजय म्हाहल्लपुरप ... लपीकृत श्रीगुरुप्रसादात् ।

2534. कामसमूहः

OPENING

.... रत्यन्ते मुखेनपारौ ।
कूजत्कुरंगनिस्कृति कोकिलास्य चूताश्रयान्तो कथितो वसन्तः ॥ ३७॥
प्रान्ते मन्मथसङ्गरे रतकृता सर्वो जनः सत्कृतो
वामोदाज्जघनस्थलस्य कुचयोर्हारः कटौमेखला ।
राग चोष्टपुटस्य गण्डितनता पाण्या(णौ) रत्नाङ्कुरा,
पादचार्त्तस्थितिरागत कचभरे न्याय्यं कृतं बन्धनम् ॥३८॥

COLOPHON: इति कामसमूहे सुरतवर्णनम् ।

Post Colophon: लिखितं पं० भोजकृष्णेन ।

2536. कामसूत्रं 'जयमङ्गला'टीकासहितम्

OPENING

श्रीगोपालो जयति ।

वात्स्यायनीयं किल कामसूत्रं प्रस्तावितं कैश्चिदिहान्यथैव ।
तस्माद् विधास्ये जयमङ्गलाख्यां टीकामहं सर्वविदं प्रणम्य ॥ १ ॥

CLOSING

इति वात्स्यायनटीकायां विदग्धाङ्गनाविरहकातरेण गुरुदत्तेन्द्रपादाभिधानेन यशोधरेण एकत्रकृतसूत्रभाष्यायां साधारणे प्रथमेधिकरणे शास्त्रसंग्रहः प्रथमोध्यायः ।

COLOPHON

इत्यर्जुन...राजनारायणमहाराजाधिराजचौलुक्यचूडामणि श्रीमद् वीसलदेवस्य भारतीभाण्डागारे वात्स्यायनीयकामसूत्रटीकायां जयमङ्गलाभिधानायां वैशिकमधिकरणं समाप्तम् ।

Post Colophon

सं० १६४५ का मीती शु(चै)त्रवदि १४ लिखतं ब्रह्म रामनारायण सोमवार ।

2544 शार्ङ्गधरसंहिता

OPENING

रोगाणां गणना पूर्व मुनिभिर्या प्रकीर्तिता ।
मयात्र प्रोच्यतेऽस्यैव तद्भेदावहो मता ॥ १ ॥

इति श्रीदामोदरसूनुना विरचितायां संहितायां चिकित्सास्थाने रसकल्पनाध्याय त्रयोदश । समाप्तोयं मध्यमो खण्ड ।

तत उत्तरखण्डमारभ्यते—अथ स्नेहपानविधि—स्नेहश्चतुर्विध × × × × × × × समन्वित रुक्षक्षतविषार्तानां वालपित्त० ।

2551. अनुपानमञ्जरो सस्तवका

OPENING

श्रीधन्वन्तरये नम ।

यस्य ज्ञानमयी मूर्त्ति सच्चिदानन्दकारिणी ।
तस्मात्पदपङ्कज वन्दे ग्रन्थसम्[पू]र्तिहेतवे ॥ १ ॥

धातुस्तथोपधातुश्च विष स्थावरजङ्गमम ।
तस्य विकारशान्त्यर्थं वक्ष्येऽनुपानमञ्जरी ॥ २ ॥

CLOSING

सवदष्टादशे वर्षे सागरानेत्रचाधिके ।
चैत्रे सिते च पञ्चम्यां गुरुवारे च ग्रन्थकृत् ॥ ३९ ॥

कूर्मदेशोऽर्जुनपुरः तत्र वासी सदा क्षिन्त ।
गुरुजीवाभिधानस्य गच्छ खागमसत्तक ॥ ४० ॥

तस्य पीताम्बरो शिष्य तत्पादवन्दक सदा ।
देवगुरुप्रसादेन विश्राम ग्रन्थकारक ॥ ४१ ॥

COLOPHON

इति श्रीअनुपानमञ्जर्यां धातूपधातुमारण रोगानुपानप्रकरण नाम पञ्चम-समुद्देस । समाप्तोऽयमिद ग्रन्थ ।

Post-Colophon c: म० १८५६ ना चैत्र वदि ३ शनौ ।

2552. अनुपानविधिः

OPENING.

श्रीधन्वन्तर्यै नम ।

नत्वा धन्वन्तरिं देव गणाध्यक्ष दिवौकसाम ।
अनुपानविधि वक्ष्ये समस्तमुनिसत्तमम् ॥ १ ॥

CLOSING: & COLOPHON

[f 24] इत्यायुर्वेदमहोदधौ श्रीसुषेणकृते धूपाधिकार ।

× × ×

न जीवत्यौषधद्वेषी भक्तद्वेषी न जीवति ।
न जीवति भिषग्द्वेषी बहुवैद्यो न जीवति ॥ १ ॥

इति श्रीसुषेणग्रन्थ सम्पूर्णम् ।

Post-Colophon: लिखितं ऋष भवानीचद स० १८२४ वर्षे मिती श्रावरा सु ११ गुरवासरे सदाई जैपुरमध्ये लिखित्वा आत्मार्थे शुभ भवतु ।

2553. आनन्दमाला

OPENING: श्रीगणेशाय नम ।

जयति जगति विष्णु श्रीनृसिंहाद्य एष दितिजदनुजदाहाज्ज्वालनान्त कृशानु ।
सज्जनिजजनाना ज्ञानविज्ञानहेतु प्रकटितनिजदेह न ह्री ˙ ˙˙ सर्वतोऽस्मि ॥ १ ॥

× × ×

आनन्दभारतीनामा (म्ना) यतीन्द्रेण प्रकाश्यते ।
आनन्दार्थं पण्डिताना आनन्दस्तु मालिका ॥ ४ ॥

आनन्दमाला सुखवीर्यमाला मन्दारमाला रसशृङ्गमाला ॥ ५ ॥

विद्युत्माला प्रविलासमाला विमुक्तमाला मम सुप्रमाला ।

नाहं योगेश्वरो देवो न मनुष्यो न आत्मवित् ।
श्रीनृसिंहस्य चरणयो परागरेणुवित्सदा ॥ ६ ॥

COLOPHON: इति श्रीपरमहंसआनन्दभारतीविरचिताया आनन्दमालायां रत्नमोक्षाधिकार: । समाप्तोऽयमानन्दमाला ।

Post-Colophon: सवत् १७५२ वर्षे आश्विनमासे कृष्णपक्षे चतुर्दशीतिथौ दैत्यगुरवासरे लिपीकृता वाचनाचार्य श्रीनेमहर्षजीगणि तत्शिष्यमुख्य प० प्रवर श्रीमुनिमाणिक्यगणि तत्शिष्य-मुख्य प० प्रवर श्रीमतिसेनजी तत्शिष्य प० अभयराजेन लिलेख । स्वपठनाय श्रीरस्तु ।

2557 श्रीपत्रपल्लवी तथा वस्त्रपल्ली

OPENING: अगरकर्पूरसंयुक्त चदन टङ्कण तथा ।
तगर पद्मराग च युवानी सितपत्रका ॥ १ ॥

CLOSING & COLOPHON: आम्ना सुगुरूपदेशात् । श्रीपत्रपल्लवी

घटाण नमपावश्च चोपिक टमर तथा ।
तरङ्ग पट्टकूल च जरवाफ च शानुकम् ॥ १ ॥

मशरं च गजप्रोक्त मगुलसंज्ञा च माखरम् ।
एवं गुरूपदेशेन वस्त्रपल्ली प्रकीर्तिता ॥ २ ॥

2565. कालज्ञानं सटीकम्

OPENING: कालज्ञानस्तानुक्त सभु(शम्भु)नामेन भाषितम् ।
मासै( ) पद्भिरप्येव जायते मृत्यु रोगिणाम् ॥ १ ॥

टीका—श्रीमहादेव को भाष्यो कालज्ञान वानयुक्त वात रो ग्यान कहता आगिली नन्दु रो प्रमाण जाणीजे छ माख पहिली रोगीया रो मरण कही जै ।

CLOSING श्लो० वातके सप्तरात्राणि दशरात्राणि पित्तके।
श्लेष्मणा द्वादशाहेन ज्वरपाकं तनो वदेत् ॥ ४८२ ॥

COLOPHON इति श्रीकालज्ञाने वैद्यके सर्वज्वरचिकित्सा सम्पूर्णोयम् ।

Pos Colophonic ऋषिराजश्रीदलपतिजीशिष्य ऋषि लालचंद रघनाथ मयाचंद वाचनार्थं लेखक-पाठकयो निर्वोरयत्नमेव वाच्या । संवत १७६१ वर्षे माघमासे शुक्लपक्षे तिथि एकादशी रोहणीयवासर लिखत रघनाथेन पश्चात् पहोरे सम्पूर्णमिदं पुस्तका श्रीरस्तु ।

2566. कूटमुद्गरः सटीक·

OPENING कफवातौ वातकफौ वात पित्त च वृद्धिसमौ ।
त्रिभिराद्यैस्त्रिभिरन्त्यैस्त्रिभिराद्यपरैस्तदन्त्यैश्च ॥

मधुराम्ललवणकटुतिक्तकषाया षड्रसा तत्र त्रिभिराद्यै × × × × × अन्त्यौ तिक्तकषायैः तैं पित्त शम यातीति व्याख्यानय(म) इति ।

CLOSING & COLOPHON भिषजा माधवेनेद किं ज्ञानेनाल्पदर्शिना ।
यत्किञ्चिदुक्तमज्ञानात् तत्क्षमध्व मनीषिण ॥ २ ॥

किं ज्ञानेन निन्द्यज्ञानेन अल्पदर्शिना अल्पाध्ययनेन अनेन आत्मन सविनयत्व-मुक्तम । इति माधवविरचित कूटमुद्गर ।

2577. पट्टीप्रकाशः

OPENING श्रीगणेशाय नम ।

नत्वा हेरम्बमादौ तदनु गुरवर रोगहर्तारमीश ,
वैद्य धन्वन्तरिं वै जगति नरवरा क्लीवरूपा भवन्ति ।
तेषा क्लीबत्वहर्त्र्यं वरतनुयुवतीना सुखार्थं करोमि
वृद्धि लिङ्गस्य पौष्टय चरति सुखकरैरौषधीना विलासैः ॥१॥

दृष्ट्वा ग्रन्थशत बुद्ध्वा ह्यौषधीना प्रभावत. ।
पट्टीप्रकाश लिङ्गस्य ब्रूवे शास्त्रानुसारत ॥ २ ॥

CLOSING & COLOPHON एते कोक्स्य शार्ङ्गधरपद्धत्या लिखितम् ।
इति व्यासदेवीचन्द्रविरचिताया पट्टीप्रकाश समाप्तम् ।

Post Colophonic सवत् १६२६ का फाल्गुनकृष्ण १० लि० कवीश्वर जैलालेन कृष्णगढमध्ये ।

2578. पथ्यापथ्यविनिश्चयः सस्तवकः

OPENING श्रुत्वा रज सत्वतमासि विश्व निर्माति याति क्षिपति स्वय ये (यः) ।
[नि]शेषवृन्दारकवृन्दवद्यः पायादपायान् मनुजानि(नृगि)रीश ॥ १ ॥

आलोच्य वैद्यतन्त्राणि यत्नादेष निबद्ध्यते ।
व्याधितानां चिकित्सार्थं पथ्यापथ्यविनिश्चय ॥ २ ॥

COLOPHON. इति विषरोगपथ्यापथ्याधिकार ।

Post-Colophonic: सवत् १९२० का माघमासे कृष्णपक्षे तिथौ सप्तमी अर्कवासरे लिखत प० वस्तुरिचन्द्रेण विदासर नगरमध्ये ।

2580 पाकावली

OPENING श्रीगणेशाय नम ।

तत्रादौ बृहत्पूगपाक :—
पूग दक्षिणदेशज दशपलोन्मान भृश कर्तयेत्,
तच्छिन्न जलयोगतो मृदुतर सकुट्य चूर्णीकृतम् ।
तच्चूर्णं प्रतिशोषित वसुगुणे गोगुद्धदुग्धे पचेद्,
गव्याज्याजलिसयुतेति निविडे दद्यात्तुलार्द्धां सिताम् ॥१॥

COLOPHON: इति महाकामेश्वरो मोदक । एतस्यामफरे इति सज्ञा वदन्ति । इति श्रीपाकावली समाप्ता ।

2581. भिषक्चक्रचित्तोत्सवः (हंसराजनिदानम्)

OPENING: श्रीपार्श्वनाथाय नम ।

ध्यायेद् बालां प्रभाते विकसितवदना फुल्लराजीवनेत्रा,
मुक्तावैदूर्यगर्भै रुचिरकनकजैर्भूषणैर्भूषिताङ्गीम् ।
विद्युत्कोटिच्छटाभा परिमलबहुला दिव्यसिंहासनस्था,
गीर्देवी तस्य दासी भवति सुरवन नन्दन केलिगेहम् ॥ १ ॥

× × ×

भिषक्चक्रचित्तोत्सवं जाड्यनाश करिष्याम्यह बालबोधाय शास्त्रम् ।
नमस्कृत्य धन्वन्तरिं वैद्यराज जगद्रोगविध्वसन स्वेन नाम्ना ॥ ५ ॥

देश बल वयः काल गुर्विणी गदमौषधम् ।
वृद्धवैद्यमत ज्ञात्वा चिकित्सामारभेत् तत ॥ १० ॥

CLOSING: भिषक्चक्रचित्तोत्सव वैद्यशास्त्रे कृत हसराजेन पद्यैर्मनोज्ञैः ।
मुदेर्दं (हृद्यं) स्वोपरुरोध्वान्तनाशं हरेरङ्घ्रिससेविना नन्दमूर्तेः ॥ १ ॥

× × ×

महामङ्गले मङ्गले मङ्गलेशे शिवे शान्तिकेऽम्बे सुदारेऽखिलेशे ।
शुभे शाश्वत विश्वशृङ्ग्वकान्ते नमस्ते नमस्ते नमस्ते नमस्ते ॥ ३ ।

COLOPHON: इति श्रीभिषक्चक्रचित्तोत्सव वैद्यशास्त्रं हसराजकृत समाप्तम् ।

Post Colophonic: लिखित श्रीश्रीश्रीश्रीश्रीश्री १०८ मत्पूज्याचार्य विमलचन्द्रस्वामिजित शिष्येण श्रीश्रीश्रीश्रीश्रीश्री १०८ मत्पूज्याचार्य रामचन्द्रस्वामिजितो लघुगुरुभ्राता जेजो नगरे सवत् १६१२ कार्तिक सुदि ६ रविवासरे।

2583. मल्लप्रकाशः

OPENING: श्री नमो गणेशाय।

नत्वा गोपालबाल गिरिशगणपती शारदामाजनेय,
भानु भक्त्या भवानी निजगुरुचरणौ मानस स्वे निधाय।
ब्रूते हस्तप्रपाटीविधिमिह गदिता मल्लबोधाय पूर्वं
रम्यस्ता दृग्प्रयोगा विहितबहुफला लोकनाथ समासात् ॥ १ ॥

CLOSING: आसीद् योधपुरे पुरन्दरपुरी पूर्णाधिकामे पुर(रे),
गीर्वाणागमगानमानवगणागीत स गांगेयवत।
गागागो गुणयानदानरसिको राठ्योड(ठोड)राजो भुज-
न्यस्यद्भूपगिरामणिव्रजलसत्पादारविन्द कृती ॥ ५ ॥

तत्पुत्र पूर्णमत्र सुरसरिदमलाभ पवित्र सभित
स्तेजोभि प्रीतमित्र मदनरसकलाकल्पनावत् कलत्र।
भूमीशो मल्लदेवो जगति विजयते वैरिभि प्राप्यसवो,
दानाम्भः कुम्भरिक्तीकृतमि(इ)व जलधिर्भ्रान्तिसत्वादिदव ॥ ६ ॥

तेनायुर्वेदरत्नाकरबहुमथनात् कारितो दृष्टयोगो,
ग्रन्थोऽत्र सूरिमुख्या कुलगदिगदहृत् मल्लदेवप्रकाश।
य दृष्ट्वा वैद्यविद्याकुलनिजमतियुक् स्वस्थवद्वैद्यपुत्रो,
राजान वा जन वा मुनिजनमथवा वीतरोग करोतु ॥ ७ ॥

× × ×

निर्मथ्य मल्लदेवेन सदायुर्वेदसागरम्।
मल्लप्रकाशनामाय कारित सङ्ग्रह शुभ. ॥ १० ॥

COLOPHON: इति श्रीमल्लप्रकाशनामा लोकनाथविरचित सम्पूर्णो भवद् ग्रन्थ।

Post Colophonic: सवत १६४३ वर्षे शिशिरऋतौ तपस्यमचन्द्रपक्षे त्रयोदश्या तिथौ जीववासरे उपानक्षत्रे अद्येह पुण्यदिन श्रीमुभटपुरस्थेन वा० श्रीदेवशेखरशिष्येण वा० जयवन्ताह्विना लेखि। श्रीमन्त्रीउदयसिंहविजयराज्य।

2596. योगचिन्तामणिः सस्तबकः

OPENING: श्रीगणेशाय नम।

यत चित्राः समायान्ति तेजासि च तमासि च।
महीय(म)न्मोदय वन्दे चिदानन्दमय मह ॥ १ ॥

CLOSING : सूरीश्वरप्रवरसघशिरोवतंसश्रीचन्द्रकीर्तिगुरुपादनुग्रसादात् ।
गम्भीरचारुतरवैद्यकशास्त्रसार श्रीहर्षकीर्तिवरपाठक उद्धार ॥ १ ॥

यथा योगप्रदीपोऽस्ति पूर्वं योगशतं यथा ।
तथैवाय विजयता योगचिन्तामणिश्चिरम् ॥ २ ॥

नागपुरीयतपोगणराजश्रीहर्षकीर्तिसंकलिते ।
वैद्यकसारोद्धारे सप्तमको मिश्रकाध्यायः ॥ ६ ॥

COLOPHON : श्रीनागपुरीयतपागच्छीय हर्षकीर्तिसूरिसंकलिते श्रीयोगचिन्तामणौ वैद्यकसारसंग्रहे मिश्रिकाध्याय समाप्त सप्तमम् ॥७।

इति श्रीयोगचिन्तामणि वैद्यकशास्त्र सम्पूर्णम् ॥

श्रीमत्खरतरगच्छे शिष्य श्रीरत्नराजराजानाम् ।
योगचिन्तामणिग्रन्थो लोकगिरा चकार नरसिंह ॥ १ ॥

Post Colophonic सवत् १७३३ वर्षे चैत्रवदि ७ गुरुवासरे । लिखित मेडतानगरे ।

2600. योगशतकं सार्थम्

OPENING स्वरथ प्राङ्मुखमासीन समे देशे शुचौ स्थितम् ।
उपसर्पति यो वैद्य स च कार्यकर स्मृत ॥ १ ॥

एवविध वैद्यनें येह तेडं ते काज गए जाणवा ।

CLOSING गुणाधिक योगशत विधाय प्राप्त मया पुण्यमनुत्तम यत् ।
नानाप्रकारामयनाशहेतु कृत्स्न जगत् यत भवत्वरोगम् ॥

COLOPHON इति श्रीपण्डितवामनविरचित आयुर्वेदोक्तं योगशत लिखितम ।
इति श्रीयोगशतकस्य किञ्चिट्टिप्पनकम् । ग्रन्थान्तरलोकानामपि ।

Post-Colophonic सवति १८१४ वर्षे भाद्रवासुदि १३ तिथौ ।

2603. योगशतकं (वाजीकरणतन्त्रं) सस्तवकम्

OPENING श्रीगणेशाय नमः ।

कृत्स्नस्य तन्त्रस्य गृहीतधाम्नो(म्न) विकित्सितादिप्रसृतस्य दूरम् ।
विदग्धवैद्यप्रतिपूजितस्य करिष्यते योगशतस्य दन्य ॥ १ ॥

COLOPHONS : इति वाजीकरणतन्त्र समाप्तम् । इति योगशत समाप्तम् ।

Post-Colophonic : सवत् १८४३ ना पोष वद १३ ।

2605. योगशतक-वैद्यवल्लभाटीका

OPENING : ओं नम श्रीशिवाय नम. ।

नम कण्ठोल्लसत्कान्तिपुञ्जपल्लवशालिने ।
जगन्नगरनिर्माणपूर्णकुम्भाय शम्भवे ॥

\ × ×

सारत्वात् सारदृष्टीनामल्पत्वादल्पमेधसाम् ।
...... उपयुक्तमुभयेषा भविष्यति ॥ ४ ॥

COLOPHON इति रूपनयनकृता वैद्यवल्लभाख्या योगरानटीका समाप्ता ॥

2608 वैद्यकप्रास्ताविकसंग्रहः (वैद्यसुभाषितम्)

OPENING ओं नमः सिद्धेभ्य । श्रीगुरुभ्यो नम । अर्हम् ।

चैत्रमासे गुडाहारा बह्वाहाराश्च कार्त्तिके ।
माघे पौषे निराहारा भवन्तु तव शत्रवः ॥ १ ॥

CLOSING: अजाविकाः प्रलापाख्याः करभो वातको भवेत् ।
हारिद्रको महिषीणा मृगरोगो मृगेषु, च ॥ ६३५ ॥
पक्षिणा .... ।
अग्रिमपत्र न लब्धम् । श्रेयस्तात् सदा । श्री ।

Post-Colophonic. अंकव्योमगजाब्जाब्दे कार्तिके पाण्डुरे दले ।
रत्नसस्याविधौ सौरय देवर्षिणा लिपी(पी)कृतम् ॥

2622. वैद्यवल्लभः सस्तबकः

OPENING सरस्वती हृदि ध्यात्वा नत्वा श्रीगुरुपकजम् ।
सद्हस्तिरुचिना वैद्यवल्लभोऽय विधीयते ॥ १ ॥

CLOSING. इति तपागच्छे महोपाध्यायश्रीहितरुचिगणितच्छिष्यकविहस्तिरुचिविरचिते वैद्यवल्लभो नामाष्टमो विलासः ॥ ८ ॥

आर्या— तेषा शिशुना हस्तिरुचिना वैद्यवल्लभो ग्रन्थ( ) ।
रसनयनमुनीन्दुवर्षे परोपकाराय विहितोऽयम् ॥ १७ ॥

COLOPHON इति श्रीकविहस्तिरुचिविरचितवैद्यवल्लभो सम्पूर्णम् ।

Post-Colophonic. पूज्यप्रवरपण्डितोत्तमशिरोमणि पूज्य ऋषि श्री १०८ जेसिघजीशिष्य ऋषि देवीचन्द लिपीकृतम् । ग्राम खण्डपमध्ये । संवत् १७९८ वर्षे कार्त्तिकमासे शुक्लपक्षे १५ तिथौ बुधवासरे ।

2623. वैद्यविनोदः

OPENING- श्रीगणेशाय नमः ।

सकलसुखनिधानं भुक्तिमुक्तिप्रद यज्जयति जगति सिद्धं सर्वदेवोपास्यमानम् ।
करकलितवराब्जाभीतिखड्ग प्रसन्न दिशतु फलमभीष्ट श्यामधामाम्बिकायाः ॥१॥

अनन्तनामा हि दिगन्तकीर्त्तिः श्रीगौडवंशः प्रथितप्रभावः ।
तदात्मजः शङ्करनामधेयः शास्त्रेषु काव्येषु परं प्रवीणः ॥ २ ॥

राजाधिराजो जयसिंहवीरः ख्यातः पृथिव्यां महनीयकीर्तिः ।
प्रतीपभूपालनिवारणेन प्रतापपुञ्जज्वलदग्निकल्पः ॥ ३ ॥

तदात्मजो रामसमानसारो नाम्ना चिरायुर्न परामसिंह ।
रूपेण दानेन पराक्रमेण तिरस्कृतानङ्गसुरद्रुमेन्द्र ॥ ४ ॥

दान मदीय परिकल्पित मद् दृष्टैव सेन्द्राः सुरपादपाद्या ।
मान परित्यज्य विमृश्य बुद्धया स्थितिर्निजामेति दिव प्रयाता ॥ ५ ॥

क्षेमस्य योगस्य च मे विधातुस्तस्याज्ञया ग्रन्थकृतादरेण ।
ये ये प्रयोगा बहुशोऽनुभूतास्ते ते मया संलिखिता विमृश्य ॥ ६ ॥

प्रणम्य मान्यान् विनिवेदयामि ग्रन्थ मुदा पश्यत सावधाना ।
दृष्टे यदस्मिन् परम प्रमोदो भवेनया सिद्धिरपि प्रकृष्टा ॥ ७ ॥

हारीतपाराशरसुश्रुताना सगृह्य सार विधिवत्समासात् ।
मोक्षाय रोगादितमानवाना विधीयते वैद्यविनोद एष ॥ ८ ॥

COLOPHON & Post.-Colophonic

इति श्रीमदनन्तभट्टात्मजभट्टशङ्करविरचिते वैद्यविनोदे निदानचिकित्सावृक्षरसायन-जलयोगवमनविरेचनानुलोमनादिभेदक्वाथकल्पनादिलक्षणविलेपीमण्डादिघृततैलविधान-बस्तिनस्यधूमपान गण्डूषविधिपरिभाषा व्योषत्रिफलापचमूलादिसज्ञा रसवीर्यविपाकगुण उत्क्लेदादिलक्षण-वंशकृष्णीकरणयुक्तायुक्तविचारोल्लास. वैद्यविनोद समाप्तः श्रीरस्तु मिती आसाढ सुदि ११ सनि सवत् १८८३ का लिखत पडित देवकरण किसनगढमध्ये मदिरलुहाड्या के स्थित ॥ श्रीकल्याणमस्तु ॥ श्री श्री ॥ श्री श्री ॥ श्री श्री ।

2639 हितोपदेशः

OPENING

श्रीधन्वन्तरये नमः ।

भक्तेभ्यो भुवनाधिपत्यवरद देवैर्महेन्द्रादिभिः
सम्यग्रत्नकिरीटकोटिमणिभिः प्रोद्घृष्टपादाम्बुजम् ।
ससारभ्रमभीतिशान्तमनसो ध्यायन्ति य योगिनः
त वन्दे शशिखण्डमण्डितजटाजूट प्रभु धूर्जटिम् ॥ १ ॥

× × ×

हितोपदेशनामाय ग्रन्थः श्रीकण्ठशम्भुना ।
रोगिरोगोपशान्त्यर्थ क्रियतेऽतिसमासतः ॥ ६ ॥

CLOSING: मुक्ताफलैर्विविधदामकृता सुवृत्तं सम्पूरिता विमलकान्तिगुणेन युक्ता ।
श्रीकण्ठपण्डितकृता बुधकन्धरासु मुक्तावलीव लुठता रुचिरा चिराय ॥३६॥

COLOPHON: इति श्रीकण्ठविरचिते हितोपदेशनाम्नि वैद्यकसारसंग्रहे दशमोद्देशः सम्पूर्णः तत्समाप्तौ च पूर्णोऽयं हितोपदेशनामा ग्रन्थसन्दर्भः ।

2650 हृदयदीपकनिघण्टुः

OPENING

श्रीगणेशाय नमः ।

मनुं धन्वन्तरिं नत्वा दिव्यश्रीलक्ष्मणात्मजः ।
करोति वैद्यसर्वस्वं एकद्वित्र्योषधामृतम् ॥ १ ॥

CLOSING: यो वैद्यवद्यपदकेशववैद्यसूनुर्विद्वज्जनार्चितधनेश्वरहृद्यशिष्यः ।
स स्वल्पवाग्भटकृतप्रमितिप्रकाशं चक्रे निघण्टुममलं द्विजबोपदेवः ॥ १ ॥

विद्वद्धनेश्वरच्छात्रो भिषक्केशवनन्दनः ।
बोपदेवश्चकारेमं विप्रो देवपदास्पदः ॥ २ ॥

COLOPHON: इति श्रीवैद्यवन्द्यबोपदेवरचितो हृदयदीपकनिघण्टुः समाप्तः ।

Post-Colophonic: संवत् १७७१ वर्षे पोस सुदि ६ भृगुवासरे ।

2651. पालकाप्यगजायुर्वेदः

OPENING

श्रीसारदायै नमः । पालकाप्याय ।

प्रत्यूहव्यूहविच्छेदकारणं गणनायकः ।
जयति स्थिरसम्पत्तिर्गजभक्तनिदर्शनः ॥ १ ॥

× × ×

अथ वनानुचरितमध्यायं व्याख्यास्यामः ।
अङ्गानामधिपः श्रेष्ठः श्रीमानिन्दुसमद्युतिः ।
वेदवेदाङ्गतत्त्वज्ञः सर्वशास्त्रविशारदः ॥ ४ ॥

× × × ×

अङ्गदेशेऽप्यभूच्छ्रीमान् रोमपादो महीपतिः ।
गजारोहणशक्रेषु धृतबुद्धिर्जितश्रमः ॥ ७ ॥

COLOPHON. इति श्रीश्रीपालकाप्ये गजायुर्वेदमहाप्रवचने क्षुद्ररोगस्थानं २ समाप्तम् ।

2653 कौतुकलीलावती

OPENING: नत्वा नारायणं रुद्रं गणेशं भारतिं(ती)गुरुम् ।
सारोद्धारं प्रवक्ष्यामि ज्योतिषां क्षीरधेरिव ॥ १ ॥

CLOSING: रेखाश्च द्विगुणा(ः)कार्यास्तृतीयांशेन वर्जिता ।
पञ्चे फलेस्तुबीजानि निर्वाह्ये प्रस्फुटं फलम् ॥ १६ ॥

COLOPHON: इति कौतुकलीलावती समाप्ता ।

2654. गणितमकरन्दं सटीकम्

OPENING: गणपते जयते जयमन्मतिः सुवरदो वरदोस्त्वतुरङ्कित ।
मतिपरागपरागतपङ्कजैर्नरसुरैस्सुरैः परिपूजितः ॥ १ ॥

× × ×

मकरन्दं महाशास्त्रमेतद्गणितपूर्वकम् ।
भवगाहितुमह मन्द उद्यतः कृपया गुरो ॥ ३ ॥

CLOSING: वडनगरनिवासी नागराख्यो द्विजेन्द्रो गणितगुणविशालो भूधरो गुनुनुतु ।
तदिह चरणसेवी रामदासो बभूव स गणितमकरन्दं शास्त्रमेतच्चकार ॥ ६ ॥
श्रीमच्छ्रीसूर्यसिंहे नृपवरतिलके शासतीला नृपेन्द्रे,
ख्याते श्रीमालवंशे सकलभुवि वरो रामबालाचलो हि ।
सूनुर्विद्याधरस्यार्गणितगुणगणौ द्वावभूतौ(ता)द्विजेन्द्रौ,
धीमान् श्रीमान् तयोश्च स्वगुरुपदरतो रामदासो बभूव ॥७॥
स गणितमकरन्दं चित्रितं चित्रभावैरकलितगणितार्थ्यैः प्रस्फुटं भूमरास्तम् ।
उदहरदति मिश्राभ्रातरः तत्कृतो मे विबुधजन भवद्भिः क्षम्यतां साध्वसाधु ॥ ८ ॥

COLOPHON: इति श्रीगणितमकरन्दे द्वेरामदासविरचिते वक्रमार्गादि - उदयास्तग्रहयुतिव्य-
तिपातो चन्द्रदर्शनो नामाध्यायोऽष्टम १ समाप्तोयं ग्रन्थः ।

Post-Colophonic: संवत् १८६६ रा प्रथम असाढ सुद २ गुरो लिखित स्वामजी श्रीविजैरामजी पुत्र
हरनारायण तत्पुत्र हरकृष्ण गणेशराम भगवान पठनार्थम् । गढजालोरवास्तव्य ।
श्रीवैजनाथजीप्रसादात् शीरस्तु. ।

2659. गणितसारः सार्थ

OPENING: श्री गणेशाय नम ।

महादेवं प्रणम्यादौ बालानां बुद्धिवृद्धये ।
स्वीयसूत्रैरहं वक्ष्ये पञ्चविंशतिकामिमाम् ॥ १ ॥

अर्थ—महादेवनें प्रणाम करीनें बालकनी बुद्धिनें अर्थे पोतानें सूत्रें करी गणित-पंचवीसी कहूं छूं।

COLOPHON :

इति श्रीशम्भूनाथविरचितो गणितसार सम्पूर्ण ।

2674. आरम्भसिद्धिः सटीका

OPENING :

श्री नम श्रीसर्वज्ञाय।

श्रीधर्मन्यायसम्यग्व्यवहृतिमुवतेर्जीवलोकेन भर्त्रा,
श्रेष्ठे तादृ[ड्]ग्मुहूर्ते परिणयनमिहाऽचीकरद् यो युगादौ।
लीलायेते यतो सततमवियुतौ सत्फलाढ्यौ स दत्ता
वस्त्वन्त सिद्धिसौधे सुसमयमृषभस्वामिदेवज्ञराजः ॥ १ ॥

× × ×

इह किल सकलत्रिवर्गयथाकामार्जनगर्जत् । श्रीगौर्जरजनपदमहीमहेन्द्रश्रीवीर-धवलनरेन्द्रप्रदत्तसर्वव्यापाराधिकारेण श्रीशत्रुञ्जयोज्जयन्तार्बुदादिमहातीर्थेषु प्रबुंदा-म्बुजसर्वादिसस्यस्ववित्तविनियोगव × × × × सघपतिश्रीवस्तुपालमन्त्रीश्वरेण निर्मापिताचार्यपदप्रतिष्ठा· श्रीनागेन्द्रगच्छगरिष्ठा· सज्ज्ञानक्रियागुणसूरयः श्रीमन्त उदयप्रभदेवसूरयो × × × × × एन ग्रन्थ ग्रग्रन्थयत् ।

CLOSING :

श्रीसूरीश्वरसोमसुन्दरगुरोर्नि शेषशिष्याग्रणी-
र्गच्छेन्द्र प्रभुरत्नशेखरगुरुर्देदीप्यते साम्प्रतम् ।
तच्छिष्याथवहेमहंसरचितस्यारम्भसिद्धे, सुधी-
शृङ्गाराभिधवार्तिकस्य बुधता ५ सख्याविमर्षोऽभवत् ॥१॥

× × ×

श्रीमद्विक्रमवत्सरे मनुतिथौ १५१४ शुक्लद्वितीयातिथौ,
नक्षत्रे गुरुदेवते गुरुदिने मासे शुचौ सुन्दरे।
आशापल्लिपुरे पुर प्रतिनिधेः श्रीमद्युगादिप्रभो-
र्ग्रन्थ. सैष समर्चित· प्रथयताद् भाव पुमर्व स(नर्व दा)ताम् ॥११॥

COLOPHON : इति श्रीतपागच्छपुरन्दरश्रीसोमसुन्दरसूरिश्रीमुनिसुन्दरसूरि-श्रीजयचन्द्रसूरिप्रमुख श्रीगुरुसाम्प्रतविजयमान। श्रीगच्छनायकश्रीरत्नशेखरसूरिचरणकमलसेविना महोपा-ध्यायश्रीचारित्ररत्नगणिप्रसादप्राप्तविद्यालवेन वाचनाचार्यहेमहंसगणिना स्वपरोपकाराय सवत् १५१४ वर्षे आषाढसुदिद्वितीयाया निर्मितमिद। सुधीशृ गाराख्य श्रीआरम्भ-सिद्धिवार्तिकं सर्वपाशावग्रवचनविरतैं सुविहिताचार्यवर्यैं वाच्यमान चिर नन्दतात्।

Post-Colophonic : सवत् १६६२ वर्षे चैत्रसुदि ६ शनौ लिखितम्। ग्र. ५७५० सर्वग्र ।

2701. गिरिधरानन्दम्

OPENING.

श्रीगणेशाय नमः।

नत्वा श्रीभुवनेश्वरीं गणपतिं विष्णुं च रुद्रं द्विजान्,
नू · थ पयोनिधीन् दृढधिया निर्मथ्य धीवृद्धिदम्।
ग्रन्थं गौडकुलोद्भवस्य नृपतेरानन्दसिद्धिप्रदं,
वक्ष्ये बालविनोदनाय विमलं वेदाङ्गरायाह्वयः ॥ १ ॥

× × ×

यद्दोर्दण्डप्रचण्डाहितज(नृ)गजघटाकुम्भभित्खड्गनागः,
पीत्वा रक्तं समन्ताद् वमति बहुतरं कीर्तिकर्पूरमेव।
तस्य श्रीगौडनाथप्रबलगिरिधरस्याज्ञया चारु कुर्वे,
ग्रन्थं सत्संहिताभिः कलितगिरिधरानन्दनामानमुग्रम् ॥ १ ॥

CLOSING

शुभैरदृष्टे विमले द्यूनभे ग्रहवर्जिते।
जाताया इह कान्ताया भवेत् कापुरुषः पतिः ॥ १६५ ॥
द्यूने शुक्रे गृहे · ·· ·· ····· ·· ···

2716. ग्रहलाघव'सिद्धान्तरहस्योदाहरणटीका'

OPENING

श्रीगणेशाय नमः। श्रीवरदमूर्त्तिर्जयति।

ज्योतिर्विद्गुरुणा गणेशगुरुणा निर्मथ्य शास्त्राम्बुधिं,
यच्चक्रे ग्रहलाघवं विवरणं कुर्वेऽथ सत्प्रीतये।
स्मृत्वा शम्भुसुतं दिवाकरसुतस्तद्विश्वनाथः कृती,
जाग्रज्ज्योतिषवर्गगोकुलपरित्राणाय नारायणः ॥ १ ॥

COLOPHONS: इति श्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरात्मजश्रीमद्गणेशदैवज्ञविरचिते ग्रहलाघवे सिद्धान्तरहस्ये पातसाधनाधिकार ( ) चतुर्दशः सपूर्णः। श्रीग्रहलाघवनाम ग्र[थ]स्करणोत्तमज्याचापरहितकर्म्म सपूर्णं ॥ १४ ॥ श्रीरस्तु।

इति श्रीमदमलभट्टगिण्डरामण्डनज्योतिर्विच्छिरोमणिज्योतिर्वित्-(न)मत्तेभकुम्भदलनग्रोधवृप्रतापानलश्रीमद्दिवाकरसूनुश्रीमत्(द्) विश्वनाथदैवज्ञविरचिते ग्रहलाघवोदाहरणं समाप्तं। इति श्रीग्रहलाघवोदाहरणं समाप्तमिति मङ्गलम्।

2720. ग्रहसिद्धिप्रकरणम्

OPENING

श्रीसरस्वत्यै नमः।

सिद्धिं करोत्यैरवजरेन्द्रभोर्योनादीन् शिवो योऽपि वाङ्मुखश्च।
धर्मेश्वरारव्यनमश्वरानुसिद्धं महादेव ऋषीश्च नत्वा ॥ १ ॥

CLOSING

ईश्वरश्चीवरसोदास मध्ये सामजोग्रजन्मासीत् ।
श्रीभोगदेवनामा गोतम( ) स दैवज्ञः ॥ ४१ ॥

तत्पुत्रो माधवदेववितसु(स्तत्सुत) पद्मनाभदैवज्ञ ।
तज्ज्ञो(ज्जो) गोदानेराशीणं परसरामदैवज्ञ ॥ ४२ ॥

तज्जमहादेवेन प्रहसिद्धो सिद्धायतीत गतम् ।
श्रेयसा(से)भवानी भवश्च भवतु द्विजप्रजाद्वृद्ध यै ॥ ४३ ॥

COLOPHON इति श्रीमहादेवकृते ग्रहसिद्धो श्लोका. । शुभ भवतु ।

Post Colophonic: लिखित मुनिलक्ष्मीरत्नेन केनेद पुस्तकम् ।

2723. चक्रावली

OPENING

श्रीगुरुभ्यो नम । श्रीगणेशाय नम. ।

अथ चक्रावलिलिख्यते—अथ वास्तु ।

प्रारम्भे कूर्मचक्र वृषभ चक्र च स्तम्भयो ।
प्रवेशे कलश चक्र वास्तुचक्र च योजयेत् ॥ १ ॥

COLOPHON : इति सर्वोद्धारे चक्रावलीग्रन्थ समाप्तम् ।

Post-Colophonic सवत् १८२३ ना शाके १६८६ मिति द्वितीय चैत्र सुदि १३ तिथि त्रयोदशी भौमवारे लिखित मुनिराज श्री ५ हर्षचन्द्रेण । श्रीसिरपुरपाटा मध्ये ।

2723. चमत्कारचिन्तामणिः

OPENING

श्री नम । श्रीगणेशाय नम' ।

विज्ञानेश्वरयोगिना भगवताऽनन्तेन भट्टेन च ,
श्रीमद्भोजमहीभुजातिथिगणे यो निर्णयोऽङ्गीकृत ।
सोऽय सम्प्रति वैद्यनाथविदुषा सक्षेपतः कथ्यते ,
ज्योतिर्वेदविदामतन्द्रितधियामानन्दसम्भूतये ॥ १ ॥

COLOPHON : इति वैद्यनाथविरचिते चमत्कारचिन्तामणौ प्रतिपदादितिथिनिर्णयोद्देशकथन नामाष्टमोध्याय ।

Post Colophonic· सवत् १५६२ वर्षे फाल्गुनसुदि १४ र॰ ·

2734 चमत्कारचिन्तामणिः

OPENING

क्वणत्किंकणीजालकोलाहलाढ्य लसत्पीतवासो वासन[वसान] चलन्तम् ।
जसो[यशो]दामणे योगिनामप्यगम्य भजेऽह मुकुन्द घनश्यामवर्णम् ॥ १ ॥

CLOSING. दधीच्ये पुरे खेटहाराण…………गणान्छोहरः स्थापितस्थानरवाल(?) ।
द्विजोऽचीकरत् सुन्दरा लब्धिजन्मा नृपानिणामुर्विर्नम चिन्तामणीयम् ॥ ३ ॥
चमत्कारचिन्तामणौ यत् स्वगार्न फन कीनित भट्टनारायणेन ।
पठेद् यो द्विजस्तस्य रा(ज) समा[मा]या समस. प्रवक्तु न व्यसमया(?)॥४॥

COLOPHON इति श्रीचमत्कारचिन्तामणौ मावा[ध्या]य समाप्तम् ।

2759 ज्ञानप्रदीपः

OPENING: पण्डितोत्तमपण्डितश्रीश्रीपुण्यसागरगणिगुरुभ्यो नम । नमो विघ्नदेवे ।

शुक्लाम्बरधर विष्णु शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदन ध्यायेत् सर्वविघ्नोपशान्तये ॥ १ ॥

× × ×

ज्ञानप्रदीपक नाम शास्त्र लोकोपकारकम् ।
प्रश्नादर्शं प्रवक्ष्यामि सर्वशास्त्रानुसारत ॥ ३ ॥

COLOPHON इति ज्ञानप्रदीप सम्पूर्णम् ।

Post-Colophonic सवत् १७१६ वर्षे ज्येष्ठ वदि ··शनी लिखित गणिरत्नसागरेण ।

2788. ताजिकसारः

OPENING: श्री नमो गणेशाय ।

प्रायो न जातकफले चिरप्रयोज्ये मित. स्फुरति पुसाम् ।
तेनाऽत्र हायनफल प्रकाश्यते ताजिकप्रोक्तम् ॥ १ ॥

COLOPHON इति प्राग्वाटान्वयकुमारसिंहात्मजेन समरसिंहेन ताजिकसिद्धान्तात् पृच्छोद्देशोद्धृत-
स्तृतीयतन्त्र सम्पूर्ण. । इति श्रीतिवक्तृतताजिकतन्त्रत्रय समाप्त ।

2804 ताजिकसुधानिधिः

OPENING: श्रीगणेशाय नमः ।

वनसर्करखवम्पुधरामभूमुपबुधार्चितपादसरोरुह ।
भृगुजभानुजनानुविरोधिनो ददतु दन्तिमुखो विमला गिरः ॥ १ ॥

× × ×

श्रीप्रामोद्भवस्त्रयवान्वयनिधि सामुद्रिकज्ञः सुधी ,
श्रीमान् माधवसञ्ज्ञको द्विजवरो विघ्नेशसेवारत ।
दावाभाईति तस्मादजनि गुणगणैं पूरितस्तत्त्ववेत्ता ,
सिद्धान्ताना धरास्ता मुनिजनविदितस्तत्परोम. कोपि मान्यः ॥ ३ ॥

तस्माल्लब्धवर परोपकृतये नारायणोऽह ब्रुवे ,
तार्त्तीयैकसुधानिधिर्गणितवित् तुष्टयै चमत्कारिकम् ।
श्रीमान् खिधिकरोमकादिरचितात् सगह्य सार पर ,
यस्य ज्ञानलवेन मुख्यपदवी प्राप्नोति नि.सशयम् ।। ४ ।।

एव भौमे सवीर्ये च शुभवर्गेयुतेक्षिते ।
सदपत्योत्यसतोपस्तस्मिन् पापार्दितेऽन्यथा ।। ३४ ।।

दलिले पुत्र सहमेवला·

2811· तिथिकल्पद्रुमः (ब्रह्मपक्षीयः) सटीकः

OPENING

श्रीगणेशाय नम ।

गणाधीश च देवी च श्रीगुरोश्चरणाम्बुजम् ।
नत्वा रव्यादिकान् खेटान्, कृष्णजित् प्रमुखान् बुधान् ।। १ ।।

तिथिसारिर्णी सुगमा ब्रह्मपक्षे करोम्यहम् ।
यस्या तिथ्यादय स्पष्टा भवन्ति लघुकर्मणा ।। २ ।।

अनयो व्याख्या—अह त्रिविक्रमनामा गणकः ब्रह्मपक्षे सुगमा तिथिसारिर्णी करोमि ।

CLOSING ·

अथ करणसाधनम्—

तिथेर्गतेष्यैक्यदल तन्मान करण भवेत् ।
मानादून स्वभोग्ये च ·········· ····· ··

2871 बृहज्जातकं सविवरणम्

W-OPENING

श्रीसूर्याय नम ।

मूर्तित्वे परिकल्पित· शशभृतो वर्त्मा पुनर्जन्मना-
मात्मेत्यात्मविदा क्रतुश्च यजता भर्त्ताऽमरज्योतिषाम् ।
लोकाना प्रलयोद्भवस्थितिविभुश्चानेकधा य श्रुतौ
वाच न स दधात्वनेककिरणस्त्रैलोक्यदीपो रविः ।। १ ।।

W & Ct
CLOSINGS·
&
COLOPHONS:

दिनकरगुरुमुनिचरणमणिपातकृतप्रसादमतिनैवम् ।
शास्त्रमुपसगृहीत नमोस्तु पूर्वप्रणेतृभ्य ।। १० ।।

इति वराहमिहिरविरचिते बृहज्जातके शास्त्रोपसहाराध्याय: । २६ ।

खनेत्रेषुभीतांशु १५२० शाके व्यतीते
सहो मासि धातुस्तियौ सोमवारे ।
महीदासविप्रो महेशानुपूर्या
बृहज्जातके टिप्पण सव्यधत्त ।। १ ।।

× × ×

भट्टोत्पलकृता टीकां विलोक्यातिप्रयत्नतः ।
मया सक्षेपतोऽनेमि सार श्रीशान्द्यान्वितम् ॥ ४ ॥

इति वृहज्जातकविवरणं समाप्तम् ।

Post-Colophonic — सवत् १८५८ मयिनज्येष्ठसुदि ७ बुधे लिखित उदयराम सवाई जयपुरमध्ये आत्मपठनार्थम् ।

2872. बृहज्जातकं सटीकम्

OPENING — × × × × रक्ता न च सापि दृष्टा । तदर्थमाह—परुणमिति फलानिर्दिक्तः सवीर्यबलहीने × × × × × इति श्रीभट्टोत्पलविरचितायां वृहज्जातकवृत्तौ दशान्तर्दशाध्यायोऽष्टम ॥ ८ ॥

CLOSING & COLOPHON — इति श्रीभट्टोत्पलविरचितायां वृहज्जातकवृत्तौ उपसहाराध्याय षड्विंश. ।२६। श्री

वराहमिहिराचार्यकृते होरामहोदधौ ।
अपिनामु पलरवक्रेऽर्याप्तये विहृतिप्लवम ॥ १ ॥

चिन्तामणिरिति ख्याता टीका शान्दवल्लभा ।
सप्तसार्द्धसहस्राणि मानमस्यानुष्टुभाम् ॥ २ ॥

× × ×

चैत्रमासस्य पञ्चम्यां सितायां गुरुवासरे ।
वस्वस्वाष्टमिते शाके ८८८ कृतेय विहृतिर्मया ॥ ५ ॥

× ×

यच्छीघ्र लिखित मया कुलिखित हीनातिरिक्तं च यत्
स्वमत मूढतया च वा तदखिल धीरैः सुचिन्त्य सदा ।
यच्चात्र प्रतिपुस्तकाक्षरततेरस्पष्टभावात् पुनः
कार्यं तद्वद्बुधो विचारचतुरैरर्थं विचारस्फुटम् ॥६॥

इति श्रीबृहज्जातकटीकाप्रशस्ति । श्री. । ग्रन्थप्रमिति ७५०० श्रीरस्तु ।

2881. भावाध्यायः

OPENING — श्रीगणेशाय नम ।

नीचे शत्रुगते शुभ न शुभद मस्त गृहे नोम(नधि)ते ,
क्रूरे भास्युत पंरुयोम्पर बलन्दे स्पे फल नो प्र.धम(?) ।
स्वोच्चे चैत्राते च मित्रभुवने श्रेष्ठो च मित्रे कृते·
स्थे स्वभग्न च भावति फल उच्चारो नीचाननम् ॥ १ ॥

COLOPHON — इति श्रीदेवेन्द्रनामा वविहते भावाध्याय ।

Post-Colophonic — नर्मोदा नादप्रमा जगनाथ सवत् १८६२ ना मागसर वदी ५ वार गुरु गरूरां।

2882· भुवनदीपकम्

OPENING : श्रीजिनाय नमः

सारस्वत नमस्कृत्य मह सर्वतमोपहम् ।
ग्रहभावप्रकाशेन ज्ञानमुन्मोल्यते मया ॥ १ ॥

CLOSING· ग्रहभावप्रकाशार्थं शास्त्रमेतत् प्रकाशितम् ।
जगद्भावप्रकाशाय श्रीपद्मप्रभसूरिभि ॥ ७६ ॥

COLOPHON· इति श्रीभुवनदीपक ज्योतिषशास्त्रसम्पूर्णमस्ति ।

Post -Colophonic· श्रीभुजपुरमध्ये श्रीचिन्तामणजी प्रसादात् । लिखत । मु । कस्तूरचद । चिर रत्नचन्दपठनार्थम् ।

2898· मनोनन्दनं सटिप्पणम्

OPENING श्रीगणेशाय नम ।

नत्वा श्रीपतिपार्वतीपतिगुरून् ग्रन्थ मनोनन्दन ,
सप्ताध्यायसमन्वित दिनपते. सिद्धान्तसूक्तानुगम् ।
कुर्वे श्रीहरिवश एप विबुधा शोध्यो भवद्भिर्धिया ,
यद् यूय हि परोपकारकृतये धात्रा स्वय निर्मिता. ।। १ ॥

CLOSING· श्रीदिल्लीनगरे दिवाकरसुतापूराददूरस्थिते ,
त्रैलोक्यप्रथितेऽभवद् द्विजवरो गौडान्वये वृचन ।
तत्पुत्रो हरिवश एनमकरोद् ग्रन्थ मनोनन्दन ,
ज्योति शास्त्रमहोत्पलाम्बरमणिर्दैवज्ञभूपाकरम् ॥६॥८१॥

इति श्रीहरिवंशकृते मनोनन्दनाख्य ।

Post-Colophonic लिखित श्रीछीतरदास । शुभमस्तु ।

2915 मुहूर्त्तकल्पद्रुमः

OPENING : श्रीगणेशाय नम ।

अथ मुहूर्त्तकल्पद्रुमो लिख्यते—

अनायसग्यु गणनायमन्तश्चित्ते निवेश्य क्षपितान्तरायम् ।
प्राचीनवाक्यानि विचार्य सम्यक् मुहूर्त्तकल्पद्रुममारभेऽहम् ॥ १ ॥

CLOSING· कृष्णाजिगोत्रे सुतरा पवित्रकर्मा जनि······वूवशर्मा ।
तत्सूनुना विठ्ठलदीक्षितेन मुहूर्तकल्पद्रुम एप चक्रे ॥ १ ॥

नानाफलाढ्यं : कुसुमै. समेतः कल्पद्रुमः कल्पितवस्तुदायी ।
आकल्पमाकल्पविभूषिताना गेहेऽस्तु नित्य विबुधाधिपानाम् ॥ ३ ॥

COLOPHON· इति श्री मुहूर्त्तकल्पद्रुम सम्पूर्ण समाप्तम् ।

Post-Colophonic : सवत् १८६६ मीति माघ शुक्ल ५ भृगुवारे लिखि ब्राह्म चिमजीपठनार्थ जोशि नालुराम गोर लिखाई जयनग्रेमध्ये

2940. मुहूर्तमुक्तावली सस्तवका

OPENING· भंदि श्रीहरशारदा गणपति ब्रह्मेन्द्रनागैशा(सा)म्,
श्रीसूर्यप्रमुखान् ग्रहानृषिगुरून् भक्त्या नमस्कृत्य तान् ।
नानाग्रन्थसमस्तसारमखिलान्नालोक्य सम्यग्धिया
वक्ष्येऽह शिशुबोधनाय विशदा मूहूर्तमुक्तावलीम् ॥ १ ॥

COLOPHON इति परमहसयोगीन्द्रपरिव्राजकाचार्यतापसशिरोमणिना कृता श्रीमूहूर्तमुक्तावली समाप्ता ।

Post-Colophonic : स० १८६५ शाके १७३० प्रवर्तमाने चैत्र सुदि ४ दक्षजापतिवारे श्रीरावणपुर मध्ये लि० मुनिना रत्नचन्द्रेणात्मीयार्थे परोपकाराय चेद प्रतिदिन विपुलता यातु मे नोपहासो विधेय बुधैरसरावलि सप्रेक्ष्य ।

2941. मुहूर्तमुक्तावली सस्तवका

OPENING as at no 2940

COLOPHON इति भास्कराचार्यवीरचीत मोहूर्तमूक्तावलि सपूर्णम् ।

Post Colophonic. ल । ऋ । मोतीचंदे[ना]ऽऽत्मार्थे लखी छे गोगूदास्थाने ।

2942 मुहूर्तमुक्तावली

OPENING as at no 2940

Post -Colophonic लखित श्रीपुन्यविजयगणी सवत् १८६३ वर्षे श्रीभटेवाजी प्रसादात् ।

2958 लघुग्रहशान्तिः

OPENING : श्रीगणेशाय नम· । श्रीमम्बिकायै नम. । उपविष्टेभ्यो ब्राह्मणेभ्यो नमः । कर्मसाक्षिणे श्रीसूर्याय नम । श्रीभगवति-महाकालि-महालक्ष्मी-महासरस्वतिभ्यो नम· । आचमन प्राणायाम तिलक कुर्यात् । सुमुखश्चैकदन्तश्चेति पठन कुर्यात् ।

COLOPHON : इति लघुग्रहशान्तिः सम्पूर्णम् ।

Post -Colophonic : सवत् १८६६ वैशाख विदि ३ रविवासरे लिखित गोर शिवलाल स्वहस्ते । पठनार्थं चो रगनाथस्य ।

2966. लघुजातकं सटीकम्

OPENING : श्रीभगवत्यै नम. । ऐं नमः । श्रीसूर्याय नमः ।

यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोपि ।
कुरुतेऽञ्जलि त्रिनेत्र. स जयति धाम्ना निधि· सूर्य· ॥ १ ॥

CLOSING

क्वचित् पर्यायकथनं. कर्मणा कथ्यते क्वचित् ।
टीका महेश्वरेणेय जातकार्थाप्तये कृता ॥ १ ॥

सूर्यात् प्राप्य वरं वराहमिहिराचार्येण येनाखिल
ज्योति शास्त्रविदा विधाय सुधिया विस्तारित भूतले ।
तत्प्रोक्ते लघुजातकेऽतिविषमे शिष्यप्रियास्यामिमा
स्वस्मृत्यैव महेश्वरो निजधिया टीका चकार स्फुटाम् ॥२॥

COLOPHON:

इति महेश्वरविरचिताया वृत्तौ नष्टजातकाध्याय: समाप्त॰ ।

इति लघुजातकटीका समाप्ता ।

2989 वृत्तशतम्

OPENING:

श्रीगणेशाय नम: ।

ब्रह्मेशचन्द्रेन्द्रदिवाकराग्निवस्वादिरूपाणि सुरस्य यस्य ।
नत्वाऽच्युत त व्यवहारसिद्धयै महेश्वरो वृत्तशत करोति ॥ १ ॥
सवत्सरर्त्वयनमासदिनेशपक्ष तिथ्याख्ययोगकरणग्रहराशिभानाम् ।
लग्नादिभावनिचयस्य च लोकसिद्धा. सज्ञास्तु वृत्तशतनाम्नि सदाऽत्र वेद्या॰ ॥२॥

Post-Colophonic:

इति श्रीमहेश्वराचार्यविरचिते वृत्तशते देवप्रतिष्ठाप्रकरण सम्पूर्णम् ॥ २४ ॥
ग्रन्थ २६१ ।

2990 वृद्धयवनजातकम्

OPENING:

श्रीगणेशाय नम.

सृष्टौ विधात्रे जगता शिवाय सहारकाले स्थितयेऽच्युताय ।
तुभ्यं नम सर्वगताय नित्य त्रयीमयायामलतस्कराय ॥ १ ॥
यदुक्तवान् पूर्वमुनिस्तु शास्त्रं होरामय लक्षमित मया यत् ।
त मीनराजो निपुण स्वबुद्धया विचिन्त्य चक्रेऽब्दसहस्रमात्रम् ॥ २ ॥

CLOSING & COLOPHON:

इति श्रीवृद्धयवने ग्रहस्वरूप सपूर्णम् ।
दग्धेति दीर्घमात्रेति च ८ जीववर्णेति जीववर्णेषु घा··· ·

2991 वृद्धयावन:

OPENING:

श्रीगणेशाय नम: ।

लग्नस्थितो वामरप. सचन्द्र. करोति मर्त्यं विकृत कृतघ्नम् ।
मूकं जड वा परदाररक्त विहीनवित्त सरुज सदैव ॥ १ ॥

COLOPHON:

इति श्रीवृद्धयावने संख्याश्रययोगाध्याय: ॥

Post-Colophonic:

संवत् १७५१ वर्षे प्रथम आषाढ वदि १० बुधे लिखितोऽयं ग्रन्थ. ।

2999. शृङ्गारसुन्दरीपुस्तिका

OPENING: अथ शृङ्गारसुन्दरीनामा जन्मपत्री ना योग लिख्यते—

ग्रहा शत्रुगेहाऽऽधिताश्चोत्तिचा फलं भावज यत् शुभं तत्फलं हि ।
परे सगयुक्त कलत्र धर्वे यथा साधवो देवविप्राग्निभक्ता ॥ १ ॥

CLOSING मूर्तौ भूमिसुतो गुरुधनगृहे सौरी तथा चन्द्रमा ,
राहुर्धर्मगहे व्यये रविबुधौ शुक्रान्वितौ सस्थितौ ।
योगोऽयं तिलकाभिधो विजयते वृद्धि स्वकार्ये कुले
विख्यातो गजराजराजसहितो लक्ष्मीनिवासान्वितम् ॥१४॥

इति श्रीशृङ्गारसुन्दरी समाप्तम् ।

3008. सज्जनवल्लभः

OPENING श्रीगणेशाय नमो नम. ।

अथ श्रीसज्जनवल्लभ लिख्यते । तिलाभ्यगत्याज्यमाह—

शुक्रादित्यकुजेन्द्रमन्त्रिदिवसे पष्ठाष्टमीवैधृते ,
पक्षान्ते व्यतिपातविष्टिदशमीकामद्वितीयादिने ।
द्वादश्यां रविसक्रमे शिवमिते घस्रे तथा सध्ययो—
स्तैलाभ्यगश्रुशान्ति नो सुखकर श्राद्धाज्य(द्वे ह्य)पो पर्वणि ॥१॥

CLOSING श्रीमान् घात्र(त्र)पुर चकास्ति(स्ति)जगति श्रीगुर्जरे मण्डले ,
तस्मिन् षटकविप्रमण्डलमणि( ) कौण्डिन्यगोत्रो गुणी ।
विद्वान् श्रीपतिभक्तिमान् समभवत् गङ्गाधरो याज्ञिके(क)
प्रेमा(म्णा)दायि मखे रसागदयुता लग्न द्विजेभ्यो वसु ॥२३॥

यद्वा दानवराभिनन्दितबुध श्रीविश्वनाथाह्वयो ,
य पुत्र कमलाभिधान(धत्र) सुषुवे भानु(त्र)त श्रीशिवा ।
स श्री ·····विश्वनाथचरणाब्जप्राप्तविद्यानिधि ,
शास्त्र सज्जनवल्लभ समतनोत् ज्योतिर्विदा तुष्टये ॥२४॥

COLOPHON इति श्रीभानुपण्डितविरचिते सज्जनवल्लभे ग्रहदशाप्रकरण पञ्चदशम सम्पूर्णम् ॥ १५ ॥ इति ग्रन्थ समाप्तमिद । श्लोक सख्या ३७५ छे ।

Post-Colophonic सवत १६१३ ना शाके १७७७ ना माघ शुक्ल सप्तम्या श्रीमन्दवासरे सपूर्ण । श्रीवाकानेर मध्ये लखो छे ग्रन्थ ।

3018. सिद्धान्तरहस्योदाहरणम् [ग्रहलाघवटीका]

OPENING · as at no 2716

Post-Colophonic: सवत १८४८ शाके १७१३ प्रवर्तमाने ज्येष्ठमासे कृष्णपक्षे तिथौ १४ चतुर्दश्यां मगलवासरे रामलालेनेद लिपिकृतम् जयपुरमध्ये स्वपठनार्थम् ।

3109 प्रश्नरत्नं स्वोपज्ञटिप्पणीसहितम्

OPENING

श्रीगणेशाय नमः।

त नत्वा हरियोंऽदाज्ज्ञानमादौ स्वयम्भवे ।
स्वकृतप्रश्नरत्नस्य टिप्पणी क्रियते मया ॥ १ ॥

CLOSING

ग्रास्ते यद् वसुधाविभूषणमणौ श्रीमद्व्रजे · ··
रम्य काम्यवन त्रयीधुतमलास्तस्मिन् वसन्ति द्विजा. ॥
श्रीकृष्णाश्रयदामचन्द्रतनयो यो नन्दरामाभिध—
स्तेषा सस्कृतवाग् प्रबन्धममल सत्प्रश्नरत्नाह्वयम् ॥६६॥

ग्रथ समाप्तिकाल ग्रन्थकृत्या चाह—

सिद्धाष्टचन्द्रवर्षेऽश्वियुज सितपक्षसप्तम्याम् ।
पूर्तिमगाद् ग्रन्थोऽय शून्याब्धिद्विप्रमैवृ'तै ॥ ६८ ॥

ग्रश्वियुज ग्राश्विनस्य शेपरपष्टम् ॥ ६८ ॥

ईषदीषदिह सरचितेय टिप्पणी पृथुभयेन मनोज्ञा ।
ताहग्बुधजनोऽत्र दृढिमाह् गत वदतु सर्वजनानाम् ॥ १ ॥

ग्रत्र भावप्रधानो निर्देश इत्यस्मात् पृथुत्वमयेनेति वेद्यम् ।

सप्तद्वयष्टेन्दुवर्षस्य भाद्रशुक्लनिवातिथौ ।
टिप्पिणीय मया क्लृप्ता सक्षिप्तार्थप्रकाशिनी ॥ २ ॥

COLOPHON : इति श्रीस्वकृतप्रश्नरत्नस्य टिप्पणी सम्पूर्णम् ।

3160. समरसारः सटीकः

OPENING :

श्रीगणेशाय नमः । श्रीगुरवे नमः ।

अभिवन्द्य रामचन्द्र गुरु तदुक्त स्वरग्रन्थम् ।
विवृणोति यथाप्रज्ञ तदभिहितार्थानुसारेण ॥ १ ॥

CLOSING :

वशे वत्समुनीश्वरस्य शिवदासाख्यादुरुख्यातितः
सम्राडर्निविदाप यस्य जनक श्रीसूर्यदासोऽजनि ।
यन्मातुर्यशसा दिशो दश विशालाक्ष्या वलक्षा व्यधात्,
स प्राज्ञ(ज्ञ:) स्वरशास्त्रसारविचिति रामो वसन्तं मिथे ॥८५॥

दत्समुनीश्वरस्य वशे उत्तरप्रसिद्धेः × × × × × × विचिति-सक्षेप व्यकरो-
दित्यन्वयः ॥ ८५ ॥

COLOPHON : इति श्रीरामचन्द्रसोमयाजिविरचितसमरसारटीका भरतकृता समाप्ता ।
